॥ ओ३म् ॥

अश्वमेध सहस्राणि
वाजपेयशतानि च।
लक्षं प्रदक्षिणा भूमेः
कुम्भस्नानेन तत्फलम्॥

---

त्रिवेणीं माधवं सोमं
भारद्वाजं च वासुकिम्।
वन्देऽक्षयवटं शेषं
प्रयागं तीर्थनायकम्॥

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2024-26

सत्यनिष्ठा जयेल्लेखनी निर्भया

Posting Date.:
4-5, 19-20 of Every Month

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१

ई-मेलः sanskritsamvad@gmail.com वेवसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥

गंगाद्वारे प्रयागे च
धारा - गोदावरीतटे।
कुम्भाख्येयस्तु योगोऽयं
प्रोच्यते शङ्करादिभिः॥

---

माघे वृषगते जीवे
मकरे चन्द्रभास्करे ।
अमायां च तदा योगः
कुम्भनामातथोत्तमः॥

卐 वर्षम्-१४ 卐 अंकः-१४ (३२६) नवदेहली 卐 १६ जनवरीमासः २०२५तः ३१ जनवरीमासः २०२५ पर्यन्तम् 卐 विक्रमसंवत्-२०८१ 卐 सृष्टिसंवत्-१,९६,०८,५३,१२४ 卐 पृष्ठम्-२०


## कुम्भ-विशेषाङ्कः

**सितासिते सरिते यत्र सङ्गथे तत्राप्लुतासो दिवमुत्पतन्ति। ये वै तन्वं विसृजन्ति धीरास्ते जनासो अमृतत्त्वं भजन्ते॥**

# सनातन-आस्थायाःमहापर्वणःकुम्भस्य शुभारम्भः

**प्रयागराजः (धीरजमैठाणी)।** तीर्थराजप्रयागे १४४ वर्षोत्तरं महायोगे पौष-पूर्णिमायाः ब्राह्मे मुहूर्ते सनातन-आस्थायाः महापर्वणि पवित्र-स्नानेन दिव्य-भव्य-आस्थायाः पर्वणो कुम्भस्य शुभारम्भो जातः।



महाकुम्भेऽस्मिन् देशाद् विदेशाद् प्रायेण ४० कोटिश्रद्धालूनाम् आगमनमनुमीयते। प्रथमे दिने गंगा-यमुना-संगमस्य ४४ घट्टेषु पुण्यार्जनं हेतवे १.६५ कोटिश्रद्धालवो नवामृतस्नानम् अकुर्वन्। द्वितीये दिने मकर-संक्रांत्यां कुम्भे अमृतस्नानकर्तारः श्रद्धालवः चतुष्कोटिसंख्यकाः आसन्। तै हर-हर गंगे स्वरेण गूंजायमानसंगमस्य विहंगमः तटः आलोकितः जातः।

सूर्यदेवस्य उत्तरायण-स्थितौ मकर-संक्रांतेः प्रातः बेलायां दिव्य-अनुभूत्या सह आदिशंकराचार्यद्वारा पुनर्स्थापिताया: आस्थायाः संगमः कुम्भे हर हर महादेव उद्घोषेण सम्पूर्ण जगत् गूञ्जायमानं जातम्। संगमे श्रीमहानिर्वाणी-अटल-अखाड़ा इत्यनयोः सन्ताः प्रथमस्नानम् अकुर्वन्। तत्पश्चात् श्रीनिरंजनी- आनंदअखाड़ा इत्यस्य सन्ताः स्नानं कृतवन्तः। पद्म-विभूषण जगद्गुरुस्वामीरामभद्राचार्यः पीठाधीश्वर-राजेंद्रदास महाराज-इत्यादिभिः सह अनेके महामंडलेश्वराः वैदेशिक सन्ताः अपि अमृतस्नाने भागम् अगृह्णन्। जूनाअखाड़ा-संरक्षक-महंतहरिगिरि महोदयः कथितवान् यत् शताब्दीभ्यः अमृतकालस्य संयोगो निर्मितः। त्याग-समर्पण -भावानां संदेशं दातुं संताः स्वशिविर-स्थलात् संगमपर्यन्तं पदयात्रायाः अमृतस्नानम् अकुर्वन्।

वैष्णव-संप्रदायस्य दिगम्बरअनि-निर्मोहीअनि-निर्वाणीअनि इत्येषां संताः अमृतस्नानस्य पर्वणि स्वशक्ति-वैभवानां प्रदर्शनम् अकुर्वन्। आस्थाध्यात्मनोः महाकुंभेऽस्मिन् जर्मनी-नीदरलैंड-रूस-इंग्लैंड-अमेरिका-



इटली-ऑस्ट्रेलिया इत्यादि राष्ट्रेभ्यः सहस्रं नागरिकाः त्रिवेण्यां स्नातवन्तः। भारतीयसनातन- संस्कृतिं प्रति स्वीयाम् अगाधश्रद्धां प्रदर्श्य हर्षं प्रकटितवन्तः। पौष - पूर्णिमायाः स्नानात् परं श्रद्धालवोऽपि पापेभ्यः मुक्तये, पूर्वजानां तृप्तये, देव-मोक्ष प्राप्तये कल्पवासम् आरभन्ते। पद्मपुराणे, अग्निपुराणे, स्कंदपुराणे च कल्पवासस्य विशिष्टं महत्त्वं बोधितम्। उल्लेखनीयं यत् कुंभः आस्था -संस्कृत्योः प्रतीकः यस्य उल्लेखः उपनिषद्सु तथा पुराणेष्वपि लभ्यते। सूर्यस्य द्वादशराशिषु एकस्य नाम कुंभः। मांगलिककार्येषु तपसः साधनायाः पूर्वं कुम्भकलशः स्थाप्यते।

पौराणिक-आख्यानस्य अनुसारम् एकस्मिन् समये सागरमंथनं जातम्। मंथनात् प्राप्तः अमृतकुम्भाय देवतानां राक्षसानां मध्ये युद्धं जातम्। स्कन्दपुराणानुसारम् अमृत बिन्दवःचतुःषु स्थानेषु हरिद्वारे, प्रयागे,उज्जैने, नासिके च गोदावरीतटे पतिताः। तेषु एव चतुःस्थानेषु कुम्भस्य आयोजनं भवति। प्रयागराजे आयोजिते कुम्भे सहस्त्रं साधवो योगिनो गृहस्थाश्च आगच्छन्ति। सर्वकारीप्रशासनम् एतेशां सुरक्षा, आवागमनम् आवासः इत्येषाम् अभूतपूर्वां व्यवस्थाम् अकरोत्। कुम्भेऽस्मिन् बहवश्रद्धालवःसमायान्ति।

---

# भारते मेलकपरम्परा कुम्भमेलकं च




**-राधावल्लभः त्रिपाठी**


भारतीयसंस्कृतौ उत्सवानां मेलकानां च अनितरसाधारणो महिमा वरीवर्तितीति न संशीतिः। जनाः यत्र यत्र आनन्दाय मोदाय स्वात्मपरितोषाय वा मिलन्ति तत्र मेलकं सम्भवति। प्राचीनकाले मेलकानि समाज इति नाम्ना व्यपदिश्यन्ते स्म। महाभारते समाजानां मेलकानां वा आयोजनस्य उल्लेखाः प्राप्यन्ते। समाजानां आयोजनाय समाजवाटस्य निर्माणं विधीयते स्म। इन्द्रमह-गिरिमह-प्रभृतिषूत्सवेषु स्वत एव नानादिग्दिगन्तवास्तव्याः जना उत्सवस्थले सम्मिलन्ति स्म। क्वचित् कदाचित् मेलकेषु समाजेषु वा अब्रह्मण्यमपि अनर्थोपनिपातो वाऽपि विजृम्भते स्म। यथा महाभारतयुद्धानन्तरं पिण्डारकक्षेत्रे यादवानां समाजो मेलकं वा समजनि, तत्र ते यादवाः परस्परं मुसलप्रहारैर्निघ्नन्तः समस्तं कुलं विनाशितवन्तः। समाजे एक दुष्प्रवृत्तीनां सञ्चारं वीक्ष्यं देवानां प्रियः प्रियदर्शी सम्राडसोकः समाजानां आयोजनं निषिषेध। कामं दोषदर्शिनः समाजे मेलके वा बहून् दोषान् प्रेक्षन्ताम्, सन्तः परप्रत्ययनेयबुद्धयो न भवन्ति। मेलके समाजे वा-

**मनसि वचसि काये पुण्यपीयूषपूर्णा-**
**सकलजगति ते ते निर्भयं सञ्चरन्तः।**
**निखिलमपि च लोकं श्रेयसा पावयन्तः**
**निजहृदि विकसन्तः सम्मिलन्त्येव सन्तः॥**

पुरा काश्मीरे योगिनां योगिनीनां च समागमो भवति स्म। एतादृशाः समाजाः योगिनीमेलक इति नाम्ना व्यपदिश्यन्ते स्म। महामहेश्वरेण योगिनीभुवा आचार्येण अभिनवगुप्तेन योगिनीमेलके कथं योगिनो आत्मज्ञानं समधिगच्छन्ति प्राप्नुवन्ति च परमां गतिमिति दृष्टान्तितम्। तद्यथा तन्त्रालोके स इत्थमाह -

**योगिनीमेलकाच्चैषोऽवश्यं ज्ञानं प्रपद्यते।**
**तेन तत्पर्व तद्वच्च स्वसन्तानादिमेलनम्॥**
**संवित् सर्वात्मिका देहभेदाद् या सङ्कुचेत् तु सा।**
**मेलकेऽन्योन्यसङ्घट्टप्रतिबिम्बाद् विकस्वरा॥**
**उच्छलन्निजरश्म्यौघः संवित्सु प्रतिबिम्बितः।**
**बहुदर्पणवद् दीप्तः सर्वांशेनाप्ययत्नतः।**
**अत एव नृत्तगीतप्रभृतौ बहु पर्षदि।**
**यः सर्वतन्मयीभावो ह्लादो न त्वेककस्य सः॥**
**आनन्दनिर्भरासंवित् प्रत्यक्षं सा तथैकताम्।**
**नृत्तादौ विषये प्राप्ता पूर्णानन्दत्वमश्नुते॥**
**ईर्ष्याऽसूयादसङ्कोचकारणाभावतोऽत्र सा।**
**विकस्वरा निष्प्रतिघं संविदान्नदयोगिनी॥**

(तन्त्रालोके, २८.३७२-७८, भागः-७, पृ ३२६४-६६)

योगिनीमेलके देहभेदात् सङ्कुचिता नाना संवितः अन्योऽन्येन सङ्घट्टिताः अन्योन्यं प्रतिबिम्बययन्ति, तेन संविन्महामेलकं जायते। इदमेव संलिन्महामेलकं मेलकानां उत्सवानां पर्वणां च परमरहस्यम्। यदि संविदो परस्परं सङ्घिट्टताः महैतन्यं महाभावं च न विरचयन्ति तर्हि मेलकानामयोजनं ध्रुवं निरर्थकमेव। कालानुभूतौ रसानुभूतावपि संविन्महामेलकं भवेदेव अक्षयं च ध्रुवं च। अत एव पुनरपि आचार्योऽभिप्रैति-

**तथा हृदयैकाग्रसकलसामाजिकजनः खलु।**
**नृत्तं गीतं सुधासारसागरत्वेन मन्यते॥**
**तत एवोच्यते मल्लनटप्रेक्षोपदर्शने।**
**सर्वप्रमातृतादात्म्यं पूर्णरूपानुभावकम्॥**

(तन्त्रालोके, १०.८५-८६, भागः- ५, पृ. १९५०-५१)

सर्वेषां रसिकानां सहृदयानां सामाजिकानां वा परस्परं चैतन्यगतं तादाम्त्यं यथा रसानुभूतौ भवति तथैव मेलकेषु चेतनाप्रवाहाः परस्परं सङ्गमिता महासागरं निर्मान्ति। कुम्भमेलकेष्वपि एतदेव भवति। अनुभवे कुम्भमेलकं न बाह्यजगति, बाह्यं जगत् तदर्थमुपकरणमात्रमिति दिक्।

# कुम्भाख्यमुत्तमं पर्व भुक्तिमुक्तिप्रदं स्मृतम्



-आचार्यो भगवतशरणशुक्लः
पूर्वाचार्यो विभागाध्यक्षश्च
व्याकरणविभागः
काशीहिन्दूविश्वविद्यालयः ,वाराणसी।

अखिलेऽपि विश्वे भारतवर्षं स्वयं तीर्थस्वरूपं वर्त्तते। यत्र बहुपुण्यशालिभिः तपस्विभिः महर्षैः गङ्गा-यमुना-नर्मदा-सिन्धु-कावेरी-गोदावरीप्रभृतयः पापहारिण्यो देवनद्यः सेव्यन्ते। अतएव भारतवर्षं कर्मभूमिः कथ्यते। अन्याश्च भूमयः केवलं भोगभूमयः सन्ति-

**१.पृथिव्यां भारतं वर्षं कर्मभूमिरुदाहृता** - ब्रह्मपुराणम्-२७/२

**२.कर्मभूमिरिमां प्राप्य पुनर्यान्ति सुरालयम्।।**

-श्रीमद्भागवतम्-५/१७/११

**३.कर्मभूमिरियं विप्र स्वर्गादपि च दुर्लभा।**

**यत्र विष्णुं समभ्यर्च्य मर्त्याः स्युः सुरवन्दिताः।।** -पद्मपुराणम्-७/१७/२५७

**४.अत्रापि भारतं श्रेष्ठं जम्बूद्वीपे महामुने।**

**यतो हि कर्मभूरेषा ह्यतोऽन्या भोगभूमयः।।** -विष्णुपुराणम्-२/३/२२

यथा भारतवर्षं कर्मभूमिरूपं तीर्थरूपमस्ति तथैव देवालयरूपमप्यस्ति। तत्रत्यानां सनातनधर्मावलम्बिनां देवतुल्यसदाचारपारायणत्वात्। नित्योत्सवं हि मन्दिरमिति भणितेः सत्त्वाद्। भारतवर्षेऽपि प्रतिमासं कश्चिदुत्सवो भवत्येव। यथा वर्षारम्भे नवरात्रोत्सवः, मेषसंक्रान्ति इत्युत्सवः (सौरमासस्य ततः प्रारम्भात्) वैशाखे अक्षयतृतीया बुद्धपूर्णिमाप्रभृत्युत्सवाः, ज्येष्ठे गङ्गादशहरा वटसावित्री भीमसेनी एकादशीप्रभृत्युत्सवाः। आषाढे रथयात्रोत्सवः देवशयनीत्येकादशी गुरुपूर्णिमाप्रभृत्युत्सवाः, श्रावणे हरिदमावस्या, नागपञ्चमी सप्तमी रक्षाबन्धनं श्रावणी प्रभृतय उत्सवाः, भाद्रपदमासे गणेशचतुर्थी हलषष्ठी कृष्णजन्माष्टमी, कुशोत्पाटिनी अमावस्या हरतालिका तृतीया, गणेशचतुर्थी, वामनद्वादशी, अनन्तचतुर्दशीप्रभृत्युत्सवाः। आश्विनमासे महालयाः, शारद् नवरात्रिः, दशहरा, शरत्पूर्णिमा बाल्मीकीजयन्तीप्रभृत्युत्सवाः। कार्तिके च करकचतुर्थी, धन्वन्तरिजयन्ती, हनुमज्जयन्ती, दीपावली, अन्नकूटम्, भ्रातृद्वितीया षष्ठीपर्व, देवोत्थानीएकादशी, पूर्णिमाप्रभृत्युत्सवाः। मार्गशीर्षमासे दत्तात्रेयजयन्ती भैरवाष्टमी, रामविवाहोत्सवः, गीताजयन्ती प्रभृत्युत्सवाः, पौषमासे महामना जयन्ती, अन्वष्टकाश्राद्धम्, गुरुगोविन्दसिंहजयन्ती, महाभद्राष्टमी प्रभृत्युत्सवाः। माघे च गणेशजन्मोत्सवः, गणेशचतुर्थ्याम् रामानन्दजयन्ती,अष्टकाश्राद्धम्, षट्-तिला एकादशी, मौनी अमावस्या, वसन्तपञ्चमी, अचलासप्तमी, माघीपूर्णिमा, सन्तरविदासजयन्ती, सम्पूर्णे मासे प्रयागे माघमेलापकादिसमुत्सवाः। फाल्गुनमासे शिवरात्रिः, रङ्गभरी एकादशी, होलिकापर्वप्रभृत्युत्सवाः भवन्ति। अतएवैषां द्वादशमासानां महत्त्वं भवति समुत्सवप्रधानत्वात्। केचन एवम्भूता अपि उत्सवाः ये देशकालग्रहयोगैः भवन्ति। तादृश एवायं समुत्सवः कुम्भपर्वणो विद्यते। यश्च क्रमशः हरिद्वारे वैशाखमासे, प्रयागे माघमासे, अवन्तिकायामपि वैशाखमासे, नासित्र्यम्बकक्षेत्रे च भाद्रमासे प्रतिद्वादशाब्दं भवति। अस्मिन् वर्षे कुम्भपर्वमिदं तीर्थराजप्रयागे माघमासस्य अमावस्यायां तिथौ (२९/१/२०२५) मकरराशौ शशिदिवाकरयोः सत्वाद् देवगुरोश्च वृषराशौ सत्त्वाद् जायमानं विद्यते।

**माघे वृषगते जीवे मकरे चन्द्रभास्करे।**

**अमायां च तदा योगः कुम्भाख्यस्तीर्थनायके।।** (स्कन्दपुराणे)

अर्थात् प्रयागक्षेत्रे गङ्गायमुनासरस्वतीसंगमे माघमासे अमावस्यायां तिथौ यस्मिन् वर्षे देवगुरुर्वृषराशौ भवेत् शशिसूर्यौ च मकरराशौ भवेताम् तदा अतीवपुण्यमयं कुम्भाख्यं पर्व भवति।

कुम्भपर्वणि स्नानस्यातिशयं महत्त्वं वर्त्तते। विष्णुपुराणं प्रतिपादयति यत्, सहस्राधिकाश्वमेधयागानुष्ठानस्य शताधिकवाजपेययागानुष्ठानस्य लक्षपरिमितपृथिव्याः परिक्रमाणां यत् फलं भवति तत्केवलं कुम्भपर्वणि पवित्रनदीषु (गङ्गाशिप्रागोदावरीषु) स्नानेन दानेन देवाराधनाविधानेन भवति। शरीरवाङ्मनसाञ्च परिशुद्धिः सिद्ध्यति।

स्कन्दपुराणेऽपि प्रतिपादितं यत्, सहस्रकार्तिकमासेषु प्रातः पवित्रजलाशये स्नानेन, शताधिकमाघमासेषु पवित्रजले च स्नानेन कोटिसंख्याकवैशाखमासेषु नर्मदायां स्नानेन यत्पुण्यफलमश्नुते ततोऽप्यधिकं फलं कुम्भपर्वणि पवित्रनदीषु स्नानदानादिभिर्लभ्यते-

**अश्वमेधसहस्राणि वाजपेयशतानि च।**

**लक्षं परिक्रमा पृथ्व्याः कुम्भस्नानेन तत्फलम्।।** -विष्णुपुराणे

**सहस्रं कार्तिकस्नानं माघे स्नानं शतानि च।**

**वैशाखे नर्मदाकोटिः कुम्भस्नानेन तत्फलम।।** -स्कन्दपुराणे

एतेषु हरिद्वारप्रयागावन्तिकानासिकक्षेत्रेषु जायमानेषु कुम्भपर्वसु मुख्या भूमिका देवगुरोः बृहस्पतेः भवति। यतो हि बृहस्पतिः प्रायः एकाराशे भोगकालः एकवर्षात्मको भवति। अतः प्रत्येकं स्थले द्वादशवर्षानन्तरमेव कुम्भपर्वयोगो जायते। यथा साम्प्रतं बृहस्पतिः वृषराशौ विद्यते। अतएव एतस्मिन् वर्षे प्रयागे कुम्भपर्व वर्त्तते। पुनरयं योगः २०३७ खीष्टाब्दे माघमासे आगमिष्यति। एवमेव सर्वत्र बोध्यम्। समेषामपि कुम्भस्थलानां क्रमशः परिचय इत्थमस्ति-

**हरिद्वारे-**

**पद्मनीनायके मेषे कुम्भराशिगते गुरौ।**

**गङ्गाद्वारे भवेद्योगः कुम्भनामा तथोत्तमः।।** -स्कन्दपुराणे

अर्थात् यदा सूर्यो मेषराशौ गुरुश्च कुम्भराशौ भवति तदा वैशाखमासे हरिद्वारक्षेत्रे कुम्भपर्व भवति।

**प्रयागे-**

**माघे वृषगते जीवे मकरे चन्द्रभास्करे।**

**अमायां च तदा योगः कुम्भाख्यस्तीर्थनायके।।** -स्कन्दपुराणे

प्रयागक्षेत्रे मकरराशौ शशिसूर्यौ भवेताम्। वृषराशौ गुरौ सति अमावस्यायां तिथौ कुम्भपर्व भवति।

**उज्जयिनीक्षेत्रे-**

**मेषराशिगते सूर्ये सिंहराशौ बृहस्पतौ।**

**उज्जयिन्यां भवेत् कुम्भःसदा मुक्तिप्रदायकः।।**

अर्थात् सूर्यः मेषराशौ सिंहराशौ गुरुश्च भवेताम् तदा उज्जयिनीक्षेत्रे कुम्भाख्यं पर्व सदैव मुक्तिप्रदायकं भवति।

**नासिकक्षेत्रे-**

**सिंहराशिगतेसूर्ये सिंहराशौ बृहस्पतौ।**

**गोदावर्यां भवेत्कुम्भो जायते खलु मुक्तिदः।।**

अर्थात् यदा सूर्यो बृहस्पतिश्च सिंहराशौ भवेताम् तदा गोदावरीक्षेत्रे नासिकस्थले कुम्भाख्यं पर्व भाद्रपदमासे भवति।

यद्यपि सर्वेषु स्थलेषु मासं यावत् कुम्भपर्वणां महत्त्वं भवति। किन्तु अमावस्यातिथौ चन्द्रमसोऽपि स्थितिः सूर्येण सह भवति। अतः प्रत्येकं स्थले अमावस्यायां तिथौ कुम्भपर्वणोऽधिकमहत्त्वं भवतीति बोध्यम्। स्थानीय पर्वदृष्ट्या मासविशेषपर्वदृष्ट्यापि कुम्भपर्वणामधिकं महत्त्वं जायते।

प्रयागस्य कुम्भपर्वणः सर्वधिकं महत्त्वं वर्त्तते। तत्र भगवतो माधवस्य द्वादशरूपैः विद्यमानात्, गङ्गायमुनासरस्वतीसङ्गमस्य सत्त्वात् अक्षयतटस्य त सत्त्वात् पद्मपुराणे त्रिवेण्यां महत्त्वं समुद्घाटितमस्ति-

**गङ्गा च यमुना चौव मध्ये गुप्ता सरस्वती।**

**तदग्रभागे यः सरति सा वेणी यत्र शोभते।।**

**तत्र वासं प्रकुर्वन्ति ज्ञानिनोऽज्ञानिनो नराः।**

**कल्पितं फलमायान्ति न यान्ति पुनरागमम।।**

प्रयागक्षेत्रं मुक्तिक्षेत्रं वर्त्तते। यत्र भगवान् माधवः स्वकीयद्वादशरूपैः सम्पूर्णप्रयागक्षेत्रं वैष्णवक्षेत्रं विधाय स्वभक्तेभ्यो मोक्षं प्रयच्छति। प्रयागे तिस्रो वेद्यः सन्ति।

१.अन्तर्वेदी(गङ्गायमुनयोर्मध्यभागः)

२.बहिर्वेदी(गङ्गापूर्वभागः प्रतिष्ठानपुरक्षेत्रम)

३.मध्यवेदी(यमुना- दक्षिणभागः अलर्कक्षेत्रम) प्रत्येकं वेद्यां भगवतो माधवस्य स्थितिः वर्त्तते। तद्यथा-

१.अन्तर्वेदी- क. वेणीमाधवः ख. वटमाधवः ग. अनन्तमाधवः घ. अशिमाधवः ङ. मनोहरमाधवः च. विन्दुमाधवः।

२.बहिर्वेदी- छ. संकरहरणमाधवः ज. शङ्खमाधवः।

३.मध्यवेदी- झ. आदिमाधवः ञ. चक्रमाधवः ट. गदामाधवः ठ. पद्ममाधवः।

ब्रह्मवैवर्तपुराणे माधवशब्दस्य व्याख्या सम्यक्तया विहितास्ति-

**मा च ब्रह्मस्वरूपा या मूलप्रकृतिरीश्वरी।**

**नारायणीति विख्याता विष्णुमाया सनातनी।।**

**महालक्ष्मी स्वरूपा च वेदमाता सरस्वती।**

**राधा वसुन्धरा गङ्गा तासां स्वामी च माधवः।।**

अर्थात् मा इति पदेन ब्रह्मस्वरूपा ईश्वरी मूलप्रकृतिः, सनातनी विष्णुमाया,नारायणी, महालक्ष्मी, वेदमाता, सरस्वती, राधा, पृथिवी, गङ्गा एता गृह्यन्ते। एतासां यः धवः स्वामी सः माधवो भवति।

प्रयागतीर्थे ब्रह्मणो विष्णोः शिवस्य च नित्यनिवासो वर्त्तते। ब्रह्म बहिर्वेद्यां प्रतिष्ठानपुरक्षेत्रे गुप्तरूपेण निवसति। विष्णुश्च माधवरूपेण सम्पूर्ण त्रिवेद्यात्मकं प्रयागतीर्थमभिव्याप्य द्वादशरूपेण निवसति। भगवान् शिवश्चाक्षयवटरूपेण नित्यं निवसति। मत्स्यपुराणे एतस्य प्रतिपादनं विद्यते

**प्रयागे निवसन्त्येते ब्रह्मविष्णुमहेश्वराः।**

**कारणं तत्प्रवक्ष्यामि शृणु तत्त्वं युधिष्ठिर।।**

**पञ्चयोजनविस्तीर्णं प्रयागस्य तु मण्डलम।**

**तिष्ठन्ति रक्षणायात्र पापकर्मनिवारणात।।**

**उत्तरेण प्रतिष्ठानाच्छद्मना ब्रह्म तिष्ठति।**

**वेणीमाधवरूपी तु भगवाँस्तत्र तिष्ठति।।**

**महेश्वरो वटो भूत्वा तिष्ठते परमेश्वरः।**

**ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः।।**

**रक्षन्ति मण्डलं नित्यं पापकर्मनिवारणात।।** -मत्स्यपुराणे-१११/७-१०

प्रयागस्य मुख्यदेवानां वर्णनमस्मिन् पद्ये प्राप्यते-

**त्रिवेणीं माधवं सोमं भारद्वाजं च वासुकिम।**

**वन्देऽक्षयवटं शेषं प्रयागं तीर्थनायकम।।**

अर्थात् प्रयागक्षेत्रस्य एता मुख्या देवताः त्रिवेणी, माधवः, सोमेश्वरमहादेवः भारद्वाजमुनिः, वासुकिनागः, अक्षयवटः, शेषनागः स्वयम् अत्रत्या प्रधानदेवता तीर्थराजः प्रयागः एते सन्ति। एतेषां वन्दनं प्रतिदिनं विधेयम।

प्रयागक्षेत्रे षष्टिकोटिः दशसहस्राणि तीर्थानि नित्यं वसन्ति इति महाभारते प्रतिपादितमस्ति-

**दशतीर्थसहस्राणि षष्टिकोटिस्तथा पराः।**

**येषां सान्निध्यमत्रैवं कीर्त्तितं कुरुनन्दन!।।** -महाभारतम् वनपर्व- ८५/८५

प्रयागक्षेत्रे माघमासे कल्पवासस्यातीव महत्त्वं वर्त्तते। पद्मपुराणे कल्पवासस्य सम्यक् व्याख्या कृतास्ति-

**प्रयागे माघपर्यन्तं त्रिवेणीसङ्गमे शुभे।**

**निवासः पुण्यशीलानां कल्पवासो हि कथ्यते।।**

एतत्कुम्भपर्व च प्रयागे कल्पवासो महतां पुण्यशीलानां सौभाग्यस्य परिपाकेन लभते। अतः सर्वान् कार्यविशेषान् विहाय प्रयागक्षेत्रे आगन्तव्यम्।

प्रभूतपुण्यलाभश्चाधिगन्तव्यः। यतो हि कुम्भपर्वणि त्रिवेणीक्षेत्रे स्नानेन त्रिवेणीजलस्य पानेन मनुष्य आत्मानं सर्वपापविनिर्मुक्तं विधाय स्वस्मात् पूर्वजान् सप्तकुलान् जनान् पितृपितामहाप्रपितामहादीन् पितामहीप्रपितामह्यादीन् पुनाति-

**कुम्भे स्नात्वा च पीत्वा च त्रिवेण्यां च युधिष्ठिर!**

**सर्वपापविनिर्मुक्तः पुनात्यासप्तमं कुलम्।।** -मत्स्यपुराणम् अ. ९०४.

# पत्रे संस्कृतसंवादे कुम्भपर्व विशिष्यते



-प्रो.धर्मदत्तचतुर्वेदी, संस्कृतविभागः
केन्द्रीयउच्चतिब्बतीशिक्षासंस्थानम्
मानितविश्वविद्यालयः, सारनाथः वाराणसी

संस्कृतपत्रपत्रिकासु पाक्षिकसंस्कृतसंवादपत्रिका कुम्भपर्वविशेषाङ्कममुं प्रस्तौति प्रयागराजकुम्भभूमाविति विज्ञाय कस्य संस्कृतसचेतसो मनो न मोदतां, को नाभिनन्द्यात्, को न पश्येदधीयीत च शास्त्रीयविद्वद्विहितनिबन्धविशेषाङ्कप्रकाशनमिदम् । भूरिशो धन्यतया सभाज्यते अतिथिसम्पादकेन डॉ.विमलेन्दुकुमारत्रिपाठिना सह सम्पादकमण्डलं निखिलम्। प्रयागराजकुम्भमहत्त्वस्य सर्वमपि श्रेयः संस्कृतसाहित्यस्यैव प्राधान्येन । संस्कृतं नाम भारतीयं शास्त्रं, साहित्यं संस्कृतिश्चेति। संस्कृतमहत्त्वं प्रत्येकं मानवेन स्वीकरणमेव। कुम्भोत्पत्तिकथाप्रसङ्गः संस्कृतसाहित्येनैव प्रकाश्यते। वेदादिपुराणैरेव विव्रियते, काव्यमहाकाव्य- रूपकादिभिश्चोत्तालतरङ्गापतितपावनीत्रिवेणीगङ्गा मनोहरवर्णनै-र्विभूष्यतेतराम्। भारतीयज्ञानपरम्परासंवादसम्मेलकं समविषमविविधधर्मानुयाय्यनुरञ्जकं वर्णाश्रमपुरुषार्थचतुष्टयविभावकं नागाख्यसंन्यासिसाधुमहामण्डलेश्वरब्रह्मचारियतिशक्ति-विजृम्भितं लक्ष्मीनारायणशिव- शक्तिगायत्रीयागीयहव्यसुगन्धितं वेदचतुष्टयाष्टादशपुराण- रामायणगीतारामचरित-मानसमन्त्रगीतपाठगुञ्जितं ससङ्गीतडमरुशङ्खवीणावेणु-निनादितमहर्निशमविरतं त्रिवेणीसङ्गमतटे सर्वप्रान्तीयनागाख्यभक्तैर्निजेष्ट- देवजपध्यान-समाधिभिर्विचितपुण्यपरिपाकविशेषं भारतस्य प्रत्येकं दिशा रेलबसाख्यादिवाहनैः सततं सोत्साहप्रयागराजयात्रानुविद्ध-मुत्तरप्रान्तशासनेन प्रदत्तविशालसुखसौविध्यपूरितं पदे पदे यात्रिकनिवाससुखोपहारजुष्टं विश्वनगरीषु चमत्कृतदिव्यशोभया देवराजोपमनाकपुरीवाभिनन्दितम् अखाडाख्यस्थले विपुलभक्तयजमानोपस्थित्या विशालजनसम्मर्देन कौशेयारुणश्वेतपीताम्बरादिवस्त्रशोभायमान-ब्रह्मचारिवटुकदर्शनसुविभातं सनातननारायण-हरिनामसङ्कीर्तनध्वनिशक्तिदं क्वचित्सिन्दूराञ्चित- भालकज्जलालङ्कृतनेत्रयुगलसौ-भाग्यगौरीश्मशानभस्मोद्धूलितविग्रहभूतभावनशम्भुप्रतिमा-पूजनालङ्कृतं पञ्चविंशतिसेक्टराख्य-भूमिपर्यवसितं चतुश्शतहेक्टेयराख्यक्षेत्रफलभूमिसुविस्तृतं हिन्दी-अंग्रेजीसहितविविधभाषानु-वादसन्देशप्रसारणसौविध्यपूरितं पुलिसप्रशासनसुरक्षाऽभेद्य-कवचचक्रव्यूहनियन्त्रितं सर्वतश्शान्तविमलगाङ्गनिर्झरिणीजलस्नानपरिपावितं गूगलाख्यान्ता-राष्ट्रियमञ्चे डिजिटलाख्यसूचनानिदर्शकं त्रयस्त्रिंशन्मितसेतुविभाजितं सुगमयातायातस्वास्थ्य-चिकित्सासौविध्यसुखवितरकं योगिनाऽऽदित्यनाथमुख्यमन्त्रिणा यात्रिभक्तजनानां सुखावास-शौचालयादिव्यवस्थाप्रदानसुशोभितंक्वचिद् वेदवेदान्तधर्मोपदेशपण्डितसभामण्डलीसुसज्जितं नृपहरिश्चन्द्रसूर्यपुत्रकर्णशिबिप्रभृतिमहादानिसदृशकुबेरपुत्रवत् सर्वतो दयादानदाक्षिण्यकोशाढ्य-भक्तजनसुसेवितं स्नानजपध्यानदानशास्त्रचिन्तनसत्सङ्गादिना धनधान्यपुत्रकीर्त्यायुरारोग्य-सद्गतिमनोवा-ञ्छितफलप्रापकं वेदपुराणमूर्तिरूपेण महामण्डलेश्वर-शङ्कराचार्य-मठाधीश-तपस्विपुण्यदर्शनालङ्कृतं विश्ववैदेशिकाकर्षणसुखकेन्द्रमिव विशालासंख्येयजनोपस्थिति-विभावितं पदे पदे समागतभक्तजनेभ्यः सुमधुरफलसुपरिपक्वभोजनवितरणदानपरिपावितं ससङ्गीतभागवतकथादिपाठसुगुञ्जितं क्वचिद्रासलीलारामलीला-दृश्याङ्कनभावितं भारतीयं कुम्भपर्व नाम विशिष्यते विश्वस्मिन्नपि विश्वे।

एतादृशं कुम्भपर्व पुराणानुसारेण कम्बलाश्वतराख्यनागद्वयेन यामुनतटे सुविराजितेन गाङ्गपूर्वितटस्थसमुद्रकूपेन सह मत्स्यपद्मकूर्मपुराणानुसारेण प्रतिष्ठानापरपर्यायेण, सन्ध्यावटेन, हंसप्रपतनेन, कोटितीर्थेन, प्रजापतेर्यज्ञवेदिकाभोगवतीतिसुप्रतिष्ठितेन, दशाश्वमेधकेन, मत्स्यपद्माग्निकूर्मपुराणानुसारेण उर्वशीपुलिनेन, दक्षिणोत्तरयमुनातटे ऋणप्रमोचनेन, उत्तरीयगाङ्गतटे मानसेन यामुनदक्षिणभागे अग्नितीर्थेन यमुनोत्तरे विरजेन धर्मराजपश्चिमस्याम् अनरकाख्येन च नाम्नोपतीर्थेन भारद्वाजमुन्याश्रमसुशोभितेन विभिन्नशिलापट्टाङ्कितेन तीर्थराजप्रयागराजेन यागसंस्कृतिरादिकालत एव निषेव्यते। अत्रैव प्रयागराजतीर्थे यज्ञो मूर्तिमान् सन् विराजते तस्मादेव तीर्थराजेतिसंज्ञया परिभाष्यते।

अस्य तीर्थराजस्य परमसौभाग्यवहं कुम्भपर्वैतत्। भावात्मैक्यसामरस्यसौहार्दसौमनस्य-समतावहं किमपि सुविशालं यज्ञप्रतीकभूतमास्ते। धार्मिकसमागमश्चायं विभिन्नजीवनपद्धतीनां यत्र नैककोटिमितजनाः सांस्कृतिकविश्वासावनौ परब्रह्मण एकसन्ततिरूपास्त्रिवेण्यां स्नात्वा विशिष्टपुण्यं चिन्वन्ति। दर्शनीया कुम्भभूमिरियं विविधधर्मसम्प्रदायावलम्बिनाम्। सागरमन्थने पीयूषकुम्भप्राप्त्या सहास्यकुम्भाख्यमहोत्सवस्य सम्बन्धो युज्यते। धन्वन्तरिरमृत-कलशमादायाविर्भवति। धन्वन्तरिर्यदा देवेभ्य उपायनीकुरुतेऽमृतकलशममुन्तदा दैत्यास्तस्मै क्रुध्यन्ति। तदानीं साक्षान्नारायणो विष्णुर्देवदानवकलहयुद्धस्थितिमवलोक्य मोहिनीरूप उत्पद्यते। मोहिनीरूपेण देवेभ्यो व्यतरदमृतं यदा तदा दैत्य एको देवपङ्क्तावुपाविशत्। स च राहुग्रहोऽमृतमपिबत्। विष्णुर्हि तदानीमेव तस्य शिरश्चिच्छेद। तस्य शिरोभागो राहुश्शरीरभागश्च केतुरभवत्। इन्द्रदेवस्तदानीं निजपुत्रजयन्तहस्ते तं कलशं ददौ रक्षणार्थम्। कथ्यते - असुरास्तं कलशं हस्तगतं कर्तुं प्रायतन्त परञ्च जयन्तहस्तात्तत्कलशबिन्दवो यत्र यत्रापतन् तत्र तत्र कुम्भपर्वायोजनपरम्परा प्राचलत्। क्वचिद्विष्णुर्गरुडहस्ते तं कलशं ददावित्यपि तथ्यं प्रतिभाति। यद्यपि जयन्तगरुडभूमिका कुत्राप्येतस्मिन् विषये नोल्लिखितमित्यपि सत्यम्। श्रीमद्भागवत-विष्णुपुराण-महाभारत-रामायणादिषु जयन्तगरुडनामोल्लेखो न लभ्यते। चतुर्षु प्रयागोज्जैनहरिद्वारनासिकाख्यस्थलेषु पीयूषबिन्दुनिपातेन कुम्भपर्व समायोज्यते। एतेषु गोदावर्यास्तटे नासिकपुरे महाराष्ट्रे गुरोः सिंहराशिस्थितौ द्वादशवर्षे पर्वेदमायोज्यते। गङ्गायमुनासरस्वतीतिसङ्गमे प्रयागराजे मेषराशिस्थिते वृहस्पतौ, सूर्यचन्द्रयोश्च मकरराशिस्थितौ च अमावस्यायां कुम्भपर्व जायते। मतान्तरेण मकरे सूर्यस्य वृषराशौ च वृहस्पतेः प्रवेशात्प्रयागकुम्भ आरभ्यते।

हरिद्वारे हरि की पौडी इत्याख्यगाङ्गतटे अमृतबिन्दुनिपातेन कुम्भराशावायोज्यते पर्वैतत् सूर्यस्य मेषराशिस्थितौ वृहस्पतेश्च कुम्भराशिस्थितौ। उज्जयिन्यां क्षिप्रानदीकूले सिंहराशिस्थितौ वृहस्पतेस्तथा मेषे च सूर्यस्य प्रवेशे कुम्भपर्व समायोज्यते कार्तिकामावस्यायां सूर्यचन्द्रयोर्युगपदैक्यस्थितौ वृहस्पतेस्तुलाप्रवेशे च। वृन्दावनविषये यथोक्तम्-

**कुम्भराशिस्थिते भानौ तत्रैव च स्थिते गुरौ।**
**वृन्दावने भवेत्कुम्भो वैष्णवानां समागमः।।**

वृन्दावनकुम्भे वैष्णवानां योगदानं प्रशस्यते। पक्षिराजगरुडो निजमातुर्दासत्वं निवारयितुं नाकादमृतकलशं समानीय विश्रमाय वृन्दावने कालीदहतटे कदम्बवृक्षे समस्थापयत् तत्र कलशामृतबिन्दुनिपातेन कदम्बवृक्षोऽमरायते। होलिकापर्वानन्तरं कुम्भपर्व समायोज्यतेऽत्र कालिन्दीतटे। दक्षिणभारते कुम्भकोणनामकं कुम्भपर्व समायोज्यते। पञ्चक्रोशपरिमिता भूमिरमृताप्यायिताऽभवत्। कुम्भघोणनाम्नापि प्रसिध्यति पर्वैतत्। कर्मकाण्डे कलशप्रतिष्ठादौ कुम्भस्तुतिर्यथा विधीयते -

**कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाहितः।**
**मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः।**
**अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः।।**

कुम्भचतुष्टयकुम्भशब्दप्रयोगो वैदिकसाहित्येऽपि लभ्यते तन्महत्त्वञ्चापि परन्तत्र कुम्भमेलाविषये नोक्तं तथा यथा नारदशिववराहस्कन्दमत्स्यकूर्मादिपुराणेषूपलभ्यते। तस्माद् वैदिकसाहित्यप्रसङ्गास्तथा मेलासन्दर्भे नोपात्ताः। समुद्रमन्थनकथा-कद्रूविनताकथा-महर्षिदुर्वासश्च कथा अत्र प्रसज्यन्ते। दुर्वाससः कथया दक्षिणभारतीयकुम्भघोणवृत्तं सङ्गच्छते। अथर्ववेदस्यैकप्रसङ्गेन ब्रह्मणोक्तं मानवस्य भोजनपोषणवृद्धिसाधनाय कुम्भचतुष्टयं चतुर्षु स्थानेषु प्रददामि (अथर्ववेदः ४-३४-६ तथा १९-५३-३) शिवपुराणे ज्ञानसंहिताध्याये देवा गङ्गां प्रार्थयामासुर्यद् यदा यदा बृहस्पतिः सिंहराशिं प्रवेक्ष्यति तदा तदा वयमत्रोपस्थास्यामो भवती चापि महादेवेन सह पृथ्वीलोकस्यैकादशवर्षेषु विहितपापानि प्रक्षालयितुं समागच्छतु। कुम्भमेलायोजनं द्वादशे वर्षे जायते। बृहस्पतेर्महती भूमिका कुम्भायोजने। मकरसंक्रान्ति- पौषपौर्णिमा-मौन्यमावस्या- वसन्तपञ्चमी- पूर्णिमा-शिवरात्रिपर्वसु कुम्भस्नानमहत्त्वं विशेषपुण्य-लाभदं जायते। सहस्राश्वमेध वाजपेयशतं पृथिव्या लक्षं परिक्रमाफलं यत् यत् सर्वमेकदा कुम्भस्नानेनोपलभ्यते। अस्मिन्नेव कुम्भोदके सर्वाणि तीर्थानि सर्वे देवाश्च प्रतिष्ठन्ते, मानवाः प्राणाश्चापि। अयमेव शिवो विष्णुरयं प्रजापतिश्चासौ आदित्या वसवो रुद्राः, ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदश्च सर्वे कुम्भेऽस्मिन् प्रतिष्ठन्ते। कुम्भमेलावधौ कल्पवासमहत्त्वं सर्वाधिकं प्रशस्यते। माघमासे नैके गृहस्था ब्रह्मचारिसाधवश्चैकमासान्तं कुटीरेऽद्य संस्थाय हरिस्मरणसङ्कीर्तनेनात्मचिन्तने दत्तावधाना विशेषपुण्यान्यर्जयन्ति निजपूर्वकृतदुरितानि प्रक्षालयन्ति सद्गतिमोक्षफलञ्च लभन्ते। कुम्भपर्वेदं धैर्यसुखसन्तोषात्मिकशुद्धिं मनसो नैर्मल्यमिन्द्रियशान्तिञ्च जनयति।

भारतस्य यत्र तत्र सुदूरभागेषु निवसन्तो महापुरुषाः चतुष्पीठशङ्कराचार्यास्तपस्विनोऽत्र कुम्भमाध्यमेन युगपल्लभ्यन्ते। अत्रैव तेषां दर्शनेन तदुपदेशश्रवणेन च मनश्शान्तिः शुभाशीषप्राप्तिश्च जायते। वस्तुतो महात्मनां दर्शनविशेषलाभप्रदोऽयमुत्सवः सिध्यति। यः कोऽपि भक्तोऽत्र समायाति श्रद्धया स चेतो गन्तुं नेहते। तपोजन्यपुण्यफलप्रापकं पर्वेदं केन मातुं शक्यते। भारतस्य समग्रपर्वव्रतेष्विदमेव कुम्भपर्व विशेषमहत्त्वमाधत्ते।

कुम्भमेलाक्षेत्रे सर्वप्रथमं रथगजारोहिसमुत्सवोऽपि दर्शनीयो भवति। अश्वरथगजारोहिणो महानिर्वाणीयाटलमहामण्डलेश्वरवैराग्यद्वयसन्तमहन्तोदासीनत्रयाख्या महासाधवो मठाधीशा नागाख्यसंन्यासिनः सपुष्पवृष्टिजयकारशङ्खवाद्यध्वनिना सह प्रथमस्नानं विधातुं चलन्ति। दर्शनीयोऽयमुत्सवो नितरां सनातनपरम्परां प्रतिष्ठापयति। भक्ताः कामं साक्षान्नारायणं द्रष्टुं न क्षमन्तां परं सर्वश्रेष्ठसंन्यासिनां दर्शने ब्रह्मदर्शनं ते कुर्वन्ति तत्पादयोर्निपत्येश्वरभावं प्रकटयन्ति महात्मसाधुषु यथाश्रद्धम्। श्रद्धावाँल्लभते ज्ञानमिति गीतावचनेन भारतीया संस्कृतिर्मूर्तिमतीव विलोक्यतेऽत्र। कुम्भमेलायामखाडाख्यस्थलं साधुसंन्यासिनां सम्प्रदायदलम्। संन्यासिनां दशनामीतिसंगठनस्य संस्थापकः शङ्कराचार्य एव। केचित् स्वामि-सुरेश्वराचार्य इति मन्यन्ते। शृङ्गेरीमठ-जोशीमठ-गोवर्धनमठ-शारदामठानां क्रमशो हस्तामलकत्रोटकाचार्य-पद्मपादाचार्य-स्वरूपाचार्या मन्यन्ते प्रमुखाचार्याः। दशनामिसम्प्रदाया धर्मसंरक्षका धर्मप्रचारकाश्च भवन्ति। जूना-अखाडाख्यस्थलेष्टदेवः कालभैरवो दत्तात्रेयश्च मन्यते। निरञ्जनीतिनामाखाडाख्यस्थलं प्रयागराजस्थं कार्तिकेयं भजति। महानिर्वाणीतिनामाखाडाख्यस्थलं हि ओरङ्गजेबविरोधे ज्ञानवापीनामयुद्धं चकार। अस्येष्टदेवो हि कपिलमुनिर्मन्यते। नागानामसंन्यासिनो जटाजूटा भस्मच्छुरितदेहा शिवभक्ता इमे यदा शोभायात्रायां समायान्ति तदा तदीयदर्शनं कर्तुं लक्षाधिका भक्ता पूर्वत एवावतिष्ठन्ते। नागानामसंन्यासिनां दशनामीतिसंन्यासिनां वा दश अखाडाक्षेत्राणि महानिर्वाणी-अटल-निरञ्जनी-आनन्द-जूना-आवाहन-पञ्चाग्निनामानि। परमहंससाधवो वीतरागा धर्मोपदेशका भवन्ति। सिक्खजना उदासिमतावलम्बिनो भवन्ति। एते दासशरणाद्युपाधिं दधते।

महानिर्वाणीतिनामाखाडाक्षेत्रं हरिद्वारे प्रयागे च शाखारूपम्। निरञ्जनी-आनन्दनामानः साधवो युगपदेव कुम्भे स्नान्ति। काश्यामानन्दसम्प्रदायसाधवो वसन्ति। जूनानामाखाडाक्षेत्रं काश्यां हनुमद्घट्टे राजते। प्रयागे कुम्भस्नानक्रमे- महानिर्वाणी- निरञ्जनी- जूना- निर्मोही- दिगम्बर-पञ्चायती-उदासीन-निर्मलाखाडानामक्षेत्राणि भवन्ति। प्रयागकुम्भे प्रत्येकं धर्मसंन्यासिनां पृथक् पृथग् ध्वजा आरोहन्ति। ध्वजसङ्केतेनैव भक्ता निजेष्टाखाडाक्षेत्रं प्राप्नुवन्ति। २०१३तमे ख्रीष्टाब्दे पूर्णकुम्भानन्तरं २०२५तमेऽस्मिन् ख्रीष्टवर्षे पूर्णकुम्भमहोत्सवोऽसौ समायोज्यते। साधवोऽत्र भक्तेभ्यो दीक्षां प्रददति। सम्प्रदायानुसारेण अखाडानामक्षेत्राणि - शैवसम्प्रदाये सप्त, जूना-पञ्चायती-निरञ्जनी-महानिर्वाणी-तपोनिधि-आनन्द-शम्भुपञ्च-अग्नि-पञ्चाटल-आवाहननाम-अखाडाक्षेत्राणि। वैष्णवसम्प्रदाये निर्वाणीअनी-दिगम्बरअनी-निर्मोहअनीनामाखाडाख्यक्षेत्राणि। अनीतिनामधेयस्य अष्टादश लघूनि क्षेत्राणि। उदासीनसम्प्रदायस्य अखाडाख्यस्थलद्वयं - पञ्चायती-अखाडाख्यं बृहत् नवीनं च क्षेत्रम्। सिखसम्प्रदायस्य निर्मलपञ्चायतीतिनामाखाडाख्य-क्षेत्रम्। एतानि सर्वाणि त्रयोदश अखाडानामक्षेत्राणि अखिलभारतीया-अखाडाख्यपरिषत् इति विशालसंगठनं वेद्यम्। कल्पवासः प्रयागकुम्भे निगद्यते नान्यत्र कुम्भेष्वायोज्यमानेषु। यस्य ध्वजे यदि गजचिह्नंतदा तत्समीपे उडीसा-गुजरात-रीवाराज्यगतयजमाना गच्छन्ति। यस्मिन् ध्वजे विविधरङ्गबिन्दवस्तत्र सिक्खजना गच्छन्ति। पीतकुटीरे रजतनारिकेलाङ्किते मारवाडीतिनजनाः प्रविशन्ति। ध्वजे यस्याश्वचिह्नं तस्य पुरोहितस्य समीपे बुन्देलखण्डभक्ता गच्छन्ति। प्रयागे तीर्थपुरोहिता मुण्डनपिण्डदानश्राद्धशय्यादानगोदानभूमिदानादिकं कारयन्ति।

प्रयागकुम्भविषये नैकेषां वैदेशिकविदुषां प्राचीनविदुषां देशभक्तानां नेतृणां टिप्पण्योऽपि लभ्यन्ते ततोऽपि कुम्भमहत्त्वं वर्धतेतरामृ। निजात्मकथायां महात्मा गान्धी पुनः कुम्भपर्व समागतं ममायं विशेषावसरः। अत्र सप्तदशसंख्यलक्षं जना युगपन्मोहिता न भवितुमर्हन्ति। पण्डितजवाहरलालनेहरू- प्राचीनकालादेव कुम्भमेला प्राचलत्। परं कदारम्भ एतस्य न शक्यते वक्तुं किमपि। चीनीयात्रिणां त्रयोदशशतवर्षेभ्यः पूर्वम् एतन्मेलाधिकृतटिप्पणी लभ्यते। प्राचीनकालतो मेलापरम्परेयं परं कदाप्रभृति समारब्धा न वक्तुं शक्यते।

शेषभागःचतुर्थपुटे

# सम्पादकीयम्



भारतीया संस्कृतिः वैदिक-पौराणिक-आध्यात्मिक-धार्मिक-साहित्यिक- बौद्धिक-सामाजिकार्थिक-दृशा सर्वमतिशेते। अस्यां भारतीयायां संस्कृतौ ज्ञान-विज्ञानयोः वैशिष्ट्यं सर्वविदितमेव। ज्ञानावाप्तये ऋषि-महर्षिभिः महद् तपः तप्तम्। येन ज्ञान-विज्ञानादीनां नैकाः वाद-प्रतिवादाः शाखा-प्रशाखाश्च समुत्पन्नाः। अत्र न केवलं भातीयज्ञानपरम्परावैविध्यं बिभर्ति। अपितु धार्मिकभावनाभरितहृदयैः मानवैः सनातनपरम्परा आद्रियते प्रचार्यते प्रसार्यते च निखिले विश्वे। अस्यैव तथ्यस्य निकषभूतं निदर्शनं कुम्भाख्यं पर्व वर्त्तते। कुम्भशब्दस्य विभिन्न -व्युत्पत्तयः अवाप्यन्ते। यथा-**'कुं=पृथ्वीम् उम्भति अमृततत्त्वेन जलादिना पुण्यादिना वा प्रपूरयति इति कुम्भः'** कुम्भः, कलशः, घटः इत्यादि शब्दाः पर्यायत्वेनाङ्गीक्रियन्ते।

अर्धकुम्भ-कुम्भ-पूर्णकुम्भादिरूपेण कुम्भशब्दस्य प्रयोगो दृश्यते। अमृतकुम्भविषयिणी कथा सर्वविदिता एव। देवदानवानां युद्धवर्णनं स्कन्दपुराण-महाभारतादिग्रन्थेष्वाप्यते।

ज्योतिषशास्त्रानुसारं राशीनां प्रमुखतया शशि-सूर्य-बृहस्पति-मकर- वृषादीनां स्थित्या स्थलविशेषेष्वायोजनमस्य कुम्भपर्वणः जायते। द्वादशसंख्यात्मकाःराशयः, द्वादशवर्षानन्तर-मस्य कुम्भस्यागमनमिति ज्ञायत एव निखिल मर्त्यैः । यथा- **'कुं=पृथ्वीं भावयन्ति संकेतयन्ति भविष्यत्कल्याणा-दिकायस्थिताः बृहस्पतिसूर्यादयो ग्रहाः संयुज्य प्रयागराजहरि- द्वारावन्तिकादित- त्तत्स्थानविशेषान् उद्दिश्य यस्मिन् स कुम्भः'** भारतीयजीवनपद्धतौ कुम्भः मंगलदायकः मंगलकारकश्च मन्यते। देवानां नदनदीनां कुम्भेऽस्मिन् वासः मांगलिककार्येषु मन्यते।

**कलाः कला हि देवानां दानवानां कलाःकलाः।**
**संगृह्य निर्मितो यस्मात् कलशस्तेन कथ्यते॥**

सनातनपरम्परानिर्वाहकस्यास्योत्सवस्योल्लेखः ऐतिहासिकग्रन्थेषु ह्वेनसांग निजयात्रावृतान्ते विदधाति। शंकराचार्य-रामानन्दाचार्य-सुरेश्वराचार्य- मधुसूदनसरस्वतीप्रभृतयः सानात्नीकाः काले-काले परम्परामिमां परिपोषयन्ति।

वस्तुतः कुम्भपर्वणि मानवाः निजजाति-सम्प्रदाय-मतवादादिकं विहाय आनन्दमग्नाः सन्तः समायान्ति। इदमेवास्य कुम्भस्य वैशिष्ट्यम्। अस्मिन्नागताः मानवाः सनातनपरम्परां कीर्तयन्ति। कुम्भपर्वणः उत्सवस्य अथवा कुम्भमेलायाःयद् ऐतिह्यं भवेन्नाम। परन्त्विदं निश्चप्रचं निगद्यते यत् भौतिकतावादीयुगेऽस्मिन् मानवाःआधि-व्याधिसंतापैःसंतप्ताः प्रायशः दृष्टिपथमायान्ति। परन्तु कुम्भे प्रयागे समागत्य सर्वेऽपि अमृतमयं कालं यापयन्ति। अयमेव कालः समागतानां मानवानाममृत-कालः। कुम्भपर्व उररीकृत्य संस्कृतसंवाद-समाचारपत्रेण कुम्भ- विशेषांकः प्रकाशनाय विनिश्चितः। इदानीं सारस्वतकार्यमिदानीं पूर्णतां यातीति आमोदकरम्।

कुम्भविशेषांकास्यास्य प्रकाशनाय यत् आचार्याः, विद्वांसः, कवयः, लेखकाः, विचारकाः, समीक्षकाश्च अहमहमिकया निजरचनाः लेखादिमाध्यमेन प्राक्कल्पितयोजनां पूर्णतामानीतवन्तः इति दर्शं-दर्शं मोमुद्यते मे मनः। रचनाप्राचुर्यकारणा-दस्यपाक्षिकसमाचारपत्रस्य कलेवरं सम्वर्ध्य अधुना प्रकाश्यते। येषामपि रचनाः, लेखादिकाः अवाप्ताः, प्रकाशिताश्च सन्ति ते सर्वेऽपि धन्यवादार्हाः, कार्तज्ञं च विनिवेदयामि।

**-डॉ. विमलेन्दु कुमार त्रिपाठी**
(अतिथि-सम्पादकः)

# किं करणीयं महाकुम्भे



**-डॉ. नवलता**
लखनऊ

कुम्भोऽर्धकुम्भो महाकुम्भो वेत्येतेषामायोजनस्याधारः सूर्यचन्द्रमसोः राशिसंयोगविशेष इति स्वीकुर्वन्ति ज्योतिर्विदः। तज्ज्योतिश्शास्त्रस्य चिन्तनविषयः खलु। किन्तु कुम्भकाले कुम्भक्षेत्रे विशिष्टसंयोगवशात् किमप्यप्रतिमं दिव्यमलौकिकममृतमयं स्वरूपं दृश्यते जडचेतनयोरिति सिद्धमेव। पुण्यसलिलानां गङ्गायमुनासरस्वतीनां जलं सर्वौषधमयममृततमं जायते। आध्यात्मिकचेतनासंवलितेऽस्माकं भारतेऽध्यात्मश्रद्धाविश्वासानां त्रिवेण्या अजस्रप्रवाहे कृतावगाहनं कोटि-कोटिजनमानसं भारतस्यार्षपरम्परायाः प्रतीकत्वेन राराजते। धर्मविज्ञानसमन्विता आर्षचेतना जनसामान्यस्य पथपाथेयनिदर्शने प्रवर्तत इत्यत्र न सन्देहः। वस्तुतः लोकलाभकरान् गृढविषयान् धर्मावरणे निवेश्यास्माकमूर्ध्वचेतोभिर्मनीषिभिः मनःसंस्कारः सांस्कृतिकं राष्ट्रियं चौक्यं प्रतिपाद्यते।

भारतस्य चतुर्षु पुण्यनगरेष्वायोज्यमानंकुम्भमहायोजनं भारतस्यैव नापितु समग्रविश्वस्याकर्षणकेन्द्रमिति। कोटिशः बालवृद्धनरनारीणां समुद्र उच्छलन्निव प्रतिभाति। कदायं महोत्सव आरम्भ इत्यत्र न प्रमाणं प्राप्यते किन्तु जनश्रुत्याधारे सप्तमशताब्द्यां महाराजहर्षवर्द्धनस्य शासनकालेवार्षिकमेलारूपेणास्योल्लेखः प्राप्यते। केचन विद्वांसः शङ्कराचार्येण भारतवर्षस्य सांस्कृतिकैक्यसंरक्षणार्थं माघमेलाप्रतिष्ठापनं कृतमिति स्वीक्रियते।केचन समुद्रमन्थनस्य प्रसिद्धाख्यानेन सह कुम्भमहोत्सवस्य सम्बन्धं प्रतिपादयन्ति। महाभारतस्यास्तीकपर्वणि विष्णुपुराणे श्रीमद्भागवतमहापुराणेऽन्यत्र चामृतप्राप्त्यर्थं समुद्रमन्थनस्याख्यानं प्राप्यते। ततोऽमृतप्राप्तिः दानवेन्द्रेणामृतहरणं विष्णुना युक्त्या तदपहृत्य देवेभ्यः पानायार्पणमित्याद्युल्लेख उपलभ्यते। एतेषु ग्रन्थेषु कथाक्रमे वैभिन्न्यं दृश्यते किन्तु क्वचिदप्यमृतकलशादमृतबिन्दु-निपातस्योल्लेखो न प्राप्यते। एतद्विज्ञैर्ज्ञायत एव। तस्मिन् विषये नात्र वक्तव्यम् पिष्टपेषणत्वात्।

अस्तु। मुण्डे मुण्डे मतिर्भिन्ना। यदा कदापि समुद्रमन्थनकथा देवैरमृतप्राप्तिः भारतवर्षस्य चतुर्षु स्थानेषु कुम्भकल्पना च सञ्जाता इति तथा महत्त्वपूर्णं न यथा तस्य मूले निहितः धार्मिकाध्यात्मिकसांस्कृतिकैकतासन्देशः। सन्दर्भेऽस्मिन् नैके बिन्दवः विचारणीयाः-

१.समुद्रमन्थनं नाम कालप्रभावात्प्रदूषितस्य समुद्रस्य कश्चित्शोधनाभियानं यस्मिन्नसुरस्वभावाः देवस्वभावाश्च मानवाश्च सम्मिलितरूपेण संलग्ना अभूवन्।

२.किं क्षीरसागरोऽन्तरिक्षीयसमुद्रो यत्र देवदैत्यस्वरूपाणामिष्टदुष्टग्रहाणां चङ्क्रमणेनान्तरिक्षजलस्य शुद्धिर्भवति।

३.अमृतं किमप्यपुनर्भवस्य (मोक्षस्य) हेतुः किमपि तत्त्वमुत वौषधीयगुणं दिव्यं स्वास्थ्यप्रदं जलम्।

४.कुम्भो द्वादशराशिषु मध्य एकादशराशिर्वा यस्य सम्बन्धोऽमृतकलसेन कुम्भोत्सवेन वा विद्यते। उल्लेखनीयमस्ति यदायुर्वेदे हृद्रोगप्रसङ्गेऽमृतकलसधरस्य पुरुषस्योल्लेखः प्राप्यते।

यदपि स्यात् किन्तु भारतीयजनमानसस्यास्थायाः प्रतीकः कुम्भमहोत्सवः (महाकुम्भः) राष्ट्रियैक्यस्यमनश्चित्तशरीरशोधनस्यायुष्यलाभस्य दैव्यासुरीप्रवृत्तीनां लोकानां मध्ये समन्वयस्य कश्चित्पर्यायः। एतस्य महोत्सवस्योद्देश्यमासेतुहिमाचलं पुण्यसलिलानदीनां पावनत्वं संरक्ष्यामेध्यपदार्थेभ्यः तत्तन्नदीजलस्य रक्षा सांस्कृतिकचेतनोन्नयनञ्चेति। शास्त्रोक्तस्नानधर्माचरणेन पर्यावरणस्य रक्षणं सर्वेषामस्माकं दायित्वमिति कृत्वा महाकुम्भे यथायोग्यं विधेयम्।

तृतीयपुटस्य शेषभागः

# पत्रे संस्कृतसंवादे कुम्भपर्व विशिष्यते

१९४२तमे ख्रीष्टाब्दे मदनमोहनमालवीयेन सह तात्कालिकवायसरायाख्य आङ्ग्लो लार्डलिनलियियो नामा वायुयानेन निरीक्ष्य मेलामवोचत् - एतन्मेलानिमन्त्रणपत्रप्रेषणे धनराशिव्ययो भूयानभवत्। एतत्संगठनकर्तारो कियद्द्रव्यव्ययमकार्षुरिति चिन्तनं दुश्शकमेव। प्रसिद्धचीनीयह्वेनसांगमतेन मेलापरम्परेयं चिरात्प्रचलिता नदीतटे। हर्षराजेन नृपेणात्र निजसम्पूर्णसञ्चितधनं प्रादायि। अंग्रेजयात्रिस्किनरमतेन नदीद्वयसङ्गमे धार्मिकमेला, यत्र न वस्तुक्रयविक्रयः, तत्र ध्यानप्रार्थनापवित्रस्नानवातावरणमेवासीत्। पुरोहितपण्डिताः तीर्थयात्रिणां शिक्षका इव बभूवुः। महामण्डलेश्वरजसदार्जागरिमते महानिर्वाणीअखाडाख्यक्षेत्रम् भारतीयहिन्दू-संस्कृतौ अपारशान्तिरेव. कुम्भस्तत्रामूल्यावसरो यत्र भारतीयाचार्योपदिष्टधर्मज्ञानविचारै-स्तावन्महान् कश्चिल्लाभो जायते। कर्ममुक्तिविषये किमपि ज्ञातुं वयमत्र समवेताः।

इत्थं कुम्भपर्वमहोत्सवोऽयं मन्ये विश्वस्यैक एव एतावान् विभिन्नधार्मिकसमाजानां विशालपरिमाणपर्यवसितो विचित्राध्यात्मिकसङ्गम एव लक्ष्यते। यस्य महिमा नानेन लेखमात्रेण गातुं शक्यते। अगाधसमुद्रवत् को नाम लघुनेत्राभ्यां द्रष्टुमर्हति पारे गन्तुं वार्हति चौतदिति। सन्ति मम कानिचन पद्यानि कुम्भमाश्रित्य निजभावनोद्गतानीमानि -

**कुम्भे साधुतपस्विनां गुणभृतां नागाख्यसंन्यासिनां**
**दूरादागतशैववैष्णवमहापीठेश्वराणां ध्रुवम्।**
**पुण्यश्लोकसुदर्शनेन गृहिणस्तृप्यन्तु चान्ये जनाः**
**श्रीनारायणसाधनादिभजनं गत्वा विदध्युः समे॥ १ ॥**

**प्रयागकुम्भे सुविशालतीर्थे कार्यक्रमाः संस्कृतदेववाण्या।**
**प्रादेशिकैश्शिक्षकसङ्घवर्गैरायोजनीया बहुशस्तथान्यैः॥ २ ॥**

**लोकाशापरिभोग्यजीवनमिदं द्रव्यप्रकर्षाश्रयं**
**प्रासादेन सुशोभितं परिकरैर्बद्धं च मायाप्रियम्।**
**वेदान्तं न हि पश्यतीह किमपि ग्राह्यं सुतत्त्वं तथा**
**तृष्णां कुम्भमहोत्सवे सुविमले त्यक्तुं ततो गम्यताम्॥ ३ ॥**

**गत्वा तत्र कृतं पुरात्र दुरितं प्रक्षालयेन्मानवो**
**गङ्गायामृतपानतो निजमनः संपावयेच्च प्रियम्।**
**दद्याच्चारु सुवस्त्रवित्तनिकरं भोज्यान्नवस्त्वादिकं**
**पुण्यायात्मविशुद्धये सुखगतिप्राप्त्यै सुपात्राय च॥ ४ ॥**

**आयान्तु पण्डितजना बहु धार्मिका ये**
**सन्तः सुयोग्यमनुजा इह कुम्भभूमौ।**
**गङ्गोदके सुरकृपामृतभक्तिपूते**
**संस्नान्तु पुण्यचरिता हरिसेवकास्ते॥ ५ ॥**

# संस्कृतवाङ्मये कुम्भवर्णनम्



-डॉ० राम विनय सिंह,
आचार्यः, संस्कृत-विभागः,
डी०ए०वी०(पी०जी०) कॉलेज,
देहरादूनम्, उत्तराखण्डम्।
९४१२९५३५६१.

कुं भूमिम् उम्भति पूरयति जलेन यः सः कुम्भ इत्यनया व्युत्पत्त्याऽभिधावृत्या कुम्भ इति पदस्यार्थः घटो भवति; किन्तु लाक्षणिकवृत्याऽस्यार्थो जायते ज्ञानघट इति। तादृशो हि ज्ञानघटो यः स्वीय- ज्ञानामृततारल्येन निखिलं जगत्प्रपूरयति सिञ्चति वा सः कुम्भः। अपरोऽयमर्थो दार्शनिकदृष्ट्या सर्वथा मान्यो विद्वद्रेण्यैः। संस्कृतसाहित्येऽन्यत्रापि विविधेष्वर्थेष्वस्य वस्य पदस्य प्रयोगो लभ्यते विविधप्रसङ्गेषु। मस्तकार्थेऽपि प्रयोगो दृश्यते-

**'मत्तेभकुम्भदलने भुवि सन्ति शूराः,**
**केचित्प्रचण्डमृगराजवधेऽपि दक्षाः।'**

इति भर्तृहरेः नीतिशतकीयप्रयोगः। कुम्भकर्णपुत्रस्यापि नामासीत्कुम्भ इति रामायणीयोक्तिः-

**'सुतोऽथ कुम्भकर्णस्य कुम्भः परमकोपनः।**
**अब्रवीत् परमक्रुद्धो रावणं लोकरावणम्॥'**

महाभारतानुसारेण प्रह्लादपुत्रोऽप्यासीत् कुम्भनामैव-

**'प्रह्लादस्य त्रयः पुत्राः ख्याताः सर्वत्र भारत!**
**विरोचनश्च कुम्भश्च निकुम्भश्चेति भारत!!'**

कुम्भपदं विष्णुपदवाच्यमपि वर्तते महाभारतदृशैव-

**'अर्चिशानर्चितः कुम्भो विशुद्धात्मा विशोधनः।'**

किमधिकं दोणद्वयपरिमाणमितेऽपि 'कुम्भ' इति पदप्रयोगो दृश्यते मनुस्मृत्यादिषु ग्रन्थेषु। ज्योतिषशास्त्रे द्वादशराशिमध्ये कुम्भराशिरिति नाम को न वेत्ति। योगशास्त्रेऽपि प्राणायामप्रसङ्गे 'कुम्भक' इति लभ्यत एव। एवं विज्ञायते यत् 'कुम्भ' इति पदस्य विविधार्थाः साहित्ये प्रसिद्धाः। वैदिकसाहित्ये प्रयुक्तं 'कुम्भ' इति पदं कलशवाचकमेव न पर्ववाचकम्। पुराणकाले पर्वरूपे विशेषतोस्य प्रसिद्धिरभवदिति मन्ये।

प्राक्तनकाले मुनिभिराचार्यैः ज्ञानविज्ञानप्रचार- प्रसाराय मुक्तिकामनया किंवा लोककल्याणभावनया गङ्गा-यमुना-गोदावरी-नर्मदा-शिप्रादीनां नदीनां पावने तटे बहूनि ज्ञानसत्राण्यायोज्यन्ते स्म। तत्र तैः ऋषिभिः क्वचित् ज्ञानचर्चा, क्वचिद्विमर्शः, क्वचिदायुर्वेदचर्चा, क्वचिच्च भगवद्भक्तिप्रसङ्गः क्रियन्ते स्म। प्रसङ्गेऽस्मिन्नेव प्रत्येकस्मिन्द्वादशे वर्षे कुम्भपर्वण आयोजनं लोके भवतीति मन्ये; आयोजनस्यैव महत्त्वाद्बृहत्त्वाच्च साम्प्रतमिदं पर्व 'महाकुम्भ' इति नाम्ना ख्यातं वर्तते। वेदादारभ्याद्यावधिपर्यन्तं समग्रे संस्कृतवाङ्मये कुम्भविषये विभिन्नानि तथ्यानि समवलोक्यन्ते। यद्यपि वैदिकवाङ्मये प्रायः सर्वत्रैव 'कुम्भ' इति पदं घटवाचकमेव तथापि तात्पर्यत्वेन मनुष्याणां दैहिकसन्तापमपाकरणाय ऐहिकामुष्मिक सुखसुसम्पादनायैव कुम्भ इति बोद्धव्यम्-

**'जघान वृत्रं स्वधितिर्वनेव रुरोज पुरो अरदन्न सिन्धून्।**
**विभेद गिरिं नवमिन्नकुम्भमागा इन्द्रो अकृणुत स्वयुग्भिः॥**

(ऋग्वेद - १०/८९/०७)

**युवं नरास्तुवते पज्रियाय कक्षीवते अरदतं पुरन्धिम्।**
**करोतराच्छफादश्वस्य वृष्णः शतं कुम्भां असिञ्चतं सुरायाः॥**

(ऋग्वेद - ०१/११६/०७)

**एवमेवाथर्ववेदेऽपि -**
**चतुरः कुम्भांश्चतुर्धा ददामि**

(अथर्ववेद- ०१/११६/०७)

**कुम्भीका दूषीकाः पीयकान्**

(अथर्ववेद-१६/०६/०८)

वैदिकवाङ्मयाद्व्यतिरिक्तं कुम्भपर्वणो माहात्म्यं सविशेषदृष्ट्या वेदव्यासमुनिप्रणीतेषु पुराणग्रन्थेषूपलभ्यते यत्र समुद्रमथनकाले निर्गतानां रत्नानां क्रम एवामृतस्यापि समुद्गमञ्जातम्। अमृतोद्गमकाले हि देवानां सङ्केतं सम्प्राप्येन्द्रपुत्रो जयन्तस्तममृतकलशमपहृत्य पलायितवान् किन्तु दैत्यैस्सः प्रयत्नेन धृतः। अनन्तरं देवदानवयोर्युद्धमभवदमृतकलशप्राप्त्यर्थं द्वादशदिनपर्यन्तम्। स्कन्दपुराणे एवमुक्तमस्ति-

**'कलशश्च समुद्भूतो धन्वन्तरिकरोल्लसन्।**
**मुखानतं सुधया पूर्णः सर्वेषां हि मनोहरः॥**
**अजितस्य पदाम्भोजकृपयैव समुद्गतम्।**
**क्षीराब्धिलोडनोद्भूतं कलशान्तेन्द्ररत्नकम्॥**
**चन्द्रः प्रस्रवणाद्रक्षां सूर्यो विष्फोटनाद्दधौ।**
**दैत्येभ्यश्च गुरुरक्षां सौरिर्देवेन्द्रजाद् भवात्॥**

अस्मिन्नेवाहवप्रसङ्गे पृथिव्यां प्रयाग- हरिद्वार-उज्जयिनी-नासिकप्रभृतिषु चतुर्षु स्थानेषु अमृतकुम्भादमृत बिन्दनोपतन्-

**'पृथिव्यां कुम्भयोगस्य चतुर्धा भेद उच्यते।**
**चतुःस्थले निपतनात्सुधाकुम्भस्य भूतले॥'**

देवलोकेप्यष्टस्थानेष्वमृतनिपातोभवदिति पुराणकारो विवृणुते स्कन्दपुराणे-

**'अष्टौ लोकान्तरे प्रोक्ता देवैर्गम्या न चेतरे।'**

अमृतपतनपवित्रत्वादेवेमानि स्थानानि पवित्रत्वं लेभिरे, कुम्भक्षेत्ररूपे जगति विख्यातानि च बभूवुः। देवानां दिनमेकं मानवानां वर्षमेकं भवति। अतो देवानां द्वादशदिवससमत्वादेव कुम्भस्यायोजनं लोके द्वादशवर्षोपरान्तमेव भवतीति प्रसिद्धम्-

**'देवानां द्वादशाहोभिर्मर्त्यैं द्वादशवत्सरैः।**
**जायन्ते कुम्भपर्वाणि तथा द्वादशसंख्यया॥'**

एवं चतुर्षु स्थानेषु कुम्भपर्वण आयोजनं भवति सूर्यचन्द्रबृहस्पतिसंयोगेभ्यो भूतले, देवलोके भवति नो वा न वेद्मि। शास्त्रीयं प्रमाणमन्वेष्टव्यमिदानीम्। ज्योतिषशास्त्रदृष्ट्या प्रदत्तोयं निर्देशस्साम्प्रतं सम्मान्यो नात्र कोपि विप्रतिपत्तिः-

**'सूर्येन्दुगुरुसंयोगः तद्राशौ यत्र वत्सरे।**
**सुधाकुम्भप्लवे भूमौ कुम्भो भवति नान्यथा॥'**

समेषामेतेषां कुम्भपर्वणां स्थानदृष्ट्या वैशिष्ट्यमेवं विचारयितुं शक्यते पृथक्-पृथक्-

१. हरिद्वारकुम्भवैशिष्ट्यम् - स्कन्दपुराणानुसारेण कुम्भराशिस्थिते गुरौ मेषराशिस्थिते च सूर्ये हरिद्वारे कुम्भपर्व भवति-

**'पद्मिनी नायके मेषे कुम्भराशिगते गुरौ।**
**गङ्गाद्वारे भवेद्योगः कुम्भनामा तदोत्तमः॥**
**वसन्ते विषुवे चैव घटे देवपुरोहिते।**
**गङ्गाद्वारे च कुम्भाख्यः सुधामेति नरो यतः॥'**

अत्र कुम्भपर्वणि गङ्गाजलस्नानेन दुःखत्रयाभिघातान्निवृतिर्जायते जनानां तापत्रयाणामपि समूलोच्छेदनपुरस्सरं सर्वाभीष्टसिद्ध्योऽपि जायन्ते नात्र काचन संशीतिभीतिः-

**'तान्येव यः पुमान् योगे सोऽमृतत्वाय कल्पते।**
**देवा नमन्ति तत्रस्थान् यथा रङ्का धनाधिपान्॥'**

एवमपि व्यनक्ति पुराणकारो यद् ये भक्ताः कुम्भयोगे गङ्गाद्वारे हरिद्वारे कुशावर्त-बिल्वकेश - नीलपर्वत - कनखल- प्रभृतिषु तीर्थेषु स्नात्वा पूजनं दानं च कुर्वन्ति ते नूनमेव संसारचक्रं विहाय मोक्षस्थानं लभन्ते-

**'गङ्गाद्वारे कुशावर्ते बिल्वके नीलपर्वते।**
**स्नात्वा च कनखले तीर्थे पुनर्जन्म न विद्यते॥**
**कुम्भयोगे हरिद्वारे इह स्नानेन यत्फलम्।**
**नाश्वमेधसहस्रेण तत्फलं लभते भुवि॥'**

सूर्यं प्रति सम्बोध्य मयैव कानिचित्पद्यानि व्यरचिषत हरिद्वारकुम्भमभिलक्ष्य-

**'कुम्भोत्सवोऽस्ति भुवि भव्यतमोऽशुमालिन्!**
**दिव्या कथा रसमयी सरतीह नित्यम्।**
**गङ्गातरङ्गसितपुण्यपुरीं प्रसन्ना-**
**मासाद्य मज्जनसुखं कुरु सुप्रभातम्॥**
**तेजोधनास्सविभवा ऋषयो गिरिस्थाः**
**भूमावतीर्य पदपांशुफलप्रदातुम्।**
**मायापुरीमधिवसन्ति जगद्धिताय**
**'एह्येहि सूर्य! कुरु सिद्धतपः प्रभातम्॥**
**नीलाद्रिपादमभिसिञ्चति नीलधारा**
**सारांशमेत्य गिरिराजहिमालयस्य।**
**ब्रूते स्वरूपमपि बन्धनमुक्तिगत्योः**
**प्रातः शृणुष्व गुणवन्! कुरु सुप्रभातम्॥'**

**२.प्रयागकुम्भवैशिष्ट्यम्** - अमावस्यायां यदा गुरुः वृषभराशिस्थितो भवेत् सूर्यचन्द्रौ मकरस्थितौ च भवेतां तदा तीर्थराजप्रयागे कुम्भयोगो भवतीति विवनक्ति वेदव्यासः-

**'मेषराशिगते जीवे मकरे चन्द्रभास्करौ।**
**अमावस्या तदा योगः कुम्भाख्यस्तीर्थनायके॥'**

एवं विज्ञायते यत्कुम्भो नाम योगो भवति न पर्वोत्सवो वा। योगत्वादेव पर्वत्वं उत्सवत्वं वा भवति। अत्र वास्तवरूपेण मकरसङ्क्रान्ति-अमावस्या-वसन्तपञ्चमीति त्रयाणां दिवसविशिष्टानां संयोगत्वमेव पूर्णकुम्भत्वम्। अतएव एतेषु दिवसेषु स्नानदानसपर्यादिकविधानमेव प्रामुख्यं भजते। प्रायो विदन्त्येव विद्वांसो यत्मकरसङ्क्रान्तिकाले अस्मिन्महाकुम्भपर्वणि तीर्थनायके स्नानदानस्य माहात्म्यं समधिकमेव वर्तते। भट्टोजीप्रणीतत्रिस्थलीसारसङ्ग्रहे सङ्कलितऋग्वेदपठितमन्त्रदृशा गङ्गायमुनयोस्सङ्गमे स्नानस्य महत्त्वं किञ्चिदलौकिकमेव-

**'सितासिते सरिते यत्र सङ्गते तत्राप्लुतासो दिवमुत्पतन्ति।**
**ये वै तन्वं विसृजन्ति धीरास्ते जनासो अमृतत्वं भजन्ते॥'**

महाभारतेप्यनुशासनपर्वणि तीर्थराजप्रयागे माघमासे स्नानमाहात्म्यं सर्वथा नैर्मल्यकारकं स्वर्गप्रदायकञ्च वर्तते-

**'दशतीर्थसहस्राणि तिस्रः कोट्यस्तथापराः।**
**समागच्छन्ति माघ्यां तु प्रयागे भरतर्षभ॥**
**माघमासं प्रयागे तु नियतः संशितव्रतः।**
**स्नात्वा तु भरतश्रेष्ठ निर्मलः स्वर्गमाप्नुयात्॥'**

एवमेव मत्स्य-कूर्म-नारद-अग्नि-ब्रह्म-नरसिंह-पद्मादिषु पुराणेष्वपि नैकानि पद्यानि विलिखितानि समुपलभ्यन्ते यत्र प्रयागराजस्थत्रिवेणिसङ्गमे माघोपलक्षितकुम्भपर्वणि स्नानदानादिशुभकर्मविशिष्टं लौकिकालौकिकञ्च पुण्यार्जनं क्रियन्ते तपःपरायणैर्भक्तैः।

कश्चन भक्तः सहस्रधा कार्तिकस्नानं करोति शतधा माघस्नानं करोति, वैशाखे कोटिधा च नर्मदास्नानं करोति : किन्तु यदि स एकवारं प्रयागे कुम्भस्नानं करोति तदा फलं सदृशमेव।

अत्रसहस्राश्वमेधयज्ञसमं शतवाजपेययज्ञसमं लक्षभूमिप्रदक्षिणसमं कुम्भस्नानफलमिति विचार्यास्माभिर्नूनमेव प्रयागे स्नात्वा स्वकीयं जीवनं धन्यं करणीयम्। पुराणवचनमस्ति यत -

**'सहस्रं कार्तिके स्नानं माघे स्नानशतानि च।**
**वैशाखे नर्मदा कोटिः कुम्भस्नानेन तत्फलम्॥**
**अश्वमेधसहस्राणि वाजपेयशतानि च।**
**लक्षं प्रदक्षिणा भूमेः कुम्भस्नानेन तत्फलम्॥'**

यथा अ-उ-म इति वर्णानां संयोगादोङ्कारो जायते तथैव गङ्गा-यमुना-सरस्वतीनां संयोगात् सम्भवति प्रयागः। प्रयागे ब्रह्मा-विष्णु महेशादयो देवाः, सिद्ध- गन्धर्व- किन्नरादयो देवयोनिविशिष्टाः, ब्रह्माण्डे दृश्यादृश्यरूपे विद्यमानाः परमर्षयः परमहंसाः योगिनोवधूताश्च शरीरिणो कुम्भामृतलाभाय समायान्तीति नात्र कश्चन सन्देहः। वर्षेऽस्मिन्नपि भारतवर्षे तीर्थराजप्रयागे वर्षन्त्यहर्निशं तपःपूतानां ऋषीणां ज्ञानामृतधाराः लोकोपकाराय। कुम्भोत्सवे समागतानां भक्तानां पङ्क्तीर्विलोक्य मादृशोऽतिसामान्यः कविः किं कवत इति पुनरवेक्ष्य सूर्यव्याजेनैव-

**'सोपानपङ्क्तिरिव निश्छलभक्तपङ्क्तिः**
**स्नात्वा सुखेन मनसाञ्चितभक्तिपङ्क्तिः।**
**मौनन्निमील्य निजनेत्रविशेषपङ्क्ती-**
**र्ध्यायत्यहस्कर ! कुरुश्व नवप्रभातम्॥'**

**३.अवन्तिकाकुम्भवैशिष्ट्यम्** - कनकशृङ्गा-कुशस्थली-पद्मावती-कुमुद्वती-उज्जयिनी-विशाला-अमरावती-प्रभृतिभिः नामभिराख्याताऽवन्तिकानगरी भुवो नाभिभूतेव राराज्यते। सप्तपुर्षु परिगणितेयं महाकालपुरी कुम्भस्नानार्थमपि जगति प्रसिद्धा। पुण्यप्रदायां शिप्रायां स्नात्वा कुम्भपर्वणि ये हि भक्ताः महाकालदर्शनं कुर्वन्ति तेऽवश्यमेव शिवसायुज्यं प्राप्नुवन्ति-

**'स्नानं कृत्वा नरो यस्तु महानद्यां हि दुर्लभम्।**
**महाकालं नमस्कृत्य नरो मृत्युं न शोचयेत्॥**
**मृतः कीटपतङ्गो वा रुद्रस्यानुचरो भवेत्॥'**

अथ च-

**'महाकालस्य तल्लिङ्गं यैर्दृष्टं कष्टभिः क्वचित्।**
**न स्पृष्टास्ते महापापैर्न दृष्टास्ते यमोद्भटैः॥'**

**४. नासिककुम्भवैशिष्ट्यम्**- गोदावरीतटे संस्थिते नासिके कुम्भपर्व तदा भवति यदा बृहस्पतिः सिंहराशिस्थः सूर्यश्च सिंहराशिस्थ एव भवति। शिवपुराणानुसारेण एवमस्त्युद्घोषः-

**'तद्दिनं हि समारभ्य सिंहस्थे च बृहस्पतौ।**
**आयान्ति सर्वतीर्थानि क्षेत्राणि दैवतानि च॥**
**सरांसि पुष्करादीनि गंगाद्यस्सरितस्तथा।**
**वासुदेवादयो देवाः सन्ति वै गौतमीतटे॥'**

ब्रह्मवैवर्तपुराणेऽप्येतादृगेव माहात्म्यं वर्णितमस्ति-

**'षष्ठिवर्षसहस्राणि भागीरथ्यावगाहनम्।**
**सकृद् गोदावरी स्नानं सिंहस्थे च बृहस्पतौ॥'**

नासिकनामकं स्थानमिदं पञ्चवटीनाम्नोऽपि ख्यातमस्ति लोके। इयं हि गोदावरी गौतमीरूपे ख्यातास्ति। यथा संसारे गङ्गा पतितपावनी पवित्रतोया मन्यते तथैव गौतमतपःपरिपूतेयमपि लोकेऽघनाशिनीव पूज्यते। अत्र कुम्भावसरे गोदावर्य्यां स्नात्वा जनाः परमलोकं प्राप्नुवन्ति।

अन्ततो वक्तुमीहे यद्भारतवर्षे नूनमेवास्य कुम्भपर्वणो वैशिष्ट्यं लोकसाधनार्थं परलोकसिद्ध्यर्थञ्च वर्तते नास्ति संशीतिलवोऽपि। शङ्कराद्दिभिराचार्यैः कुम्भोत्सवोऽयं योगकल्प इति स्वीकृतो यो हि विविधग्रहसंयोगादेवसम्भवति-

**'गङ्गाद्वारे प्रयागे च धारा गोदावरीतटे।**
**कुम्भाख्यो यस्तु योगोऽयं प्रोच्यते शङ्करादिभिः॥'**

इति शम्

# 'द्वादशकुम्भतीर्थानि'

-प्रोफेसर वैद्यनाथ मिश्रः
विश्वविद्यालयाचार्यः, पूर्व -विभागाध्यक्षश्च
जयप्रकाशविश्वविद्यालयः छपरा, बिहार।



आसन्नमहाकुम्भपर्वयोगमालक्ष्य सम्प्रति विद्वत्सु ,श्रद्धालुषु, जिज्ञासुषु च कुम्भयोगस्य रहस्यं ज्ञातुं महती उत्कण्ठा जागर्ति। एष महाकुम्भयोगः भारतीय- सनातन ज्ञानसाधनापरम्पराया महनीयामृतयोगो वर्तते, यो हि ज्योतिष- धर्मशास्त्र -पुराणकथा त्रिवेणीद्वारा सम्बद्धो दृश्यते।अस्मिन् लघुनिबन्धे भारतवर्षस्य द्वादशस्थानेषु कुम्भतीर्थत्वं प्रमाणपुरस्सरं निरूप्यते सविनयम्।कुम्भशब्दःकुं=पृथ्वीम् उम्भति पूरयति इत्यर्थे उम्भधातोःकृते अच्प्रत्यये सिद्ध्यति।कुम्भःघटः कलशः

परिमाणविशेषः, गुग्गुलुः, श्वासरोधप्राणायामःएकादशराशिचेत्यादीन् अर्थान् बोधयति सामान्यतः। किन्तु सम्प्रति कुम्भःदेवैःअसुरैश्च अनुष्ठितात् समुद्रमन्थनात् समुत्पन्नस्य अमृतकलशस्य बोधं कारयति।

अत्र जिज्ञासा भवति यत् कुत्र समुद्रमन्थनम् इति अनुष्ठानं सम्पादितम? अस्मिन् प्रसङ्गे वाल्मीकिरामायणस्य बालकाण्डस्य प्रसङ्गो द्रष्टव्योऽस्ति।तत्र श्रीरामलक्ष्मणौ महर्षिणा विश्वामित्रेण सह गङ्गामुत्तीर्य विशालापुरीं प्राप्तवन्तौ । श्रीरामःरम्यां विशालां वीक्ष्य गुरुं विश्वामित्रं पृच्छति यत् केयं विशाला? किं चेतस्या महत्त्वम्? ततः विश्वामित्रः श्रीरामं सम्बोधयन् अकथयत्-

**'श्रूयतां राम शक्रस्य कथां कथयतःश्रुताम।**
**अस्मिन् देशे हि यद्वृत्तं शृणु तत्त्वेन राघव।।**
**पूर्वं कृतयुगे राम दितेः पुत्रा महाबलाः।**
**अदितेश्च महाभागा वीर्यवन्तःसुधार्मिकाः।।**
**ततस्तेषां नरव्याघ्र बुद्धिरासीन् महात्मनाम्।**
**अमरा विजराश्चैव करे स्यामो निरामयाः।।**
**ततो निश्चित्य मन्थनं योक्त्रं कृत्वा तु वासुकिम्।**
**मन्थानं मन्दरं कृत्वा ममन्थुरमितौजसः।।**
**उत्पपाताग्निसङ्काशं हालाहलमहाविषम्।**
**येन दग्धं जगत्सर्वं सदेवासुरमानुषम्।।**

ततः

**हालाहलं विषं घोरं सञ्जग्राहामृतोपमम्।**
**देवान् विसृज्य देवेशो जगाम भगवान् हरः।।**

अर्थात् पुरा सत्ययुगे मिथिलायां दैत्या देवाश्च अमरत्वाय अजरत्वाय नैरुज्याय,बलवीर्यलाभाय च मन्दारपर्वतं मन्थानं ,वासुकिनागं च मन्थनरज्जुं कृत्वा समुद्रमन्थनम् आरब्धवन्तः। अस्मिन् प्रसङ्गे मन्दारपर्वतःपातालं प्राविशत्, तदा भगवान् विष्णुःकच्छपरूपमास्थाय मन्दारपर्वतं स्वपृष्ठे स्थिरम् अकरोत्। ततः पुनः समुद्रमन्थनं समारब्धमतत्र क्रमशःआयुर्वेदधरो धन्वन्तरिः,अप्सरसः,वारुणी उच्चैःश्रवा, कौस्तुभञ्च प्रादुर्बभुवुः। ततःदिव्यममृतं प्रकटीभूतम्।

'उदतिष्ठन्नरश्रेष्ठ !तथैवामृतमुत्तमम्' (वा रा१/४५/३९

अमृतस्य कृते देवदानवयोर्मध्ये त्रिलोकमोहकारकं भयङ्करं कुलक्षयङ्करं च युद्धं प्रावर्तत।यदा देव-दानवसमूहःक्षयं गतः।तदा भगवान् विष्णुःमायां मोहिनीरूपमाधाय अमृतमपाहरत्। ये केचन बलोन्मत्ता अमृतं हर्तुं विष्णोः समक्षं समायाताःते सर्वे विष्णुना

युद्धे चूर्णीकृताः। एवं दैत्यान् निहत्य स्वर्गं सुखं शास्तुं प्रवृत्तः।

अत्र अवधेयं यत् गङ्गामुत्तीर्य विशालापुरीं समागत्य तत्सम्बद्धा कथा महर्षिणा विश्वामित्रेण श्राव्यते तत्र समुद्र मन्थनस्य स्थानं 'विशाला' इति कथ्यते या रामायणकाले 'मिथिलापरिवेशिनी' आसीत्। मिथिला विशाला उभे तीरभुक्तिरूपेणापि परिकीर्तिते स्तः। अस्मिन् प्रसङ्गे 'रुद्रयामलोक्तामृतकरणप्रयोग' इति ग्रन्थःद्रष्टव्यः।--

**आर्यावर्तस्य पूर्वस्यां समुद्रोऽस्ति सनातनः।**
**हिमवद्वनपर्यन्तं विस्तिरोऽभूत् कृते युगे।।**
**तस्योत्तरस्मिन् पुलिने गङ्गासागरसङ्गमः।**
**ततोऽप्यनतिदूरे वै मम स्थानं सनातनम्।।**
**जाह्नव्या दक्षिणे भागे मन्दारकुसुमैर्युतः।**
**यत्र वृक्षकृतच्छाये साक्षान् नारायणः स्वयम्।।**
**मन्दारस्य गिरेः पार्श्वे पुरा सिन्धुर्बभूव ह।**
**जाह्नवी चापि तत्रैव संगता सागरं प्रति।।**
**मुरारिचरणाज्जाता गच्छन्ती चोतरां दिशम्।**
**जाह्नवी सा महापुण्या विशिष्टा शाल्मलीवने।।**
**तत्रैव कमठपृष्ठे दण्डं संस्थाप्य पर्वतम्।**
**मन्दारं शेषनागं च रज्जुं कृत्वा सुरासुराः।।**
**ममन्थुः सागरं सर्वे विष्णुं कृत्वा तु सन्निधौ।**
**अमृतैकान्तचित्तस्तु ममन्थुः सागरं शुभे।।**
**ततोऽमृतघटं धृत्वा भासयन् तेजसा ।। ध्रुवम्।**
**आविर्बभूव सहसा देवि धन्वन्तरिःपुमान्।।**
**त्रयोदश्यां कृष्णपक्षे तुलार्के च शुभे दिने।**
**कार्तिके मासि सूर्यश्च तुलारूढो यदा भवेत्।।**
**चन्द्रोऽपि देवकार्यार्थमसिते मम वासरे।**
**गुरावपि तुलारूढे पिबन्त्यमृतमक्षयम्।।**

(रुद्रया,१४,१५,२०,२६,४३,२७,२८पूर्वार्ध,३९,४०,८८उत्तरार्ध८ चम्मच९.उक्तप्रमाणैः सिद्धं भवति यत् कार्तिकमासस्य कृष्णपक्षस्य त्रयोदशी -चतुर्दशीतिथ्योः : सूर्य- चन्द्र- गुरुयोगे शाल्मलीवने (सिमरिया-घाट) क्षीरसागरमन्थनं तथा च अमृतस्य प्राप्तिरभवत्।उक्तशाल्मलीवनं वर्तमान विहार राज्यस्य बेगुसरायमण्डलान्तर्गते सिमरियाघाट इति स्थाने गङ्गाया उत्तरभागे मन्यते।शाल्मली एव सिमरिया समेरिया चादिरूपेण विकसिता अस्ति।अस्य क्षेत्रस्य समुद्रत्वमपि भूगर्भवैज्ञानिकैःस्वीक्रियते। एतस्मात् स्थानात् दक्षिणभागे बांका -बौंसी -क्षेत्रे मन्दारपर्वतोऽपि सर्वस्वीकृतो विराजते। वर्तमानझारखंडप्रान्ते सन्थालपरगनामण्डले दारुकवने वासुकीनागेन संस्थापितवासुकीनाथमहादेवोऽपि पूज्यमानो विद्यते। जनकपुरात् उत्तरदिशि जूटा पोखर इति नाम्ना प्रसिद्धा पुष्करणी वर्तते यत्र विषपानानन्तरं नीलकण्ठमहादेवस्य विश्रामालयो विराजते।अहल्यास्थानसमीपे ब्रह्मपुरे ड्रामे गौतमकुण्डःक्षीरोदकी नदी (खिरोईनदी) वर्तमाननेपालस्य सागरमाथा- मण्डले बलिराजगढःचेत्यादीनां स्थितिः समुद्रमन्थनसम्बद्धतत्त्वानि प्रमाणयति। अस्मिन् सम्बन्धे डॉ रामकिशोर झा 'विभाकरस्य मधुस्राविणीमीमांसा, डॉ विद्येश्वरझाप्रभृतिभिःसम्पादितः रुद्रयामलोक्तामृतीकरणप्रयोगः, डॉ विजय कुमार झा सम्पादितः सिमरियाकुम्भदर्पणः, गोरक्षपुर- गीता -प्रेस -प्रकाशितस्य कल्याणस्य वाराहपुराणाङ्कः चादयो ग्रन्था अवलोकनीयाःसन्ति।

अथ अमृतपानाय देवासुर- संग्रामे यत् आक्रमणप्रत्याक्रमणादिकं समारब्धं तत्र सूर्यचन्द्रगुरवः अमृतकुम्भस्य रक्षां कुर्वन्तः एकादशवर्षाणि यावत् एकादशस्थानेषु -कामाख्या-पुरुषोत्तमक्षेत्र-गङ्गासागर-प्रभृतिषु अमृतकुम्भं संरक्षितवन्तः। द्वादशे वर्षे पुनःअस्मिन्नेव शाल्मलीवने च (सिमरिया घाट)भगवतो विष्णोः मोहिनीरूपप्रभावेण देवाः कार्तिककृष्णामावस्यायां तिथौ अमृतपानं कृतवन्तः। अस्मिन् प्रसङ्गे रुद्रयामलोक्तामृतकरणप्रयोगः द्रष्टव्यः-

**एतस्मिन्नन्तरे काले विष्णुर्नारायणः स्वयम्।**
**मोहिनीरूपमास्थाय ययौ दैत्यान् विमोहितान्।।**
**तं सम्मान्य तथा दैत्यराजो बलिरुवाच ह।**
**सुधा त्वया विभक्तव्या सर्वेषां सममेव च।।**
**अत्रैव जाह्नवीतीरे ह्युत्तरे तु महद्वनम्।**
**शाल्मल्याःशोभते देवि गङ्गा चोत्तरवाहिनी।।**
**पुलिने तत्र पपुर्देवा स्नात्वा सुविमले जले।।**

(रु,या,श्लो६१,६४,८७,८८पू,)

धर्मसम्राट् -परमहंसः स्वामी करपात्रिमहोदयोऽपि स्वकुम्भपर्वनिर्णयनामके पुस्तके द्वादशकुम्भतीर्थानि पर्वाणि समुल्लिखति-

**देवानां द्वादशाहोभिर्मार्त्यैर्द्वादशवत्सरैः।**
**कुम्भपर्वाणि जायन्ते तथा द्वादशसंख्यया ।।**

(कुम्भपर्वनिर्णयःपृष्ठ-२२)उक्तद्वादशकुम्भस्थानपर्वसम्बन्धे रुद्रयामलोक्तामृतीकरणप्रयोगः ग्रन्थो विस्तरेण विवृणोति---

**देवाश्चागत्य मज्जन्ति तत्र मांस वसन्ति च।**
**तस्मिन् स्नानेन दानेन पुण्यमक्षयमाप्नुयात्।।**
**सिंहे युतौ तु रेवायां मिथुने पुरुषोत्तमे।**
**मीनभे ब्रह्मपुत्रे च तव क्षेत्रे वरानने।।**
**धनूराशिस्थिते भानौ गङ्गासागरसङ्गमे।**
**कुम्भराशौ तु कावेर्यां तुलार्के शाल्मली वने ।।**
**वृश्चिके ब्रह्मसरसि कर्कटे कृष्णशासने।**
**कन्यायां दक्षिणे सिन्धौत यत्राहं रामपूजितः।।**
**अथाप्यन्योऽपि योगोऽस्ति यत्र स्नानं सुधोपमम्।**
**मेषराशिस्थिते भानौ कुम्भे चौव गुरौ स्थिते।।**
**गङ्गाद्वारे भवेद्योगो भुक्ति- मुक्तिप्रदःशिवे।**
**मेषे गुरौ तथा देवि मकरस्थे दिवाकरे।।**
**त्रिवेण्यां जायते योगःसद्योऽमृतफलं भवेत्।**
**शिप्रायां मेषगे सूर्ये सिंहस्थे च वृहस्पतौ।।**
**मासं यावन्नरःस्थित्वाऽमृतत्वं याति दुर्लभम्।**

(रु या,श्लो-१२२-१२८)

कथनस्य तात्पर्यमस्ति यत् उपर्युक्त -सूर्य- चन्द्र- गुरुयोगात् सिंहराशिस्थिते सूर्ये महाराष्ट्रस्य नासिकनगरे,मिथुनार्के पुरुषोत्तम जगन्नाथधाम्नि(उत्कलप्रान्ते), मीनार्के ब्रह्मपुत्रतटे कामाख्यातीर्थे (असमप्रदेशे),धनूराशिगते सूर्ये गङ्गासागरतीर्थे (वङ्गप्रान्ते),कुम्भस्थिते सूर्ये तमिलनाडुराज्ये कुम्भकोणम् इतिस्थाने, तुलार्के विहार -राज्यस्य बेगुसरायमण्डलान्तर्गते सिमरियाघाट इति स्थाने गङ्गाया उत्तरभागे शाल्मलीवने, वृश्चिकगते सूर्ये ब्रह्मसरोवरे कुरुक्षेत्रे(हरियाणा), कर्कराशिस्थिते सूर्ये द्वारिकापुर्याम् (गुजरात- राज्ये), कन्या -राशिगते सूर्ये सेतुबंधे रामेश्वरम् इति स्थाने,मेषार्के कुम्भराशिस्थिते गुरौ हरिद्वारे, मकरराशिगते सूर्ये तथा मेष राशिगते गुरौ च प्रयागे त्रिवेणीसंगमे,मेषार्के सिंहस्थगुरौ च शिप्रा तटे उज्जयिन्यां मध्यप्रदेशे कुम्भयोगो भवति। एषु द्वादशतीर्थस्थानेषु अमृतघटसंयोगेन जलम् अमृतमयं जायते।फलतः अत्र स्नानं,जपः पूजा,दानं,तर्पणः, सेवा,सत्संगः चादिसत्कर्माणि महापुण्यदायकानि भवन्ति।इदं सत्यं यत् सम्प्रति भारतवर्षे चतुर्षु स्थानेषु एव कुम्भस्य आयोजनं भवति । किन्तु सिमरिया -घाट विहारे प्रतिवर्षं तुलार्के कार्तिकमासे कल्पवासःतथैव परम्परया आयोज्यते यथा प्रयागराजे मकरार्के प्रतिवर्षं कल्पवास आयोजितो भवति। विगतवर्षेषु तत्र

# कुम्भोत्सवस्य पौराणिकं महत्त्वम्

प्रो माधवजनार्दनरटाटे,
अध्यक्षः, धर्मशास्त्रमीमांसाविभागः,
संस्कृतविद्याधर्मविज्ञानसंकायः,
काशीहिन्दूविश्वविद्यालयः, वाराणसी



पुराकाले अमृतलब्धये देवासुरयोः सन्धिः जातः। तावुभौ सम्भूय क्षीरोदधिं ममन्थतुः। ततः अमृतकलशं गृहीत्वा देववैद्यः धन्वन्तरिः निरगच्छत्। अमृताय देवदैत्ययोः मध्ये आयोधनं जातम्। तस्मिन्नायोधने चतुर्षु स्थलेषु कुम्भः स्थापितः- हरिद्वारे, प्रयागे, नाशिके, उज्जयिन्याम् च। वस्तुतस्तु अयं विवादः देवगणनया द्वादशदिनं यावत् जातः। परन्तु मनुष्यगणनया तु दैवैकदिनम् एकवर्षमिति कृत्वा प्रतिस्थलं प्रतिद्वादशवर्षाण्यनन्तरं एतेषु चतुर्षु स्थलेषु कुम्भोत्सवः आयोज्यते।

**विवादे काश्यपेयानां यत्र यत्रावनिस्थले।**
**कलशोऽभ्यपतद्यत्र कुम्भपर्व तदुच्यते।।**
**देवानां द्वादशाहोभिः मर्त्यैर्द्वादशवत्सरैः।**
**जायन्ते कुम्भपर्वाणि तथा द्वादशसंख्यया।।**

गंगाद्वारे प्रयागे च धारा गोदावरीतटे। कलशाख्यो हि योगोऽयं प्रोच्यते शंकरादिभिः।।

(१) गंगाद्वारे (हरिद्वारे), (२) प्रयागे, (३) धारायां (उज्जयिन्यां), (४) गोदावरीतटे (नाशिके)- इत्यत्र प्रतिवर्षत्रयं भिन्नभिन्नस्थलेषु कुंभयोगो भवति। आहत्य एकत्र द्वादशवर्षानन्तरं योगो भवति, प्रतिवर्षत्रयानन्तरं अन्यस्थलेषु योगो भवति।

देवदैत्ययोः युद्धे यदा भूमौ सुधाकुम्भः अपतत्, तदा यस्मिन् राशौ सूर्यगुरुचन्द्राणां संयोगः आसीत्, स योगो यदा आगच्छति, तदा कुम्भपर्व भवति -

**सूर्येन्दुगुरुसंयोगस्तद् राशौ यत्र वत्सरे।**
**सुधाकुम्भप्लवे भूमौ कुम्भो भवति नान्यथा।।**

'कुत्र कस्मिन् समये च कुम्भोत्सवः भवन्ति?' एतस्मिन् विषये कथितम्-

**पद्मिनीनायके मेषे कुम्भराशिगते गुरौ।**
**गंगाद्वारे भवेद्योगः कुम्भनामो यदोत्तमः ।।**
**मकरे च दिवानाथे वृषराशिस्थिते गुरौ।**
**प्रयागे कुम्भयोगोऽयं माघमासे विधुक्षये ।।**
**सिंहे गुरौ तथा सूर्ये सिंहे चौव निशाकरे ।**
**तदाऽमायां स धारायां कुम्भो भवति मुक्तिदः।।**
**कर्के गुरुस्थता भानुश्चन्द्रश्चन्द्रक्षयो यदा ।**
**गोदावर्यां तदा कुम्भो जायतेऽवनिमण्डले ।।**
**कुम्भस्नानस्य माहात्म्यं च उच्यते-**
**सहस्रे कार्तिके स्नानं माघे स्नानशतानि च।**
**वैशाखे नर्मदास्नानं कुम्भस्नानेन तत्फलम्।।**
**अश्वमेधसहस्रेभ्यो वाजपेयशतादपि।**
**पृथिवीदानलक्षाच्च कुम्भयोगो विशिष्यते।।**

एतेषु चतुर्षु स्थलेषु प्रयागराजस्येत्थं माहात्म्यं वर्तते -

**त्रिवेणीं माधवं सोमं भारद्वाजं च वासुकिम्।**
**वन्देऽक्षयवटं शेषं प्रयागं तीर्थनायकम्।।**
**श्रवणात् तस्य तीर्थस्य नामसंकीर्तनादपि ।**
**मृत्तिकालम्भनाद्वापि नरः पापात् प्रमुच्यते।।**
**गंगा च यमुना चौव पुण्यतोया सरस्वती।**
**यत्र संमिलिताः सर्वाः प्रयागो भुवि विश्रुतः।।**

प्रतिवर्षं माघे स्नानं मासं यावत् कल्पपालनं च बहुलाभप्रदं भवति इति कथ्यते । अत्र गंगायाः यमुनायाश्च सङ्गमः अस्ति तथा च गुप्ततया सरस्वती अपि संगच्छते, एषा त्रिवेणी उच्यते। सरस्वती ज्ञानमूर्तिः, गंगा भक्तिमूर्तिः, यमुना कर्ममूर्तिः। एवं कर्मभक्तिज्ञानसङ्गमः इह भवति। सूतसंहितायामपि उक्तम्-

**प्रयागाख्यं महातीर्थं भवरोगस्य भेषजम् ।**
**भरण्यां कृत्तिकायां तु रोहिण्यां वा विशेषतः।।**
**तत्र स्नात्वा रवौ मेषे वर्तमाने मुनीश्वराः ।**
**यथाशक्ति धनं दत्त्वा विमुक्तो मानवो भवेत् ।।**

प्रयागे कुम्भपर्वणि विभिन्नेभ्यो मठाश्रमेभ्यो संन्यासिनो नागासाधवश्च स्नानाय आगच्छन्ति, ये भक्तजनानां श्रद्धाधामानि आकर्षणबिन्दवश्च भवन्ति।

अर्धकुम्भस्य महाकुम्भस्य च सफलमायोजनं सम्पन्नम्। सम्प्रति प्रयागराजमहाकुंभस्य आयोजनानन्तरं मिथुनार्के आषाढमासे पुरुषोत्तमक्षेत्रे (जगन्नाथपुरीक्षेत्रे)आंग्लतिथ्यनुसारं १५.६.२०२५ततः१६.७.२०२५यावत् महाकुम्भयोगो भविष्यति। अतः

**आगच्छन्तु महाभागाःकुम्भयोगेन पुण्यदम्।**
**स्नानं दानं विधायात्र धन्यं कुर्वन्तु जीवनम्।।**

# भारतीया कुम्भमेलापरम्परा - विविधावधारणाः




-प्रो. बनमाली बिश्वालः
निदेशकः (व्याकरण-विभागाध्यक्षः)
केन्द्रीय-संस्कृत-विश्वविद्यालयः
श्रीसदाशिवपरिसरः पुरी - ७५२००१


प्रस्तावना- कुम्भः, कुम्भमहोत्सवः अथवा कुम्भमेला हिन्दूधर्मस्य महत्त्वपूर्णः सामाजिकः, ऐतिहासिकः, सांस्कृतिकः, धार्मिकः, आध्यात्मिकः, दार्शनिकः च उत्सवः वर्तते यत्र न केवलं भारतस्य अपितु सम्पूर्णस्य विश्वस्य कोटिशः भक्ताः भागं गृहीत्वा पुण्यभाजः भवन्ति।

सर्वादौ कुम्भशब्दस्य व्युत्पत्तिः का वर्तते इति ज्ञातव्यम्।कु-(पृथिवी)-उपपद-पूर्वकाद्उम्भ्पूरणे इत्यस्माद् धातोःअच्-प्रत्यय-योगेनकुम्भः इति शब्दः निष्पद्यते। संस्कृते नपुंसकलिङ्गे कुम्भं पुंलिङ्गे च कुम्भः इति 'कुम्भ'-शब्दस्य प्रयोगः द्विधा भवति। कुम् भूमिम् उम्भति गन्धेन पूरयति इति कुम्भम् (गुग्गुलुः) तथा कुम् भूमिम् उम्भति जलेन पूरयति इति कुम्भः। एवं कुम्भस्य शाब्दिकार्थःभवति घटः कलशः वा। केषुचित् स्थलेषुकुम्भस्य पात्रम् अपि भवति। एषः अर्थः वैदिक-पौराणिक-लौकिक-साहित्य-ग्रन्थेषु प्राप्यते। प्रायः पौराणिककथासु अयं शब्दः अमृतत्वस्य स्रोतसा जलेन वा अमृतेन वा सम्बद्धः भवति। कुम्भोत्सवस्य सन्दर्भे कुम्भशब्दस्य कलश इत्यर्थग्रहणम् अधिकं समीचीनं स्यात्। यतोहि कलशस्य महद् धार्मिकं महत्त्वम् अस्ति तथा च अमृतस्य सम्बन्धः कलशेन कुम्भेन वाभवितुमर्हति। अस्माकं भारतीयपरम्परायाः कर्मकाण्डप्रसङ्गे प्रत्येकस्मिन् संस्कारेकलशः (घटः) स्थापितः भवति। तस्यघटस्य प्रतिष्ठायां कलशदेवतायाः आह्वानं कृत्वा तस्य वैदिकमन्त्रैः विधिपूर्वकं पूजनं क्रियते। तत्र च अधोलिखितैः मन्त्रैः अभिषेकं कृत्वा तत्स्वरूपं परिकल्प्यते -

**कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः।**
**मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्थिताः।।**
**कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा।**
**ऋग्वेदोथ यजुर्वेदः सामवेदो ह्यथर्वणः।**
**अङ्गैश्च सहिताः सर्वे कलशन्तु समाश्रिताः।।**

न केवलं विष्णुः अमृत-कुम्भस्य उत्पत्तौहेतुभूतः अस्ति, अपितु कुम्भः अपि विष्णुरूपः अस्ति। कुम्भस्य उत्पत्तिकालः अपि विष्णुमयः अस्ति। विष्णुसहस्रनामस्तोत्रे अपि कुम्भस्य उल्लेखः एवमस्ति - अर्चिष्मानर्चितः कुम्भो विशुद्धात्मा विशोधनः (वि.स.स्तो. ८१)। एवमेव कालं निर्दिशन्उक्तं वर्तते - ऋतुः सुदर्शनः कालः विपरमेष्ठी परिग्रहः (वि.स.स्तो. ८१)। एतेन प्रमाणितं भवति यद् एतौ द्वौ शब्दौ विष्णु-वाचकौ। धन्वन्तरिणः तथामोहिन्याश्च रूपं विष्णोः एवद्य एवं सति कुम्भशब्दस्य अर्थः भगवतः विष्णोः भिन्नःकथं स्यात्। कुम्भशब्दस्य तात्पर्यं कुम्भोत्सव-सन्दर्भे निम्नलिखितोद्धरणेषु द्रष्टुं शक्यते-

**कुं पृथिवीं भावयन्ति सङ्केतयन्ति भाविनः।**
**स्थिता व्योम्नि ग्रहा राशौ बृहस्पत्यादयस्तथा।।**
**प्रयागादिहरिद्वारस्थितजीवसुमङ्गलान्।**
**यस्मिन् काले च संयुज्य सः कालः कुम्भशब्दितः।।**

अर्थात् यदा आकाशस्थाः बृहस्पत्यादयः ग्रहसमूहाः कस्मिंश्चित् राशिविशेषे एकत्रितः सन् पृथिव्यां प्रयाग-हरिद्वार-उज्जयिनी-नासिक-निवासिनां भविष्यत्कल्याणं सूचयन्ति तदा सः कालः कुम्भः इति ख्यातः भवति।

अथवा यदा ग्रहसमूहः पृथिवीं चिन्तयित्वा याग-यज्ञादि-पोषणेन तथा पुण्यवर्धनेन च तेजः प्रकाशयति येन च जीवसमूहः जगतः हिताय पापराशिं प्रक्षाल्य लघुतरः भवति तदा सः कालः कुम्भः इति प्रसिद्ध्यति - पापप्रक्षालनैर्जीवा लघूयन्ते च यैरपि।

एवमेव मेला-शब्दस्य अर्थः अपि ज्ञातव्यः भवति। एकस्मिन् स्थाने समागमः, मेलनम्, एकत्र भ्रमणं, विशेषतः सभायां सामुदायिकपर्वणि वा उपस्थितिः। अयं शब्दः वेदपुराणादिषु प्राचीनहिन्दुग्रन्थेषु अपि प्रयुक्तोदृश्यते। एवं कुम्भमेलायाः अर्थः भवति - जलव्याजेन अमृतेन सह सम्बद्धः कश्चन समागमः। अमृतशब्दस्य जलार्थे प्रयोगः अमरकोशादिषु शब्दकोशेषु दृश्यते। तद् यथा-पयः कीलालम् अमृतं जीवनं भुवनं वनम् ।

प्रयागे, हरिद्वारे, उज्जयिन्यां, नासिकेचेत्यादिषु पवित्रेषु कुम्भस्थलेषु प्रति-द्वादशवर्षानन्तरं पूर्णकुम्भपर्वणः आयोजनं भवति तथा च द्वादशवर्षान्तराले घटितस्य कुम्भपर्वणः मध्ये षड्वर्षाणाम् अन्तरालेन अर्धकुम्भस्य च आयोजनं भवति। अद्य भारते कुम्भोत्सवः (अर्धो वा पूर्णो वा) महता आडम्बरेणपाल्यते। अस्मात् पूर्वमपि अयं उत्सवः महता आडम्बरेणपाल्यतेस्म। परन्तु अद्यत्वे सञ्चारव्यवस्थायाः सर्वतोमुखक्रियाकारणात् तस्य प्रसारः अनुदिनं वर्धमानः अस्ति। ऋषिणां साधूनां सताम् अपि च भारतसर्वकारस्य विशेषरुचिकारणात् अस्य विशिष्टा सामाजिकी, धार्मिकी, सांस्कृतिकी, आध्यात्मिकी च महत्ताच वरीवर्धते। फलतः अर्धकुम्भानामपि पूर्णकुम्भानामिव महत्त्वम्अवलोक्यते। एवं प्रकारेण भारते क्रमशः प्रयागे, हरिद्वारे, उज्जयिन्यां, नासिकेच यथाकालं कुम्भोत्सवाःपरिपाल्यन्ते। तथा च षड्वर्षेषु एकवारम् अर्धकुम्भः, पूर्णकुम्भः च आयोज्यते। यतोहि एषः महत्त्वपूर्णः उत्सवः अस्ति अतः तस्य इतिहासमधिकृत्यकश्चन विचारः आवश्यकः।

भारते कुम्भस्य परम्परा न केवलं पौराणिककालात् अपितु वैदिककालात् अपि प्रचलति। अतः अस्मिन् आलेखे विविध-संकल्पनानाम् आलोके भारतीयकुम्भपरम्परायाः विश्लेषणं प्रस्तोष्यते। वस्तुतः कस्या अपि भारतीय-परम्परायाः अनुसन्धानं कुर्वन्तः वयं यावद्वैदिककालम्अथवा तत्सम्बद्धं वैदिकसाहित्यं वा न प्राप्नुमःतावद् वयम्अस्माकं शोधमेव अपूर्णं मन्यामहे। यदि वयं कुम्भोत्सव-परम्परायाः विषये विचारयामः तर्हि अस्मिन् सन्दर्भे वैदिक-कालादेव शोधारम्भः न केवलम् अस्माकम् आवश्यकता अपितु बाध्यता अपि वर्तते।

वैदिकसंकल्पना: ख) वैदिक-साहित्ये अनेके मन्त्राः उपलभ्यन्ते येषु कुम्भपर्वणः उल्लेखः अस्ति। यद्यपि एते वैदिकमन्त्राः वर्तमान-कुम्भपर्व-परम्परया सह सम्पूर्णतया सम्बद्धाः सन्ति वा न वा इति वक्तुं न शक्यते तथापि एषा परम्परा वैदिककालाद् एव आरब्धा इति वदामश्चेत् न कापि त्रुटिः स्यात्। ऋग्वेद-यजुर्वेद-सामवेद-अथर्ववेदेषु कुम्भ-उत्सवसम्बद्धानां मन्त्राणाम् उपस्थितिः न केवलं विशिष्टं तथ्यं पोषयति अपितु सुखदं आश्चर्यम् अपि जनयति।

ऋग्वेदस्य एकस्मिन् मन्त्रेएवं खलु उच्यते - हे अश्विनीकुमारौ ! युवां स्तुतिं कुर्वन्तौ काक्षिवत-ऋषेः मनसि विशिष्टां प्रज्ञां प्रकाशितवन्तौ। फलतः मेघरूपस्यवीर्यवतः पुरुषाश्वस्य क्षूररूपात् कूपात् (मेघात्) अमृतस्वरूप-जलस्य शतं घटैःसौभाग्यवतो जनाःअसिञ्चताम्।यथोक्तं ऋग्वेदे -

**युवं नरा स्तुवते पज्रियाय कक्षिवते अरदतं पुरन्ध्रिम्।**
**कारो तराच्छाफादश्वस्य वृष्णः शतं कुम्भाँ असिञ्चतं सुरायाः।।**
(ऋग्वेद - १०.८.११६.७)

एवं ऋग्वेदस्य मन्त्रान्तरे अपि उक्तमस्ति -

**जघान वृत्रं स्वधितिर्वनेव वसरोजपुरो अरदन्न सिन्धून्।**
**बिभेद गिरिं नवभिन्नकुम्भ मागा इन्द्रौ अकृणुत स्वयुग्भिः।।**
(ऋग्वेद - १०.८.९.७)

अस्य मन्त्रस्य व्याख्या यथा सायणाचार्येण कृता तत्रापि भारतीय-कुम्भोत्सव-परम्परा अपि पूर्णरूपेण प्रतिबिम्बिता भवति - इन्द्रः मेघं नवं न नवमिव कुम्भं कलशं भिनत्स्येव स्वयुग्भिः स्वयं युज्यमानैर्मरुद्भिः गा उदकानि आकृणुत अस्मदभिमुखं करोति। अर्थात् कुम्भोत्सवे देवराज इन्द्रः नवमेघं न भङ्क्ते अपितु अमृतसदृशं जलपूर्णं घटं (कुम्भं) भङ्क्ते तथा च तत्रस्वयं युक्तो भूत्वा वातैः जनानाम् उपरि अमृतवत् जलं वर्षयति।

शुक्लयजुर्वेदे अपि एकः मन्त्रः अस्ति यः कुम्भोत्सवस्य उल्लेखं करोति-

**कुम्भो वनिष्ठुर्जनिता शचीभिर्यस्मिन्नग्रे योन्यां गर्भो अन्तः।**
**प्लाशिर्व्यक्तः शतधार उत्सो दुहे न कुम्भी स्वधां पितृभ्यः।।**
(शुक्लयजुर्वेद - १९.८७)

अस्मिन् मन्त्रे उपलभ्यमानस्य महिधरभाष्यस्य मतानुसारं जलपूर्णः घटः सत्कर्मद्वारा शारीरिकं सुखं जनयति यस्य कुम्भस्य गर्भे अमृततुल्यं जलं स्थापितंभवति। अर्थात् शतं स्रोतोभ्यः कुम्भः (कुम्भपर्व) व्यज्यते। जलरूपेण अमृतेन पूरितं कुम्भपर्व पितृभ्यः अन्नादिकं प्रददाति। अर्थात् कुम्भोत्सवः सत्कर्मभिः लोके मनुष्याय शारीरिकं सुखं प्रददाति तथा परलोके च उत्तमं सुखम् ऐश्वर्यं समृद्धिं च प्रददाति।

कुम्भपर्वणः विषये सामवेदे अपिप्रमाणं प्राप्यते -

आविशन् कलशं सुतो विश्वा अर्षन्नभि श्रियः इन्दुरिन्द्राय धीयते।।

अस्य मन्त्रस्य व्याख्यां कुर्वन् सायणाचार्यः कथयति यत् निष्पीडितः सोमः घटे प्रविश्यजगतः धनसम्पदः वर्षयन् भगवते विष्णवे समर्पयति - सूतः अभिसुतः सोमः अमृतं कलशम् आविशन् विश्वः श्रियः अभ्यर्षण इन्द्राय विष्णवे धियाते। अस्मिन् कुम्भोत्सवावसरे स्नानं कुर्वतां सौभाग्यशालिनां मनुष्याणांसत्कर्माधारेण कुम्भोत्सवः इहलोके परलोके च महत्सुखं प्रदास्यति इति भावः।

**अथर्ववेदेऽपि कुम्भपर्वविषये स्पष्टसूचनालभ्यते-**
**चतुरः कुम्भाँश्चतुर्धा ददामि क्षीरेण पूर्णा उदकेन दध्ना।**
**एतास्त्वा धारा उपयन्तु सर्वाः स्वर्गे लोके मधुमत्**
**पिन्वमाना उप त्वा तिष्ठन्त पुष्करिणीः समन्ताः।।**
(अथर्ववेद ४.३४.७)

अस्य मन्त्रस्य व्याख्यां कुर्वता आचार्येण सायणेन प्रोक्तम् - क्षीरादिद्रव्येण पूर्णान् चतुरः कुम्भान् चतुर्धा प्रागादि-दिग्भेदेन चतुष्प्रकारं दिक्षु ददामि निदधामि। दधि-मधु-घृतादि -लक्षणस्य रसस्य एताः सर्वा धाराः प्रवाहाः फलभूते स्वर्गलोके मधुमत् मागदुर्वद् पिन्वमाना सिञ्चन्त्यः उपयन्तु उगच्छन्तु। अर्थात् क्षीरदधिमधुघृत-परिपूर्णान् चतुर्विधान् कुम्भान् चतुर्दिक्षु (पूर्व-पश्चिम-दक्षिण-उत्तरेषु) स्थापयामि। मधुपूर्णाः सर्वाः अमृतधाराःमधुयुक्ताः सत्यः स्वर्गलोके त्वां प्राप्नुवन्तु सिञ्चन्तु इत्यर्थः। अत्र ब्रह्मा वदतिस्म हे मनुष्याः ! अहं चत्वारि कुम्भपर्वाणि सृजामि तथा च चतुर्षु स्थानेषु (प्रयाग-नासिक-हरिद्वार-उज्जयिनीषु) भवद्भ्यः प्रददामि यानिइहलोक-परलक-सुखैः आध्यात्मिक-भोगान् प्रदास्यन्ति। भारतस्य मानचित्रानुसारं पूर्वस्यां दिशि प्रयागः, दक्षिणे नासिकः, उत्तरे हरिद्वारः, पश्चिमे उज्जयिनी चेत्यादीनि कुम्भस्थलानिअवस्थितानि सन्ति।

पवित्रं कुम्भस्थानम् - भारते गंगानद्याः तटे स्थितेषु नगरेषु यथा - हरिद्वारे प्रयागे च, सिप्रानद्याः तटे उज्जयिन्यां, गोदावरीतीरे नासिके च भिन्न-भिन्न-समयेषु कुम्भोत्सवः आचर्यते इत्येतत् तथ्यं शास्त्रैः पूर्णतया समर्थितम् अस्ति -

**हरिद्वारे प्रयागे च सिप्रा-गोदावरीतटे।**
**शास्त्रवाक्य-प्रमाणेन कुम्भयोगश्च कथ्यते।।**

अन्यत्र अपि एतत् तथ्यं भिन्नभिन्नरूपेण उक्तम् अस्ति ।

**गङ्गाद्वारे प्रयागे च सिप्रा-गोदावरी-तटे।**
**कलशाख्यो हि योगोऽयं प्रोच्यते शङ्करादिभिः।।**

तथा च एतत् तथ्यम् अन्यैः पौराणिकवाक्यैरपि सूचितम् अस्ति-

विष्णुद्वारे तीर्थराजेऽवन्त्यां गोदावरी-तटे। सुधाविन्दुविनिक्षेपात् कुम्भपर्वेति विश्रुतम्।।

प्रयागकुम्भे दुग्धस्नानस्य, नासिककुम्भे दधिस्नानस्य, हरिद्वारकुम्भे घृतस्नानस्य, उज्जयिनीकुम्भे मधुस्नानस्य च फलं लभ्यते इति प्रसिद्धिः। परन्तु प्रयागस्य पूर्णकुम्भसमये केवलं सौभाग्यशालिनः प्राणिनः एव क्षीरदधिघृतमधुमिश्रितेन पञ्चामृतेन स्नानस्य अवसरं प्राप्नुवन्ति। एतदतिरिक्तम् अथर्ववेदस्य निम्नलिखितः वैदिकमन्त्रः अपि पूर्णकुम्भं सूचयति।

**सम्पूर्णः कुम्भोधिकालः तदा आगच्छति यदा प्रायः वेदना भवति।**
**अहं विश्व भुवनानि परमात्मनाहम् ।।** (अथर्ववेद १९.५३.३)

सायणेन वेदार्थप्रकाशे अस्य मन्त्रस्य विस्तरेण व्याख्या कृता यस्य आशयः एवं भवति - हे साधवः! पूर्णकुम्भः प्रत्येकं द्वादशवर्षेभ्यः परं जगतः सर्वेषां जीवानां शुद्ध्यर्थम् आगच्छति यान् वयं प्रयागराजेत्यादिषु तीर्थस्थलेषु बहुवारं पश्यामः। स च पुण्यः कालः कुम्भः इति कथ्यते यः महाकाशे ग्रहराश्यादिसंयोगात् सम्भवति। यदि ब्राह्मणग्रन्थानां विषये वदामः तर्हि शतपथब्राह्मणे अपि कुम्भमहापर्वणःमहिमा विस्तृतवैभवैः वर्णितः अस्ति।

पौराणिकी संकल्पना - 'इतिहास-पुराणाभ्यं वेदं समुपबृंहयेद्इत्यस्याः उक्त्याः आधारेण ऐतिहासिकं पौराणिकं च अध्ययनं विना वैदिकमनुसन्धानमपि अपूर्णम् इति कथ्यते। अतः अस्मिन् आलेखे पुराणेषु वर्णितायाः कुम्भपरम्परायाः अपि चर्चा आवश्यकी अस्ति। भारतीय-कुम्भोत्सवस्य रहस्यं स्कन्द-पद्म-नारद- अग्नि-विष्णु-शिव-कुर्म-मत्स्य-गरुड-ब्रह्मवैवर्त-भविष्य-श्रीमद्भागवतादिषु पुराणेषु उपपुराणेषु च वर्णितम् अस्ति। एतदतिरिक्तं कालिदासस्य मेघदूते, रघुवंशे तथा महाभारतस्य आदिपर्व-वनपर्वयोः अपि कुम्भोत्सवस्य उल्लेखः प्राप्यते।

वस्तुतः पुराणापेक्षया महाभारते कुम्भस्य निहितार्थेभ्यः आध्यात्मिकरूपं प्रदातुं प्रयत्नः कृतः अस्ति। अपि च प्रयागस्य, हरिद्वारस्य, अवन्तिकायाः (उज्जयिन्याः) त्र्यम्बकेश्वरस्य (नासिकस्य) चेत्यादीनां तीर्थस्थलानां महत्त्व-वर्णन-प्रसङ्गे पुराणेषु यत्र तत्र कुम्भस्य उल्लेखः लभ्यते। एवं यदि उच्यते यत् कुम्भः नित्योत्सवः;अनादिपर्व तथातस्य वैभवश्च अप्रमेयः इति तर्हि न कापिअतिशयोक्तिः भविष्यति। एतानि सर्वाणि पुराणानि अत्र विस्तरेण चर्चितुं न शक्यन्ते, अतः स्थालीपुलकन्यायेनकेषाञ्चिदेव पुराणानांनातिविस्तरेण चर्चा सर्वथा युज्यते।

स्कन्दपुराणे कुम्भः - स्कन्दपुराणे उक्तमस्ति यद् यदादेवदानवयुद्धेदानवानां गुरुः शुक्राचार्यः संजीवनीविद्यया मृतान् राक्षसान् पुनः जीवितान् कृतवान् तदा इन्द्रः चिन्तितः अभवत्। अथ इन्द्रः ब्रह्मणःपरामर्शेण समुद्र-मन्थन-योजनां परिकल्पितवान्। समुद्रस्य मन्थनसमये त्रयोदश- रत्नानाम् उद्भवानन्तरं यदा अमृतस्य घटः चतुर्दशरत्नरूपेण उद्भूतः तदा गुरुः बृहस्पतिः धन्वन्तरिणः हस्तात् अमृतस्य घटं गृहीत्वा धावितुम् आरब्धवान्। एतस्मिन् काले राक्षसाः तम् अनुधावन्तः आसन्। फलतः चतुर्षु स्थानेषु अमृतबिन्दवः पतिताःअद्य तेषु चतुर्षु स्थानेषु कुम्भमेलायाः आयोजनं भवति।

पद्मपुराणे कुम्भः - सनातनधर्मे उल्लिखितानि सर्वाणि पुराणानि भिन्नकालेषु रचितानि इति वचनस्यआवश्यकता न वर्तते। कुम्भमेला-सन्दर्भे स्कन्दपुराणे या घटना उल्लिखिता अस्ति, सा पद्मपुराणे अपि उल्लिखिता अस्ति। परन्तु तयोः सामान्यः भेदः अयमस्ति यत् स्कन्दपुराणानुसारं भगवतः धन्वन्तरिहस्तात् बृहस्पतिः अमृतकलशं गृहीत्वा पलायितवान् इति कथ्यते, किन्तु पद्मपुराणानुसारं बृहस्पतेः संकेतेन इन्द्रस्य पुत्रः जयन्तः अमृत-कलशेन सह पलायितः आसीत्। तदनन्तरम् एव राक्षसाः तम् अनुधावन्तः युद्धम्आरब्धवन्तः यश्च युद्धः प्रायः द्वादश-वर्षाणि यावद् अचलत्। अत एव द्वादश-वर्षाणाम् अन्तरेण कुम्भमेला अपि आयोज्यते।

भागवतपुराणे कुम्भः - भागवतपुराणस्य मतानुसारं कुम्भोत्सवस्य पृष्ठतः पौराणिककथा एतादृशी अस्ति - क्षीरसागरस्य मन्थनसमये

यदा भगवान् विष्णुः धन्वन्तरीरूपेण अमृतघटेन सह प्रादुर्भूतः तदाअमृतप्राप्तेः आशायांदेव-दानवानां मध्ये घोरः युद्धः प्रारब्धः अभवत। युद्धं शान्तयितुं भगवान् विष्णुः यदा मोहिनीरूपं स्वीकृत्य अमृतं वण्टितुम् आरब्धवान् तदा तस्याः रूपेण मुग्धाः राक्षसाः युद्धात् निवृत्ताः अभवन। कथ्यते यद् यदा मोहिनी अमृतघटं वहन्ती चलति स्म, यत्र यत्र कुम्भात् अमृतबिन्दवः अपतन्, तत्र तत्र कुम्भोत्सवः पाल्यते इति मान्यता।

कुम्भसम्बद्धाः अन्याः पौराणिककथाः- अमृतकुम्भस्य रक्षणार्थं प्रयागस्य संगमक्षेत्रे कुम्भः निगूढः इति अपि केचन जनाः मन्वते। अतः प्रयागकुम्भस्य महत्त्वं भिन्नम् अस्ति ।

कुम्भ-उत्सवस्य सन्दर्भे न्यूनातिन्यूनं द्वित्राः पौराणिक्यः कथाः लोकप्रियाः सन्ति। एतासु कथासु देवदानवैः समुद्रस्य मन्थनसम्बद्धाकथा, तस्मात् प्राप्तस्यामृतघटस्यकथा, तस्मात् घटात् इतस्ततः पतताम् अमृतबिन्दूनां च कथा सर्वथा स्वीकृता अस्ति। अस्याः कथायाः अनुसारं यदा महर्षेर्दुर्वाससः शापात् इन्द्रादयः देवाः दुर्बलाः अभवन् तदा राक्षसाः तान् आक्रम्य पराजितवन्तः। अथ सर्वे देवाः मिलित्वा विष्णोः समीपं गत्वा स्वव्यथाकथाःश्रावितवन्तः। ततः विष्णुः क्षीरसागरस्य (दुग्धसमुद्रस्य) मन्थनं कृत्वा अमृतं निष्कासयितुम्उपदिष्टवान्। विष्णोः उपदेशानुसारं सर्वे देवाः राक्षसैः सह मिलित्वा अमृतप्राप्त्यर्थं योजनां प्रारब्धवन्तः। समुद्रस्य मन्थनाद् अमृतघटस्य निर्गतमात्रेण देवानाम् आग्रहेण इन्द्रस्य पुत्रः जयन्तः अमृतघटं वहन् आकाशं प्रति उदड्डीयत। तदनन्तरं राक्षसगुरोः शुक्राचार्यस्य आज्ञानुसारं राक्षसाः पुनः अमृतं प्राप्तुं बहुप्रयत्नपूर्वकं मध्येमार्गं जयन्तं गृहीतवन्तः। अनन्तरम् अमृतघटं प्राप्तुं द्वादशदिनानि यावद् देवदानवयोः मध्ये निरन्तरं युद्धः अभवत्। अस्मिन् युद्धावसरे पृथिव्यां चतुर्षु स्थानेषु अमृतघटात् अमृतबिन्दवः पतिताः। तदानीं नानादेवाः यथाशक्ति अमृतस्य घटम्अरक्षन्। यथा चन्द्रः घटाद् बहिः प्रस्रवन्तममृतंअरक्षत्, सूर्यः तस्य घटस्य विस्फोटम् अरक्षत्, गुरुः राक्षसानाम् अपहरणात् घटम् अरक्षत्तथा च शनिः देवेन्द्रस्य भयात् घटम् अरक्षत्। एवं ततः विवादं शान्तयितुं भगवान् विष्णुः मोहिनीरूपं स्वीकृत्य सर्वेभ्यः अधिकारानुसारं अमृतं वितरितवान्। एवमेव देवदानवयोः युद्धस्य समाप्तिः अभवत्।

अन्येषां पुराणानाम् अनुसारमपिअमृतकुम्भस्य कृते द्वादशदिनानि यावत् देवदानवयोः मध्ये सङ्घर्षः अभवत्। तत्कारणात् पृथिव्यां तेषु तेषु स्थानेषु कुम्भोत्सवः पाल्यते यत्र अमृतघटाद् बिन्दवः पतिताः आसन्-

**विवादे काश्यपेयानां यत्र यत्रावनीस्थले।**
**कलशो न्यपतत्तत्र कुम्भपर्व तत्रोच्यते ।।**

उचय्ते - अमृतप्राप्त्यर्थं द्वादशदिनानि यावद् देवदानवयोः निरन्तरं युद्धः अभवत्। वस्तुतःदेवानां द्वादशाहानिमनुष्याणांद्वादशवर्षाणि भवन्तिद्य अतो द्वादश कुम्भाः अपि सम्भवन्ति। यथोक्तं पुराणेषु तेषु कुम्भेषु चत्वारः कुम्भाः पृथिव्यां भवन्ति, शिष्टाः अष्टौ कुम्भाः च देवलोकेभवन्ति। एतन्मान्यतानुसारम् ते च अष्टौ कुम्भाः मनुष्याणां प्राप्तेःबहिर्भूताः सन्ति, केवलं देवाः एव तान् प्राप्तुं शक्नुवन्ति।

ज्योतिषीयसंकल्पनाः - उपर्युक्तानां पौराणिकमान्यतानां ज्योतिषीयतथ्यैः अपि पूर्णतया समर्थनम् अवलोक्यते। ज्योतिषाचार्याणां मते कुम्भस्य असाधारणं महत्त्वं वर्तते।कुम्भश्च बृहस्पतेः कुम्भराशिप्रवेशेन, सूर्यस्य मेषराशिप्रवेशेन च सह सम्बद्धः अस्ति। वस्तुतः विभिन्नेषु कुम्भस्थलेषु ग्रहाणां स्थितिः पवित्रनदीजलम् औषधीकरोति। एवंतेषु तेषु दिनेषु तच्च नदीजलम् अमृतसदृशं भवति। अत एव तत्र लक्षशः भक्ताः पवित्रस्नानार्थं समागत्य आत्मानं वा आत्मनःअन्तःकरणं वा शुद्धीकुर्वन्ति। आध्यात्मिकदृष्ट्या अर्धकुम्भकाले ग्रहाणां स्थितिः एकाग्रतायाः कृते ध्यानस्य च कृते उत्तमाभवति। यद्यपि सर्वाणि हिन्दुपर्वाणि समानादरपूर्वकं भक्त्या च आचर्यन्ते तथापि अर्धकुम्भ-पूर्णकुम्भ-मेलासु सन्तः, भक्ताः, पर्यटकाः च सर्वाधिकतयादृश्यन्ते। खगोलीय-गणनानुसारम् इयं मेला कतिपयेषु विशेषग्रहावस्थानेषु सम्भवति तथा चास्य संयोगस्य नाम 'कुम्भस्नानयोगः' इति कथ्यते।अयं च योगः विशेषतया शुभकरः मन्यते। तस्मिन् काले चन्द्रादिदेवताभिः कलशस्य रक्षणं कृतम् आसीत्। अतः वर्तमानकाले यदा चन्द्रादयः ग्रहाः तस्मिन् राशौ आगच्छन्ति, तदा कुम्भयोगः निर्मितः भवति। एवं मान्यता अस्ति यदेतेषु दिनेषु पृथिव्याः उच्चक्षेत्रद्वाराणि उद्घाट्यन्ते। एवंतदा स्नानं कृत्वा कोपि आत्मा सुलभतया उच्चक्षेत्रं प्राप्तुं शक्नोति। वस्तुतः कुम्भस्नानेनसाक्षात् स्वर्गदर्शनं मन्यते, यस्य हिन्दुधर्मे अशेषं महत्त्वम् अस्ति।

धर्मशास्त्रीया अवधारणाः- भारतीय-धर्मशास्त्रस्य मान्यतानुसारं द्वादश काल्पनिकाः कुम्भाः सन्ति, येषु चत्वारः मर्त्यलोके (प्रयागे, हरिद्वारे, उज्जयिन्यां तथा नासिके) आचर्यन्ते, शेषाः च अष्टौ दिव्यलोके आचर्यन्ते। परन्तु यदि वयं द्वादश-कुम्भानाम् अस्तित्वं मर्त्ये एव स्वीकारस्य पक्षे भवामः तर्हि विशिष्टा गवेषणाअपेक्ष्यते। विश्वस्य अन्येषु भागेषु यस्याःकस्याः अपि नद्यास्तीरे आयोजितानां मेलानां खगोलीयग्रहस्थितीनां विस्तृतानुसन्धानं कर्तव्यं भविष्यति, येन अवशिष्टानाम् अष्टानाम् अज्ञातानां कुम्भोत्सवानाम् आविष्कारे अवश्यमेव साहाय्यं लप्स्यते। स्कन्दपुराण-रुद्रयामलतन्त्रादिषु अनेकेषु ग्रन्थेषु उल्लिखितम् अस्ति यद् एवमपि समयः आसीद् यदा देशस्य द्वादश-स्थानेषु कुम्भस्य आयोजनं भवति स्म। वस्तुतःलोके बहवः महान्तः उत्सवाः आचर्यन्ते, ये कस्याश्चित् नद्याः समुद्रस्य तीरे वा अनुष्ठीयन्ते। एवं तासां तासां मेलानाम् आयोजनावसरे ग्रहस्थानानाम् अध्ययनेन कानिचन तथ्यानि प्रकाशं प्राप्नुयुः।

सिंहस्थोत्सवः - यथा अस्माभिः चर्चितं- कुम्भस्य सन्दर्भे बृहस्पतेः विविधराशिषु संक्रमणं तथा तेषु तस्य उपस्थितिः च महत्त्वपूर्णा भवति। यतोहि यदा प्रयागेबृहस्पतिः वृषभराशौ भवतिसूर्यः च मकरराशौ भवति तदा कुम्भोत्सवस्य अवसरः आयाति। तथा च हरिद्वारे यदा कुम्भराशिस्थे बृहस्पतौ मेषस्थः सूर्यः आगच्छति तदा कुम्भस्य योगः आयाति। एवमेवउज्जयिन्यांयदा बृहस्पतिः सिंहस्थः भवति तथा चन्द्रसूर्यौ मेषस्थौ भवतःतदा कुम्भोत्सवस्य कृते अनुकूलः अवसरः मन्यते। नासिके बृहस्पतिः सिंहस्थः एव तिष्ठति, परन्तु सूर्यचन्द्रौ अपि सिंहराशौ भवतः। अत एव उज्जयिनी-नासिकयोः कुम्भ-पर्व श्कुम्भश इति नाम्ना न, किन्तु 'सिंहस्थ' इति नाम्ना अधिकं प्रसिद्ध्यति। एवं कुम्भे सूर्यचन्द्राभ्यां सह बृहस्पतये अपिसर्वाधिकं महत्त्वं दीयते। नाना-राशिषु बृहस्पतेःसंक्रमण-कालः माङ्गलिकः इति मन्यते तथा च बृहस्पतेः एषा माङ्गलिकताकल्याणकारिता परोपकारिता वा कुम्भोत्सवानां विशेषकारणं मन्यते।

ऐतिहासिक्यः अवधारणाः - कुम्भस्य इतिहासः पुरातनः अस्ति। अतः प्राचीनाः विविधा अवधारणाः अपि सन्ति। परन्तु आलेखस्य सीमानम् अभिलक्ष्य कुम्भसम्बद्धानि कानिचन एव ऐतिहासिकतथ्यानि अत्र संक्षेपेण प्रस्तुतानि सन्ति ।

कुम्भस्य इतिहासः - अद्यावधि विश्वे कुम्भ-विषये बहु अनुसन्धानंजातं वर्तते किन्तु कुम्भ-मेला कथं कदा च आरब्धा इति अद्यापि इदमित्थं न ज्ञायते। अस्मिन् सन्दर्भे भिन्नानिभिन्नानिमतानि सन्ति। इतिहासकाराः अपि मन्वते यत् कुम्भमेलाः सहस्रवर्षेभ्यः आयोज्यन्ते। एतद्विषये अनेकेषु पौराणिकधर्मग्रन्थेषुउल्लेखो लभ्यते।वस्तुतः कुम्भमेलाविषये अस्माकम् इतिहासः किं वदति इत्यपिअवश्यं ज्ञातव्यम् -

भारते विधिपूर्वकं नदीस्नानस्य समयः १०,००० ईपू (ई.पू.) इति सप्रमाणं स्थिरीकृतवान्इतिहासकारः एस. बी. रायः। परन्तु अस्मिन् सन्दर्भे तेन कुम्भस्य नाम न उल्लिखितम्। बौद्धलेखेषु नदीमेलानाम् उपस्थितेः उल्लेखः अस्ति, येनकुम्भस्य अस्तित्वं न्यूनातिन्यूनं ६०० ई. पू. यावत् सिद्ध्यति। सम्राजः चन्द्रगुप्तस्य दरबारस्य एकः ग्रीक्-दूतः आसीत् यः एकस्याः मेलायाः विषये स्वकीये प्रतिवेदने उल्लिखितवान् यस्याः कालः ४०० ईपू. यावत् स्वीकर्तुं शक्यते। एस. बी. रायः अपि मनुते यत् मेलायाः साम्परतिकं स्वरूपं ३०० ई.पू. इत्यस्मिन् काले स्वस्वरूपं प्राप्तवद् आसीत्। विभिन्नेषु पुराणेषु अन्य-प्राचीन-वाचिक-परम्पराधारित-ग्रन्थेषु च एवम् उल्लेखः प्राप्यते यत् पृथिव्यां चतुर्षु भिन्नस्थानेषु अमृतबिन्दवःपतिताः।

कुम्भकोणम् ख्र केचन जनाः एवमपि मन्वते यत् एतेषां चतुर्णां कुम्भोत्सवानाम् अतिरिक्तं भारते पञ्चमः कुम्भमहोत्सवः अपि पाल्यते। अयं च पञ्चमः कुम्भमहोत्सवः दक्षिणभारते तमिलनाडु-प्रदेशस्य चिदम्बरम्-समीपे कुम्बकोणम् इत्यस्मिन् स्थाने श्महामखमपर्वश इति नाम्ना पाल्यते। 'कुम्भकोणम्' इति कश्चन संस्कृतशब्दः। केचन विद्वांसः श्कुम्भघोषम्श इत्यतः अस्य व्युत्पत्तिरिति मन्वते। अत्रापि कुम्भोत्सवः द्वादश वर्षाणाम् अनन्तरमेव आचर्यते।

कुम्बकोणमहामखमपर्वणः (कुम्भमहापर्वणः) कथा एवं प्रसिद्ध्यति - ब्रह्मा एकं घटं (कलशं) निर्मितवान् यस्मिन् 'अमृतं' संगृहीतम् आसीत। अस्य घटस्य नासिका केनचित् कारणेन भग्ना अभवत्, येन घटात् अमृतं बहिः प्रसृतम्। एवंतत्रत्याः भूमिः च अमृतमयी अभवत। वस्तुतः तस्मात् प्रदेशात्पञ्च क्रोशपर्यन्तं क्षेत्रमपि अमृतमयं जातम। उक्तं च- कुम्भस्य कोणतो यस्मिन् सुधापूरं विनिस्सृतम्। तस्मात्तु तत्पदं लोके कुम्भकोणं वदन्ति हि।।

पुराणानां अनुसारम् जलप्रलयकाले अमृतेन संसारसृष्टिबीजैः च परिपूर्णः कुम्भः (घटः) कुम्भकोणम् इत्यस्मिन् स्थाने आगत्य स्थगितवान्। तदानीं लुब्धक-वेषधारी शिवः बाणेन कलशं भग्नवान् तथा च महामखम-सरोवरः अमृतेन पूर्णः अभवत्। महामखमदिने गङ्गायाः, यमुनायाः, सरस्वत्याः, सरय्व्वाः, गोदावर्याः, नर्मदायाः, सिन्धोः, कावेर्याः, महानद्याश्च इत्येतासां सर्वासां नदीनां पवित्रजलस्रोतांसि महामखामसरोवरे दृश्यन्ते, यत्र सर्वे देवाः देवताः च निवसन्ति। महामखमपर्वणि अत्र लक्षशः भक्ताः आगत्य महामखमसरोवरे कावेरीनद्यां च स्नानं कृत्वा दानादिधर्मं कुर्वन्ति।

अत्र विचारणीयम् अन्यदपि तथ्यम् अस्ति यत्समुद्रमन्थनसम्बद्धया पौराणिक-कथया सह अस्य महामखमपर्वणः कः सम्बन्धःइति।यद्यपि न निश्चितं तथापि एतद् वक्तुं शक्यते यद् भारतस्य चतुर्णां प्रसिद्धानां कुम्भोत्सवानां स्थलानि समुद्रतीरे न सन्ति इति निश्चप्रचम्। यदि कुम्भः समुद्रस्य मन्थनसम्बद्धः इति मन्यते, तर्हि अमृतं समुद्रस्य समीपे कुत्रापि अवश्यं भवेत।तर्हि तत् स्थानं कुम्भकोणम् इति निश्चितरूपेण भवितुं शक्नोति। यथा कुम्भकोणम् इति नाम्ना एव स्पष्टं भवति यत् समुद्रस्य मन्थनानन्तरं कुम्भकलशः अस्मिन् एव स्थाने स्थापितः स्यात।एवं कुम्भकोणम् इति नाम एव कुम्भोत्सवस्य प्रतिनिधित्वं करोति तथा च कुम्भसम्बद्धाः अवधारणाः अपि जीवयति।

कुम्भकोणे 'महामखम सरोवरः' महत्त्वपूर्णो वर्तते यत्र दक्षिणभारतस्य 'कुम्भमेला' द्वादश वर्षेषु एकवारं भवति। अस्यां कुम्भमेलायामपि मुख्यस्नानं माघीपूर्णिमादिने भवति। अत्रापि नागेश्वरः, शाङ्र्गपाणिः, कुम्भेश्वरः चेत्यादीनि प्रमुखानि मन्दिराणि सन्ति। परन्तु एतेषु सर्वेषु स्थलेषु कुम्भेश्वरमन्दिरस्यमहत्त्वपूर्णं स्थानम् अस्ति। कुम्भेश्वरमन्दिरे कुम्भाकृतिकं गोलाकारं शिवलिङ्गं स्थापितमस्ति। वस्तुतः अस्य शिल्पस्य शिवलिङ्गं भारते अन्यस्मिन् मन्दिरे न दृश्यते। एतेन इदमपि सिद्ध्यति यत् समुद्रस्य मन्थनानन्तरं 'अमृतकलशः' अत्रैव स्थापितः स्यात्। इतश्च विष्णोः संकेतं प्राप्य जयन्तः कलशं गृहीत्वा पलायितः स्यात् तथा विश्रामार्थंप्रयागे, हरिद्वारे, उज्जयिन्यां तथा त्र्यम्बकेश्वरे (नासिके) च स्थापितवान् स्यात् यस्य स्मृतौ अद्यापि तेषु तेषु स्थलेषु कुम्भपर्वणाम् आयोजनं भवति।

कुम्भपर्वणःविविधम् रूपम् - पवित्र-कुम्भपर्वणः आरम्भे ब्रह्मा, उत्सवे विष्णुः, उत्सवान्ते रुद्रःतथा उत्सव-समयेच सर्वे देवाः उपस्थिताः भवन्ति इति मान्यता।

**कुम्भात्प्रागेव ब्रह्मा च विष्णुश्च कुम्भपर्वणि।**
**पर्वान्ते च स्थितो रुद्रस्तत्पार्श्वे देवतागणाः।।**

शास्त्रेषु उक्तमस्ति यत्- अनन्तो सागरः, सप्तद्वीपा वसुमती, षडङ्गैः (शिक्षा-कल्प-व्याकरण-निरुक्त-छन्दज्योतिषैः)सह चत्वारः वेदाः (ऋग्-यजुस्सामाथर्वाणि) च अनेनपर्वणासम्बद्धाःसन्ति।

**सागराः कुम्भयोगे च सप्तद्वीपा वसुन्धरा।**
**ऋग्वेदोथ यजुर्वेदः सामवेदो ह्यथर्वणः।**
**षडङ्गैः सहिताः सर्वे कुम्भपर्व-समाश्रिताः।।**

कुम्भोत्सवकालः - यस्मिन् वर्षे यत्र सूर्यः चन्द्रः बृहस्पतिः च इत्येते सर्वे त्रयः ग्रहाः एकस्मिन् अपि राशौ संयोजिताः भवन्ति तस्मिन् वर्षे पृथिव्यां तस्मिन्नेव स्थाने कुम्भोत्सवः आचर्यते न तु अन्यत्र।

सूर्येन्दुगुरुसंयोगस्तद्राशौ यत्र वत्सरे। सुधाकुम्भप्लवे भूमौ कुम्भो भवति नान्यथा।

अस्य पृष्ठतः कारणमेतदेव निर्दिश्यते यद्एते एव त्रयः ग्रहाः मुख्यतया अमृत-कुम्भं राक्षसेभ्यः अरक्षन्। एवमयं संयोगः केवलम् एषु स्थानेषु द्वादशवर्षेषु एकवारं प्रयाग-नासिक-उज्जयिनी-हरिद्वारेषु एव सम्भवति। कुम्भ-पर्वणः रहस्यं पुराणेषु एवं वर्णितम् अस्ति - अमृतलाभाय देवासुराणां मध्ये द्वादशदिवसीयो विवादः आसीत। देवानाम् एकस्य दिवसस्य, मनुष्यस्य एकस्य वर्षस्य तुल्यत्वात् तेषां द्वादशदिनानि मनुष्याणां द्वादशवर्षाणि अभवन्। अत एव कुम्भोत्सवोयं द्वादशवर्षेभ्यः परम् एकवारम् आगच्छति।

देवानां द्वादशोहोभिर्मर्त्ये द्वादशवत्सरैः। जायन्ते कुम्भपर्वाणि तथा द्वादशसंख्यया।

कुम्भपर्वयोगः - भारतस्य पूर्वोक्तेषु चतुर्षु प्रदेशेषु कुम्भपर्वाणि भिन्न-भिन्न-समयेषु आचर्यन्ते। शास्त्रेषु एतेषां कुम्भोत्सवानां योगाः विस्तरेण वर्णिताः सन्ति।

प्रयागकुम्भः- यदा बृहस्पतिः मेषे भवति चन्द्रसूर्यौ च मकरराशिस्थौ भवतः तदा तीर्थराजे प्रयागे कुम्भस्नानं भवति।

**मेषराशिं गते जीवे मकरे चन्द्रभास्करौ।**
**अमावास्या तदा योगः कुम्भाख्यस्तीर्थनायको।।**
**मकरे च दिवानाथे ह्यजगे च वृहस्पतौ।**
**कुम्भयोगो भवेत्तत्र प्रयागे ह्यतिदुर्लभः।।**

नासिककुम्भः - यदा सूर्यः मेषे भवति, बृहस्पतिः च सिंहे भवति तदा मोक्षदायकं कुम्भस्नानं गोदावर्यां (नासिके) भवति।

**मेषराशिं गते सूर्ये सिंह-राशौ बृहस्पतौ।**
**गोदावर्यां भवेत् कुम्भो जायते खलु मुक्तिदः।।**
**यस्मिन् दिने गुरुर्याति सिंहराशौ महामते।**
**तस्मिन् दिने महापुण्यं नरः स्नानं समाचरेत्।।**
**यस्मिन् दिने सुरगुरुः सिंहराशिगतो भवेत्।**
**तस्मिंस्तु गौतमीस्नानं कोटिजन्माघनाशनम्।।**

केषाञ्चित् आचार्याणां मते यदा बृहस्पति-सूर्य-चन्द्रादयो ग्रहाः कर्क-राशौ मिलिताः भवन्ति तदा पृथिव्यां नासिके कुम्भस्नानस्य योगः भवति -

**कर्के गुरुस्तथा भानुश्चन्द्रश्चन्द्रर्क्षगस्तथा।**
**गोदावर्यां तदा कुम्भो जायतेऽवनीमण्डले।।**

उज्जयिनी-कुम्भः - यदा सूर्यः मेषराशौ भवति तथा बृहस्पतिः सिंहराशौ भवति तदा भुक्ति-मुक्तिप्रदः कुम्भयोगः सिप्रातटे (उज्जयिन्यां) भवति।

**मेषराशिं गते सूर्ये सिंहराशौ बृहस्पतौ।**
**उज्जयिन्यां भवेत् कुम्भः सदा मुक्तिप्रदायकः।।**

अन्येषाम् आचार्याणां मते यदा कुम्भराशौ बृहस्पति-चन्द्र-सूर्याः एकत्रिताः भवन्ति तदा कार्तिकमासस्य अमावस्यातिथौ उज्जयिन्यां कुम्भस्नानस्य योगः भवति।

**घटे सूरिः शशी सूर्यः कुह्वां दामोदरे यदा।**
**धारायां च तदा कुम्भो जायते खलु मुक्तिदः।।**

कस्यचिदन्यस्य प्रमाणस्य आधारेण माघमासस्य शुक्लपक्षे यदा बृहस्पतिः सिंहराशौ भवति, सूर्यःमेषराशौतथा चन्द्रः च तुलाराशौ भवतितदा सोमवासरे पूर्णिमादिने च व्यतिपातयोगेक्रियमाणं कुम्भस्नानं

शेषभागः एकादशपुटे

# भारतीयनदीसंस्कृतौ कुम्भस्यायोजनम्



-डॉ.लालाशंकरगयावालः

जलस्य प्राकृतिकप्रवाहधारा या पर्वतात् जलाशयात् निःसृत्य विशिष्टमार्गात् प्रवहमाना इतरनदीजलाशयसागरेषु वा सम्मिलतीति नदी कथ्यते। नदी जीवनदायिनी माता भवति।

ऋग्वेदे नदीनां वर्णनं प्राप्यते-

**इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या।**
**असिक्न्या मरूद्‌धे वितस्तयार्जीकीये ऋणोह्या सुषोमया।।**

महाभारते भीष्मपर्वणि भारतवर्षस्यवर्णनक्रमे संजयः नदीनां नाम संकीर्तनानन्तरं वदति-

**विश्वस्य मातरः सर्वाः सर्वाश्चैव महाफलाः।**
**येताः सरितो राजन्! स्माख्याता यथास्मृतिः।।**

वाल्मीकिरामायणे रामस्य वनगमनप्रसंगे गंगायाः पारगमनं, सीतायाः गंगास्तुतिकीर्तनम्, संगमक्षेत्रस्य च बहुधावर्णनं प्राप्यते। भारतीयाः नित्यपूजाक्रमे स्नानसमये च स्वकीये कलशे नदीनामावाहनं नित्यं कुर्वन्ति-

**गंगे च यमुने चैव गोदावरी सरस्वती।**
**नर्मदे सिन्धु कावेरी जलेऽस्मिन् सन्निधिं कुरू।।**

भारतस्य तीर्थक्षेत्राणि नदीतीरे नदीघट्टे स्थितानि दृष्यन्ते। नदीसंस्कृतौ नदीनां पूजनं भवति। तीर्थयात्रा नदीस्नानेन, नदीतीरावस्थितदेवालयदर्षनेन तत्र वृक्षपूजनेन च सम्पाद्यते। नदीस्नानार्थं गमनमेव तीर्थयात्रा कथ्यते तत्र नदी पवित्रतमा तस्य घट्टः देवालयः वृक्षाः तीर्थत्वेनांगीक्रियन्ते। नदीद्वयस्य योगः प्रयागनाम्ना ख्यातः। तत्रानेके प्रयागाः सन्ति तथाहि-देवप्रयागः, रूद्रप्रयागः, कर्णप्रयागादयः।

नदीनां महत्वं न केवलं तीर्थत्वेन धार्मिकं स्वीक्रियते अपितु ताषां महत्वम् आध्यात्मिकं सांस्कृतिकं साहित्यिकं भौगोलिकं औद्यागिकं चापि वर्तते। नदीनां तट एव विश्वस्य अनेकेषां संस्कृतीनां विकासः जातः ऐतिहासिकं नगरनिर्माणमपि च दृष्यते। वैदिक ऋषिभ्यः पौराणिकेभ्यः आरभ्य व्यास- कालिदास- भवभूति- बाणभट्ट- क्षेमेन्द्र- जगन्नाथ- तुलसीदास- सर्वभाषाविद्‌कविभिः सुगीता।

नदीषु गंगा परमपावनी पूता च गंगाभारतस्य प्राणदायिणीनदी। गंगानद्याः नाममात्रेणजनाः पापविनिर्मुक्ताः जायन्त एव, दर्षनेन च परमकल्याणं प्राप्नुवन्ति, गंगायांस्नानेनगंगाजलपानेन च मानवानामुद्धारः जायते। तथाहि गंगायाः महिमाविषयेउच्यते

**न गंगा सदृशं तीर्थं न देवः केशवात्परः**
**ब्राह्मणेभ्यः परं नास्ति एवमाह पितामहः।**
**यत्र गंगामहाराज स देशस्तत् तपोवनम्**
**सिद्धिक्षेत्रं तज्ज्ञेयं गंगातीरसमाश्रितम्।।**

भारतीयनदीसंस्कृतौ गंगायाः महत्वं भृशं वर्तते। ऐतिहासिककालादेव आरम्भतः गंगा भारतीयसंस्कृत्याः मूलाधाररूपेण स्वकीयं विशिष्टं स्थानं धारयति। यस्याः गंगायाः तीरे प्राचीनकालात् अद्यावधि भारतीयसंस्कृत्याः सभ्यतायाष्चाख्यानकीर्तनं करोति, अनेकेषां साम्राज्यानामुद्भवपतनस्य साक्षिणीयं गंगा भारतीयचिन्तकानां कृते तत्वान्वेषणाय, जीवनसमृद्धये साफल्याय संकल्पिता वर्तते।

गंगायाः महिमावर्णनं प्रायः सर्वेषु पुराणेषु, महाभारते, रामायणे, रामचरितमानसे च बहुधा गीतम्। तत्रापि विषेषेण त्रिवेण्याः संगमतटे विराजमानस्य प्रयागराजस्य सुविस्तृतं वर्णनं प्राप्यते। नरसिंहपुराणे विष्णोः योगमूर्तिरूपेण प्रयागोऽवस्थित इति वर्ण्यते। मत्स्यपुराणानुसारं रूद्रेण कल्पान्ते प्रयलं कृतेऽपि प्रयागस्य नाशः न जायते अपिच प्रयागस्य नामस्मरणमात्रेणैव भक्ताः सर्वपापाद् प्रमुच्यन्ते अस्य प्रयागस्य रक्षणं सर्वे देवाः सोत्साहेन कुर्वन्ति। पुराणेषु प्रयागः तीर्थराज नाम्ना स्वीक्रियते। स्कन्दपुराणानुसारं

**प्रथमं तीर्थराजन्तु प्रयागाख्यं सुविश्रुतम्।**
**कामिकं सर्वतीर्थानां धर्मकामार्थमोक्षदम्।।**

भारतवर्षे नदी न केवलं भौतिकतत्वमात्रमपितु तासां प्रभावः वयं भारतीयानां कृते आध्यात्मिकम् आधिदैविकं जगति वर्तते। सर्वेषु पुराणेषु सर्वेषु च काव्येषु नदीनां विस्तृतं वर्णनं प्राप्यते। तत्र हि पुराणे विश्वस्य मातरः सर्वाः नद्यः। पद्म-स्कन्द-श्रीमद्‌भागवतपुराणेषु नदीनामुल्लेखः विस्तृतः प्राप्यते। तत्र वायुपुराणे अष्टसप्ततिसंख्यकानां नदीनामुल्लेखः वर्तते।

**कुम्भम्**-कुं भूमिं कुत्सितं वा उम्भति पूरयति अथ च कुम्भयति अमृतेन पूरयति सकलक्षुत्पिपासादिद्वन्द्वजातं निवर्तयति इति कुम्भः। कुम्भपर्व मनुष्यानां सांसारिकबाधामपाकुर्वन् तेषां जीवनघटं ज्ञानामृतेन पूरयति। कुम्भ इति पदस्यार्थः पवित्रं मांगलिकं चेति घटम्। कुम्भपदेन धार्मिक जनसम्मर्दनामियं परम्परा वैदिककालादेवोपलभ्यते यदा तपःपूताः ऋषयः मुनयः केषांचिन्नदीनां सन्निकटे संघट्य धार्मिक-दार्शनिक-आध्यात्मिक-रहस्यानामुपरि आलपन्ति स्म अथ च विवदन्ति स्म सैषा परम्पराद्यत्वेपि तथैव नदीतीरे कुम्भायोजनरूपेण दरीदृष्यते।

भारतीयसंस्कृतौ कुम्भ-घटम्, सृष्टेः प्रतीकरूपेण स्वीक्रियते। यथाकुम्भकारः पंचतत्वेषु कुम्भनिर्माणं करोति तथैव ब्रह्मापि पंचतत्वेनैव जगत् सर्जति। कुम्भपदस्य माहात्म्यविषये कथ्यते-

**कलशस्य मुखे विष्णुः कण्ठे रूद्रो समाहितः**
**मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः।**
**कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा**
**ऋग्वेदोऽथ यजुर्वेदो सामवेदो अथर्वणः।।**
**अंगैश्च संहिताः सर्वे कलषे तु समाश्रिताः।**

स्कन्दपुराणानुसारं समुद्रमंथनसमये धन्वन्तरिहस्ते अमृतयुक्तं कुम्भमासीत्, तत्कुम्भं इन्द्राय प्रदत्तम्। इन्द्रः स्वपुत्राय जयन्ताय तत्कुम्भरक्षणार्थं दत्तवान्। जयन्तः यदा कुम्भं नीत्वा पलायितवान् तदा असुराः सर्वेतमनुसरितवन्तः। तत् कुम्भं प्राप्तुं देवदानवेषु मध्ये द्वादषवर्षाणि प्रलयंकरं युद्धमभवत्। कुम्भरक्षणार्थं द्वादषस्थानेषु तद्घटगतामृतस्य बिन्दवः अपतन् तत्र पृथिव्यां चतुर्षु स्थानेषु तदमृतस्य बिन्दवः अपतन् तेषु चतुर्षु स्थानेष्वेव कुम्भस्यायोजनं भवति। कुम्भपर्वणः आयोजनं द्वादषवर्षेभ्य चतुर्षुतीर्थस्थानेषु नदीतीरे चतुरवारमायोज्यते। चतुर्षु कुम्भपर्वायोजनस्य प्रेरणा अथर्ववेदस्य चतुरः कुम्भाष्चतुर्णा ददामीत्युल्लेखेन भवति।

तानिस्थानानि च सन्ति प्रयागराज-हरिद्वारः-उज्जैन-नासिकाख्यानानि। तथाहिकथ्यते

**पृथिव्यां कुम्भयोगस्य चतुर्धा भेद उच्यते**
**चतुःस्थले च पतनाद् सुधाकुम्भस्य भूतले।**
**विष्णुद्वारे तीर्थराजेऽवन्त्यां गोदावरीतटे**
**सुधाबिन्दु विनिक्षेपाद् कुम्भपर्वेति विश्रुतम्।।**

येताः चतस्रः नद्यः कुम्भायोजनाय सुप्रसिद्धाः वर्तन्ते-उत्तरप्रदेशे प्रयागराजे गंगा-यमुना- सरस्वतीनां पावनत्रिवेणिसंगमः। उत्तराखण्डे हरिद्वारे गंगानदीतीरे। महाराष्ट्रे नासिक क्षेत्रे गोदावरीनदीतीरे। मध्यप्रदेशे उज्जयिन्यां शिप्रानदीतीरे।

कुम्भायोजनं **अर्धकुम्भ-कुम्भ-पूर्णकुम्भ-महाकुम्भरूपेण** भवति। द्वादषवर्षेषु तृतीयवर्षे कुम्भस्य षष्ठवर्षे अर्धकुम्भस्य द्वादशवर्षे पूर्णकुम्भस्य तथा द्वादषपूर्णकुम्भानन्तरं अर्थात् चतुःचत्वारिंषदधिकैकषतवर्षानन्तरं महाकुम्भस्यायोजनं भवति। इत्थमस्मिन् वर्षे प्रयागे महाकुम्भस्यायोजनमस्ति।

इत्थंकुम्भस्य धार्मिकं सांस्कृतिकम् आध्यात्मिकं च महत्वं वर्तते। अत्र विशेषतः देशस्य दिगदिगन्तेभ्यः साधवः, संतजनाः, तपस्वितनः तीर्थयात्रिणः भक्ताश्चागच्छन्ति गंगास्नानेन, दानेन, पानेन, दर्शनेन च कृतकृत्याः जायन्ते। कुम्भपर्वायोजनं नदीसंस्कृतौ प्राप्यते। तत्र चतुर्षु स्थानेषु कुम्भायोजनं नद्याः संयोगोभवत्येव। कुम्भसमये नद्याः जलं सकारात्मकं, पावनं च भवति तत्र नद्यां स्नानेन जनाः पूताः पापरहिताः मोक्षप्रदः जायन्ते। भक्तानामियं धारणा भवति यत् कुम्भकाले गंगायां स्नानेन जनाः पापविनिर्मुक्ताः, जननमरणभवबंध नविमुक्ताः च भवन्ति।

---

# विजयतां मे सनातनकुम्भः



-डॉ. चन्द्रकान्तदत्तशुक्लः
राजकीयस्नातकोत्तरमहाविद्यालयः,
मुहम्मदाबाद-गोहना, मऊ-उ.प्र.।

कुं -कुत्सितम्, उम्भति -दूरयति अर्थात् पापमयं कुविचारान् दूरयति नाशयति यस्तथाभूतः कुम्भो नाम घटः, कम्बुग्रीवादिमत्कश्चित् पदार्थः। अमृतमादायोत्पत्तिकारणात् प्रसिद्धतमो जातः कुम्भः। विषयेस्मिन् पौराणिकी कथा प्रसिद्धा वर्तते यद् देवदानवैः सम्मिल्य समुद्रमन्थनं कृतं तस्माद् बहुविधानी वस्तून्यजायन्त। एतेषु कानिचन् देवैः कानिचन् दानवैः स्वीकृतम्। किन्तु अमृतकुम्भो यदा प्रादुर्भूतः तदा तत्प्राप्तये द्वयोःपक्षयोः प्रबलेच्छा जागृता तस्माद् विवादो जातः। विवादोयं द्वादशदिनानि प्राचलत्। देवानां द्वादशदिनानि मनुजानां द्वादशवर्षाणि भवन्ति। उक्तमपि 'देवानां द्वादशोहोभिर्मत्योद्वादशवत्सरैः।' विवादक्रमेस्मिन् यत्र यत्र कुम्भस्थापितः, तस्मादमृतबिन्दुमपतत् तत्र तत्र कुम्भपर्वः सम्मान्यते। एतेषां संख्या द्वादश वर्तते। आस्वादितश्चत्वारः अस्माकं मानवानां पापक्षयाय भारतभूम्यां भवन्ति। अष्ट च देवलोकेषु भवन्ति। किन्तु देवा अपि भारतभूम्यां सम्पत्स्यमानेषु सम्मिलितुम् आगन्तुञ्च लालायिताः भवन्ति। प्राप्यते हि विष्णुपुराणे- गायन्ति देवाः किल गीतकानि धन्यास्तु ते भारतभूमिभागे। स्वर्गापवर्गास्पदमार्गभूता भवन्ति भूयः पुरुषः सुरत्वात्।

अत्रेदमपि जिज्ञास्यमस्ति कुम्भपर्वस्य स्थानं किम्, कालश्च कः? उच्यते भूमौ यदा सुधास्यन्दं जातं तदा एकराशौ सूर्यचन्द्रगरूणां संयोगः आसीत्। अतः सूर्यचन्द्रबृहस्पतीनां यस्यां राशौ यस्मिन् वर्षे संयोगो भवति तदा कुम्भो भवति नान्यत्र।

**'सूर्येन्दुगुरुसंयोगस्तद्राशौ यत्र वत्सरे।**
**सुधाकुम्भप्लवे भूमौ कुम्भो भवति नान्यथा।।'**
**स्थानविषये प्राप्यते यत् गङ्गाद्वारे प्रयागे च धारा गोदावरीतटे।**
**कुम्भाख्यो यस्तु योगोयं प्रोच्यते शङ्करादिभिः।।**
**मेषराशौ सूर्यः, कुम्भराशौ गुरुश्चेत् हरिद्वारे उत्तमनामकुम्भोत्सवो भवति।**
**सिंहराशौ सूर्यचन्द्रौ भवतश्चेत् उज्जैन्यां भवति।**
**कर्कराशौ सूर्यचन्द्रगुरुश्चेति गोदावर्यास्तटे नासिके भवति।**
**मकरराशौ सूर्यः, वृषराशौगुरुश्चेत् माघमासेप्रयागे भवति।**
**अर्थात् हरिद्वारप्रयागोज्जैननासिकेति स्थानानि वर्णितानि।**
**अत्रविषये उक्तमस्ति यत् अश्वमेधसहस्रेभ्यो वाजपेयशतादपि।**
**पृथिवीदानलक्षाच्च कुम्भयोगो विशिष्यते।।**

अश्वमेधवाजपेयादियज्ञं विधातुं न सर्वैः शक्यते अतः किं करणीयमिति तत्फलं प्राप्तुं कुम्भपर्वाणि सन्ति।

अस्माकं सनातनधर्मे एतेषु स्थानेषु यात्रा, तत्र तत्र गङ्गायमुनाक्षिप्रागोदावरीषु स्नानस्य महत्फलं वर्णितमस्ति।

**सहस्रे कार्तिके स्नानं माघे स्नानशतानि च।**
**वैशाखे नर्मदास्नानं कुम्भस्नानेन तत्फलम्।**

साम्प्रतं प्रयागे महाकुम्भो वर्तते। प्रयागस्तु तीर्थराजो महातीर्थः कथ्यते। जगतो रोगायौषधमस्ति । अत्र प्रतिवर्षं माघमासे स्नानं कल्पवासादिकं कुर्वन्ति श्रद्धालवः। अत्र गङ्गायमुनासरस्वतीनां सङ्गमो विद्यते यश्च त्रिवेणी कथ्यते। गङ्गा भक्तिरूपा, यमुना कर्मरूपा सरस्वती ज्ञानरूपा सदा विराजते। एतदर्थं श्रद्धाभक्तिपूर्वकं स्नानदानादिकर्म क्रियते चेन्नूनमेव फलप्रदायकं स्यात्। यद्यप्यस्माकं समेषामपि जीवानां परमं लक्ष्यं भगवत्प्रीतिर्वर्तते तथाप्यत्र यद्यच्चिन्तितं मनोरथं तत्सर्वमपि लभ्यते। 'यादृशी भावना यस्य सिद्धिर्भवति तादृशी। तथाप्यत्र कामक्रोधलोभमोहादिशत्रवः स्वतः शान्तिमधिगच्छन्ति। चञ्चलं मनः श्रद्धावद्भूत्वा सेवात्यागपरोपकारादिगुणान्येव समर्थयति संवर्धयति च। यदि भौतिकवैज्ञानिकतकनीकियुगादिकं मत्वा कश्चिदत्र न विश्वसिति चेत् सोप्यत्रागत्य प्राभावनिराशपूर्वकं हर हर गङ्गे जय जय गङ्गे ब्रुवाणो भविष्यति। अवसरोयं सर्वे भवन्तु सुखिनः, वसुधैवकुटुम्बकम् इत्यादिवाक्यानां साक्षात्कारस्य भवति। वयं मानवाः खलु, मानवत्वेन जीवने बहुविधानि अमानवीयानि कार्याण्यपि जायन्त एव, मनसा दूषितो जीवः सर्वविधं पापं कर्तुमुत्सहते, प्रवर्तते च किन्त्वत्र जातिप्रान्तभाषावर्णादिभेदाः प्रयागं दर्शं दर्शं कनिष्ठिकामधितिष्ठन्तः क्वचिदाश्रयम् अन्वेषयन्ति। यतोह्यत्र सर्वे एकस्मिन् सूत्रे गुम्फिताः दृश्यन्ते, एकस्मिन् मार्गे गच्छन्तः दृश्यन्ते, समानरूपेण तिष्ठन्तः दृश्यन्ते। अत एवोच्यते **'सर्वसिद्धिप्रदः कुम्भः'** ।

विचिन्त्यते मयात्र यद्येवमुत्सवाः पर्वाणि न स्युश्चेद् राष्ट्रभक्तिं, धर्माचरणं, कौटुम्बिकस्नेहं, त्यागभावं, जीवनयापनशैलीश्च कथं प्राप्नुयुर्मानवाः। कथं वा मानवो मानवो भूयात्। अतो राष्ट्रमेकीकर्तुं समाजे समरसतामानेतुम् अत्यन्तं महत्वपूर्णोयं सनातनो महाकुम्भः सदा विजयताम्। इति शम्।

# कुम्भोत्सवः : विश्वकल्याणचिन्तनसम्मेलनम्



-डॉ. शैलेश कुमार मिश्रः
अध्यक्षः, संस्कृतविभागः,
राजकीय-संस्कृत-महाविद्यालयः, राँची।

कुं पृथ्वीं भावयन्ति संकेतयन्ति भविष्यत् कल्याणादिकाय महत्याकाशे स्थिताः बृहस्पत्यादयो ग्रहाः यस्मिन् स कुम्भः, कुं पृथ्वीं उम्भति पूरयति मंगलादिभिः कल्याणादिभिः इति कुम्भः, कुं पृथ्वीं भावयति पोषयति विविधयागादिभिः इति कुम्भः, कं जलं उम्भति पूरयति अवर्षणादिदुर्भिक्षेभ्यो दूरयति इति कुम्भ इत्यादिभिर्विविध व्युत्पत्तिभिः कुम्भस्य माहात्म्यं स्वयमेव सिध्यति ।

पौराणिकसंदर्भेषु द्वादशसंख्याकानि कुम्भपर्वाणि प्रोक्तानि । तेषु चत्वारि मर्त्यलोके अष्टौ च देवलोके भवन्ति-

**देवानां द्वादशाहोभिर्मर्त्यैर्द्वादशवत्सरैः ।**
**जायन्ते कुम्भपर्वाणि तथा द्वादशसंख्यया ॥**
**पापापनुत्तये नृणां चत्वारि भुवि भारते ।**
**अष्टौ लोकान्तरे प्रोक्ता देवैर्गम्या न चेतरैः॥**

पृथिव्यां चतुर्षु स्थलेषु अमृतविन्दुविनिक्षेपादिदं कुम्भपर्व हरिद्वारे, तीर्थराजे प्रयागे, उज्जयिन्यां गोदावरीतीरे च समायोज्यते इति पुराणकारो वदति-

**पृथिव्यां कुम्भयोगस्य चतुर्धा भेद उच्यते ।**
**चतुःस्थले च पतनाद् सुधा कुम्भस्य भूतले ॥**
**विष्णुद्वारे तीर्थराजेऽवन्त्यां गोदावरीतटे ।**
**सुधाविन्दु-विनिक्षेपाद् कुम्भपर्वेति विश्रुतम् ॥**

**कुम्भोत्पत्तेः पौराणिकवृत्तान्ताः**

कुम्भोत्पत्तिविषये नैकाः पौराणिकगाथाः प्रचलिताः । तेषु सर्वाधिकप्रचलितो वृत्तान्तो वर्तते देवासुरसंग्रामस्य वृत्तान्तः। समुद्रमन्थनात् समुद्भूतेषु रत्नेषु एको धन्वन्तरिरपि आसीत् यो हि अमृतकलशमादाय सागरादुद्भूतः इति महाभारते प्रोक्तमस्ति-

**कलशश्च समुद्भूतो धन्वन्तरिकरोल्लसन् ।**
**मुखान्तं सुधया पूर्णः सर्वेषां हि मनोहरः ॥**
**धन्वन्तरिस्ततो देवो वपुष्मानुदतिष्ठत।**
**श्वेतं कमण्डलुं बिभ्रदमृतं यत्र तिष्ठति ॥**

(आदिपर्व-१८.३८)

अमृतकलशस्यास्यैव कृते देवासुरसंग्रामोऽभवत्। पश्चाच्च मोहिनीरूपधारिणा विष्णुना अमृतवितरणं कृतम्। अस्मिन्नेव कलहे कलशात् अमृतविन्दवः प्रयागस्य संगमे हरिद्वारस्य गंगायां उज्जयिन्याः शिप्रायां नासिकस्य गोदावर्यां च अपतन् । तस्मादेव कालात् तेषु स्थलेषु कुम्भस्य परम्परा आरब्धा । अमृतकुम्भस्य रक्षायां सूर्यश्चचन्द्रो बृहस्पतिश्च संलग्नाः आसन् अतएव एतेषां विशिष्टसंयोगे एव कुम्भपर्व समायोज्यते ।

एकः अन्यो वृत्तान्तः विष्णुपुराणे महर्षि दुर्वाससा सम्बद्धो वर्तते । दुर्वाससा इन्द्राय स्रगेका प्रदत्ता । इन्द्रस्ताम् ऐरावतस्य मस्तके स्थापयत् ऐरावतश्च तां भूमौ न्यपातयत्। अनेनापमानेन क्रुद्धो भूत्वा दुर्वासाः तं शप्तवान्। क्रुद्धदुर्वाससः शापात् भीषणदुर्भिक्षग्रस्तं जातमिदं जगत्। तदनन्तरं भगवता विष्णुना समुद्रमन्थनं कृतम् । समुद्रसमुद्भूतायाः लक्ष्म्याः एव कृपया वृष्टिरभूत् । तस्मान्निःसृतं अमृतकलशमादाय दानवाः नागलोके स्थापितवन्तः। गरुड़ो नागलोकात् तं कलशमानीतवान्। यात्राक्रमे यत्र यत्र सः कुम्भः मार्गे यत्र यत्र स्थापितः तानि एव स्थलानि कुम्भतीर्थस्थालानि अभवन् ।

तृतीया कथा इदमस्ति यन्महर्षि कश्यपस्य द्वे पत्न्यौ कद्रूविनते सर्वदा विवदमाने बभूवतुः। द्वाभ्यामेकदा एकः समयः कृतः। कद्रोः प्रपञ्चवशात् पराजिता सती विनता तस्याः दासी संजाता। कद्रुः तां कथितवती यत् यदि नागलोके संस्थापितममृतकुम्भं आनीय कश्यपऋषये दास्यसि तदैव तव दासतामपनेष्यामि। विनतासुतः गरुड़ः निजमातुः दासत्वमुक्तये नागलोकादमृतकुम्भमानीतवान्। यात्रायां यत्र-यत्र अमृतकलशः स्थापितः तान्येव स्थलानि कुम्भतीर्थस्थलानि संजातानि। कुम्भतीर्थस्य स्थलानि प्रयागराजो नासिकः उज्जयिनी हरिद्वारश्च वर्तन्ते। अमृतकुम्भस्य तस्य रक्षायां तत्पराः बृहस्पतिः सूर्यः चन्द्रश्च क्रमशः मेषसिंहकुम्भादिषु राशिषु भ्रमन्तः आसन् अतः ग्रहाणां राशीनामेष संयोग एव कुम्भस्य कालनिर्धारकोऽभवत्।

**१.हरिद्वारे कुम्भपर्व**

यदा बृहस्पति कुम्भराशौ सूर्यश्च मेषराशौ भवतः तदा हरिद्वारे कुम्भपर्व भवति यथा पुराणकारस्य वचनमिदम्-

**पद्मिनीनायके मेषे कुम्भराशिगते गुरौ ।**
**गंगाद्वारे भवेद्योगः कुम्भनामा तदोत्तमः ॥**

**२.प्रयागे कुम्भपर्व**

यदा खलु बृहस्पतिः वृषस्थः सूर्यश्च मकरस्थः भवति तदा प्रयागे कुम्भपर्व सम्पद्यते इति पुराणवचनमिदम्-

**मकरे च दिवानाथे वृषराशिगते गुरौ ।**
**प्रयागे कुम्भयोगो वै माघमासे विधुक्षये ।**

प्र उपसर्गः प्रकृष्टतायाः उत्कृष्टतायाः वा वाचको वर्तते । यागश्च यज्ञ इति । प्रयागे ब्रह्मणा यागो विहितः तस्मात्प्रयाग इत्यभिहितः-

**गंगायमुनयोर्वीर संगमं लोकविश्रुतम्**
**यत्रायजत भूतात्मा पूर्वमेव पितामहः ।**
**प्रयागमिति विख्यातं तस्माद् भरतसत्तम**॥ (वनपर्व ८७.१८)

सरित्संगमस्थलानि यज्ञस्य विशिष्टस्थानानि आसन् अतएव प्रयागनाम्ना अभिहिताः उत्तराखण्डे पञ्च प्रयागाः - देवप्रयागः

शेषभागः द्वादशपुटे



अष्टमपुटस्य शेषभागः

# भारतीया कुम्भमेलापरम्परा.....

मोक्षं प्रापयति।

हरिद्वार-कुम्भः - पुराणेषुहरिद्वारो गंगाद्वार इति उच्यते। स्कन्दपुराणे उक्तमस्ति यद् यदा बृहस्पतिः कुम्भराशौतथा सूर्यः मेषराशौ स्थितः भवति तदा हरिद्वारे कुम्भस्नानं भवति।

**पद्मिनीनायके मेषे कुम्भराशिगते गुरौ। गङ्गाद्वारे भवेद् योगः कुम्भनामा तदोत्तमः।।**

उपर्युक्तस्य कुम्भयोगस्य विषये विष्णुपुराणे अपि तथैव उल्लेखः प्राप्यते। परन्तु कस्यचिद् अन्यस्य मतस्य अनुसारं वसन्तर्तौ यदा बृहस्पतिः कुम्भराशौ भवति तदा हरिद्वारकुम्भ-स्नानस्य उत्तमः योगः भवति -

वसन्ते विषुवे चौव घटे देवपुरोहिते। गङ्गाद्वारे च कुम्भाख्यः सुधामेति नरो यतः।।

एवमपि मान्यता वर्तते यद् यदा बृहस्पतिः कुम्भराशिस्थः भवति सूर्यः च मेषराशिस्थः भवति तदा हरिद्वारे कुम्भ-स्नानं क्रियते चेत् पुनर्जन्म न भवति।

**कुम्भराशिगते जीवे तथा मेषे गते रवौ। हरिद्वारे कृतं स्नानं पुनरावृत्तिवर्जनम्।।**

कुम्भस्नानस्य नियतदिनानि - यद्यपि प्रयागादिषु कुम्भक्षेत्रेषु मासं यावत् कुम्भमेला प्रचलति तथापि तस्मिन् मासावधौ कतिपयेषु दिनेषु एव कुम्भस्नानं नियतं भवति। यद्यपि मासपर्यन्तं स्नानस्यापि महत्त्वं भवति तथापि विशेषस्नानदिनेषु स्नानस्य विशेषलाभाः भवन्ति। प्रयागे, नासिके, हरिद्वारे च त्रीणि कुम्भस्नानानि भवन्ति।किन्तु उज्जयिन्यां तु एकस्मिन् दिने एव स्नानं भवति। यदि वयं सर्वान् कुम्भान् एकीकृत्य विचारयामः तर्हि कुम्भोत्सवस्य विशेषदिनेषु मकरसंक्रान्तिः, पौषपूर्णिमा, एकादशी, मौनी-अमावस्या, वसन्तपञ्चमी, रथसप्तमी, माघी पूर्णिमा, भीष्म-एकादशी, महाशिवरात्रिः, विषुवसङ्क्रान्तिः च कुम्भयोगेषु अन्तर्भवन्ति।

प्रयागस्य मुख्यस्नानानि - प्रयागे मुख्यतया कुम्भयोगेषु त्रीणि स्नानानि भवन्ति - प्रथमं स्नानं मकरसंक्रान्तौ, द्वितीयं माघ-कृष्ण-मौनी-अमावस्यायां, तृतीयं शुक्लवसन्तपञ्चम्यां चेति निर्धारितम् अस्ति। प्रयागे तेषु दिनेषु स्नानस्य कीदृशं फलं भवतीति पुराणेषु एवं वर्णितमस्ति -

**प्रयागे माघमासेषु त्र्यहं स्नानस्य यद् भवेत्। नाश्वमेधसहस्रेण तत्फलं लभते भुवि।।**
**प्रयागे माघमासे तु त्र्यहं स्नानस्य यद् भवेत्। तद् वक्तुमीश्वरो वेत्ति मद्विधैः किन्तु कथ्यते।।**
**प्रयागे माघमासे यः त्र्यहं स्नाति स मानवः। पापं त्यक्त्वा दिवं याति जीर्णत्वचमिवोरगः।।**

कुम्भस्नानस्य लाभाः- प्रयागे कुम्भस्नानस्य लाभाः अनेकेषु पुराणेषु एवं वर्णिताः सन्ति। तद् यथाप्रयागे कुम्भस्नानमात्रेण कार्तिके सहस्रस्नानानांफलं, माघे शतस्नानानांफलं, वैशाखमासे नर्मदानद्यां कोटिस्नानानां च फलं सिद्ध्यति ।

**सहस्रं कार्तिके स्नानं माघे स्नानशतानि च। वैशाखे नर्मदाकोटिः कुम्भस्नानेन तत्फलम्।।**

दशवर्षपर्यन्तम् उपवासं नियमं च कृत्वा मनुष्यः यत् फलं प्राप्नोति तत् प्रयागे कुम्भस्नानत्रयं कृत्वा प्राप्तुं शक्यते।

**यत्फलं दशभिर्वर्षैः प्राप्यते नियमैर्नरः। तत्फलं प्राप्यते कुम्भे त्र्यह-स्नानान्न संशयः।।**

प्रयागे कुम्भ-स्नानस्य लाभस्य विषये परम्परायां कश्चन चमत्कारिकः श्लोकः लभ्यते, यस्य आशयः एवं भवति - गङ्गायमुनयोः पवित्रजलराशिःस्व-कल-कल-नाद-माध्यमेनरटन्नस्ति यत् माघमासे सूर्यस्यईषदुदये सतियदि महापापी अपि अस्मिन् जले निमज्जति तर्हि वयं तम् अपि शुद्धं कुर्मः।

**माघमासे रटन्त्यापः किञ्चिदभ्युदिते रवौ। महापातकिनं चापि कं पतन्तं पुनीमहे।।**

एवमेव प्रयागस्य कुम्भ-स्नानस्य महत्त्वविषये अन्येनापि अद्भुतेन साहित्यिकश्लोक-माध्यमेन व्याख्या कृता अस्ति - प्रयागस्य कुम्भपर्वणि स्नानमाचरतः जनान् दृष्ट्वा स्वयं पापमपि भयम् अनुभवति यद् यदि अयं मनुष्यः (मानवः) स्नानं करिष्यति तर्हि वयं विनंक्ष्यामः।

**वेपन्ते सर्वपापानि कुम्भस्नान-समागमे। नाशकालोऽयमस्माकं यदि स्नास्यति वारिणि।।**

विष्णुपुराणे अपि प्रयाग-कुम्भस्नानस्य लाभस्य विषये एवम् उल्लेखः लभ्यते - ये लाभाः सहस्रशः अश्वमेधयज्ञैः, शतशः वाजपेयीयज्ञैः, एकलक्षवारं पृथिव्याः प्रदक्षिणेन प्राप्यन्तेते सर्वे लाभाः केवलम् एकेन कुम्भस्नानेन एव प्राप्तुं शक्यन्ते।

**अश्वमेधसहस्राणि वाजपेयशतानि च। लक्षं प्रदक्षिणा भूमेः कुम्भस्नानेन तत्फलम्।।**

पद्मपुराणे च उक्तं वर्तते यत् माघमासे प्रयागे स्नानत्रयस्य लाभः अश्वमेधयज्ञसहस्रेण अपि न लभ्यते।

**प्रयागे माघमासेषु त्र्यहं स्नानस्य यद् भवेत्। नाश्वमेधसहस्रेण तत्फलं लभते भुवि।।**

एवमेव नासिककुम्भस्य परिणामस्य विषये अपि ब्रह्मवैवर्तपुराणे उक्तं वर्तते यद् एकेन अश्वमेध यज्ञेन एकलक्षगोदानेन च प्राप्तव्यः लाभः केवलं गोदावरीस्नानमात्रेण प्राप्तुं शक्यते यदि बृहस्पतिः सिंहराशिस्थः अस्ति अर्थाद् यदि कुम्भस्य योगःअस्ति।

**अश्वमेधफलं चौव लक्षगोदानजं फलम्। प्राप्नोति स्नानमात्रेण गोदायां सिंहगे गुरौ।।**

आध्यात्मिक्यः दार्शनिक्यः च अवधारणाः -कुम्भेन चतुर्वर्गफलप्राप्तिः सम्भवति। धर्मार्थकाममोक्षाश्च कुम्भे स्वतः प्रतिष्ठिताः सन्ति। भक्ताः धर्मं वाञ्छन्ति चेद् वणिजश्चार्थकामिनः भवन्ति। तथा नैके कामकामिनः भवन्ति। किन्तुविरलाश्च मोक्षमिच्छन्ति।एषां चतुर्णां वर्गाणां मध्ये मोक्षः श्रेष्ठः अस्ति।यस्य कस्यापि दर्शनस्य परमं लक्ष्यं मोक्षप्राप्तिः एव भवति। वस्तुतः न केवलं स्वर्गः अपितु मोक्षः अपि कुम्भद्वारा सम्भवति। अतः कुम्भस्य आध्यात्मिक-दार्शनिक-अवधारणानां विषये चर्चा आवश्यकी। कुम्भस्नानस्य लाभवर्णनप्रसङ्गे उज्जयिन्यां कुम्भस्नानेन मोक्षः भवति इति मन्यते।

**उज्जयिन्यां भवेत् कुम्भः सदा मुक्तिप्रदायकः।**
**धारायां च तदा कुम्भो जायते खलु मुक्तिदः।।**

एवमेव हरिद्वारे कुम्भस्नानम् अपि पुनर्जन्मनिवारयतिइत्येतादृशी शास्त्रमान्यता वर्तते।

एवम् उपसंहाररूपेण वक्तुं शक्यते यद् वस्तुतः भारतीयकुम्भपरम्परायाः विषये न केवलं शोधपत्राणि किन्तु स्वतन्त्राणि पुस्तकानि अपि लेखितुं शक्यन्ते।वस्तुतः कानिचन पुस्तकानि पूर्वमपि लिखितानि सन्ति। परन्तुसीमितकलेवरे अस्मिन् आलेखे एतस्मात् अधिकं कर्तुमवसरो नास्तिइत्यतः विरम्यते विस्तरात्।







# तीर्थराजे प्रयागे महाकुम्भोत्सवस्य माहात्म्यम्



-प्रो.राजेन्द्र त्रिपाठी 'रसराजः'
प्रयागराजतः

तीर्थराजप्रयागे अस्मिन् वर्षे माघमासे महाकुम्भोत्सवः शासननिर्देशने दिव्यः भव्यः डिजिटल महाकुम्भेति नाम्ना समायोज्यते। वस्तुतः तीर्थराजे प्रयागे प्रतिवर्षे माघमासे माघमेलापकः इति मन्यते। तस्मिन्नपि साधुसन्तमहन्तगृहस्थादिभिः माघमासपर्यन्तं कल्पवासः क्रियते, विविधा- व्यवस्थापि शासन-प्रशासन द्वारा सम्पाद्यते। अस्मिन् वर्षे तु द्वादशवर्षे जाते महाकुम्भोत्सवस्य पुण्यपर्व बहुविस्तारैः समायोज्यते। अस्य प्रचारः- प्रसारः डिजिटलमाध्यमेन समस्त- विश्वेऽपि संप्रेष्यते। ज्योतिषगणनानुसारेण माघमासे यदा सूर्यचन्द्रौ मकरराशौ स्थितौ जातौ वृष- राशौ देवगुरुः वृहस्पतिः स्थितः भवति तदा तीर्थराजे प्रयागे महाकुम्भोत्सवः समायोज्यते । इयं परम्परा प्राचीनकालादेव प्रसिद्धास्ति। स्मृतिग्रन्थेषु श्लोकोऽयं प्रसिद्धोऽस्ति-

**मेषराशि गते जीवे मकरे चन्द्रभास्करौ।**
**अमावस्यां तदा योगः कुम्भाख्यतीर्थनायके।।**
**मकरे च दिवानाथे वृषगे च वृहस्पतौ।**
**कुम्भयोगो भवेत तत्र प्रयागे ह्यति दुर्लभः।।**
**माघे वृषगते जीवे मकरे चन्द्रभास्करौ ।**
**अमावस्यां यदा योगः कुम्भाख्यस्तीर्थनायके।**

कुम्भपर्वणः आयोजनं किमर्थं भवति एतद्विषये महाभारते पुराणेषु च कथयं प्रसिद्धास्ति यत् यदा देवासुरसंग्रामे समुद्रमन्थनं कृतं तदैव सागरमन्थनादेव चतुर्दश- महारत्नानि जातानि। अन्ते च यदा अमृतकुम्भः जातः तदा तस्य रक्षार्थमेव भगवता विष्णुना मोहिनीरूपमाधृतः तथा च देवेन्द्रात्मजः जयन्तः अमृकुम्भमुत्क्षिप्य पलायितः। भारतस्य यस्मिन् यस्मिन् स्थलेषु स कुम्भः स्थापितः तेषु तेषु स्थलेषु किञ्चिदमृतबिन्दुपतनादेव कुम्भस्य पुण्यायोजनं समारब्धम्। तेषु पवित्रस्थलेषु तीर्थराजः प्रयाग- हरिद्वार-उज्जयिनी -नासिक च एतेषु चतुस्थलेषु कुम्भस्यायोजनं समारब्धम् । यथा श्लोकेऽस्मिन् द्रष्टव्यम्-

**पृथिव्यां कुम्भयोगस्य चतुर्धा भेद उच्यते।**
**चतुस्थले च पतनाद् सुधाकुम्भस्य भूतले।**
**विष्णुद्वारे तीर्थराजेऽवन्त्यां गोदावरीतटे ।**
**सुधाबिन्दुविनिक्षेपाद् कुम्भपर्वेति विश्रुतम्।।**
**तस्मात्कुम्भात्समुत्क्षिप्त सुधाबिन्दुर्महीतले।**
**यत्रयत्रापतत्तत्र कुम्भपर्व प्रकल्पितम्।।**

अमृतकुम्भस्य रक्षार्थमेव चन्द्रः कुम्भं पतनात्, सूर्यो विस्फोटनात्, वृहस्पतिः दैत्येभ्यः अपहरणात् शनिश्च कदाचित् जयन्तः स्वयमेव न अमृतं पातुं न प्रयत्नशीलः स्यात् अतएव तस्य कुम्भस्य रक्षादायित्वं सर्वैः निर्वाहितम्। श्लोकोऽयं प्रसिद्धोऽस्ति-

**चन्द्रः प्रस्रवणात् रक्षा सूर्यो विस्फोटनादधौ।**
**दैत्येभ्यश्च गुरुः रक्षा सौरिः देवेन्द्रजात् भयात्।।**

अस्मिन्वर्षे तीर्थराजे प्रयागे द्वादशकुम्भस्यान्त्तरं चतुश्चत्वारिंशतधिकं शतम् वर्षान्तरे एषकुम्भस्य समागते सति अद्भुद् संयोगः संप्राप्यते।

**देवानां द्वादशैर्भिमर्त्यैं द्वादशवत्सरैः।**
**जायन्ते कुम्भपर्वाणि तथा द्वादशसंख्यया।।**

भारतीयसंस्कृतौ कुम्भः सृष्टेः प्रतीकः मन्यते। यथा कुम्भकारः पञ्चतत्त्वेन कुम्भस्य घटस्य वा निर्माणं करोति तथैव विधातापि पञ्चतत्त्वेन सृष्टिसर्जनां विदधाति।कुम्भस्य विषये कथितम् यत्-

**कलशस्य मुखे विष्णुः कण्ठे रुद्रो समाहितः।**
**मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः।**
**कुक्षौ तु सागराः सर्वे सप्तद्वीप वसुन्धरा।**
**ऋग्वेदोऽथ यजुर्वेदो सामवेदो अथर्वणः।**
**अङ्गैश्च संहिताः सर्वे कलशे तु समाश्रिताः ।।**

अथर्ववेदे प्राप्यते यत्-

चतुरः कुम्भां चतुर्णा ददामि, क्षीरेण पूर्णान् उदकेन दध्मः ।

तीर्थराजे प्रयागे, महाकुम्भस्य माहात्म्यं अति विशिष्टं भवति यतोहि प्रयागराजे परमपिताब्रह्मणा स्वयमेव देवैः सह प्रकृष्टो यागः सम्पादितः। प्रकृष्टो यागः सः प्रयागः इति प्रयागस्य महत्त्वं प्रतिपादयति। महाभारतस्य वनपर्वणि समुल्लिखितोऽस्ति-

**'यत्रायजत् भूतात्मा पूर्वमेव पितामह।**
**प्रयागमिति विख्यातं तस्माद् भरत सत्तत्।।**

महाभारत ,वनपर्व ८५/७९

**मत्स्यपुराणेऽपि प्रयागस्य अयमेवार्थः कृतः -**
**'प्रभावात् सर्वतीर्थेभ्यो प्रभवत्यधिकं विभो'**

ब्रह्मपुराणेऽपि स्पष्टरूपेण प्रयागस्य सर्वश्रेष्ठत्वं महत्त्वं प्रतिपादितम् - प्रकृष्टत्वात् प्रयागोऽसौ प्राधान्याद् राजशब्दवान्'

अस्माद् कारणादेव तीर्थराजः प्रयागः प्रयागराजः इति कथ्यते। जनपदरूपेणापि प्रयागोऽयं पुनरपि प्रयागराजः इति प्रतिष्ठापितः। एवञ्च प्रभावात् सर्वतीर्थेभ्यो प्रभवत्यधिकं विभो -अग्निपुराणे उल्लिखितोऽस्ति वेदाः यज्ञाश्च अस्मिन्नेव प्रयागे मूर्तिमन्तः आसन् यथा- ष्त्र वेदाञ्च यज्ञाश्च मूर्तिमन्तः प्रयागके'

मत्स्यपुराणे वर्णितमस्ति यत् पृथिव्यां षष्टिकोट्यदशसहस्र तीर्थानां स्थितिः जायते माघमासे प्रयागे- यथा

**दशतीर्थ सहस्राणि षष्टिकोट्यतथापराः।**
**तेषां सन्निध्यमत्रैव तत्रस्तु कुरुनन्दन।।**
**ब्रह्मपुराणेऽपि माघमासे प्रयागस्य माहाम्यं द्रष्टुं शक्यते-**
**पृथिव्यां यानि तीर्थानि पुर्यः सप्त याः पुनः ।**
**येषां स्नातुं समायान्ति माघे मासि याः पुन।।**

ये जनाः अस्मिन् तीर्थक्षेत्रे सङ्गमे स्नानं कुर्वन्ति, शरीरं परित्यजन्ति ते अमृतत्वमाप्नुवन्ति-प्रसिद्धोऽस्ति पद्योऽयम् -

**सितासिते सरिते यत्र संगते तत्राप्लुतासौ दिवमुत्पतन्ति ।**
**ये वै तन्वं विसृजन्ति धीरास्ते जनासो अमृतत्वं भजन्ते।।**

महाभारते माघमासे अमावस्यां तिथौ तीर्थराजे प्रयागे तिस्रकोट्यः दशसहस्राणि तीर्थानि समायान्ति यथा द्रष्टव्योऽयं श्लोकः-

**षष्टिह्रद उपस्पृश्य चान्न दानाद् विशिष्यते।**
**दशतीर्थसहस्राणि तिस्र कोट्यस्तथापरा।।** अनुशासनपर्व

माघमासे रामायणस्य कथाश्रवणं वाचनमपि बहुफलप्रदं मन्यते-

**माघे मासे सिते पक्षे रामायणं प्रयत्नतः।**
**नवाह्ना किल श्रोतव्यं सर्वधर्म फलप्रदम्। वा.रा. तृतीय अध्याय**

विष्णुपुराणे वर्णितमस्ति यत् तीर्थराजे प्रयागे माघमासे ब्राह्मण-क्षत्रिय-शूद्र-प्रतिलोम-अनुलोम-ब्रह्मचर्याद्याश्रमा

स्नानं कृत्वा स्वकीयान् मनोकामनान् सम्पूरयन्ति।पुराणेषु निगदितम् यद् यथा विष्णोः भक्तानां कृते सपर्यायाः सर्वाधिकारः वर्तते तथैव माघमासे सर्वजनैः स्नानादि. कल्पवासः सम्पादयितुं सम्पूर्णाधिकारः भवति- यथा

**'ब्राह्मणाः क्षत्रिविद्शूद्राः प्रतिलोमानुलोमजाः ।**
**आश्रम ब्रह्मचर्याद्या माघे स्नान्ति मुनीश्वराः।**
**यथाऽधिकारं सर्वेषां विष्णुभक्तो बुधैः स्मृतः।**
**माघस्नाने तथा ज्ञेयो नात्र कार्याविचारिणा।**

एवञ्च प्रयागराजे महाकुम्भस्य स्नानं दानं च अति महत्त्वपूर्णं मन्यते । पद्मपुराणे कथितम्-

**स्नाताश्च ये मकरभास्करोदये तीर्थे प्रयागे सुरसिन्धुसङ्गमे।**
**तेषां गृहद्वारमलङ्करोति किं भृङ्गावलिःकुञ्जरकर्णताडिता।**
**यो राजसूयाद्धयमेधयज्ञतःस्नातफलं संप्रददाति चाधिकम्।**
**पापानि सर्वाणि विलोप्य लीलया नूनं प्रयागः स कथं सेव्यते।।**

तीर्थराजे प्रयागे मुख्यरूपेण पञ्चपर्वण्येव स्नानं दानं महत्त्वपूर्णं फलप्रदं च मन्यते- पौषपूर्णिमा,मकरसंक्रान्तिः,मौनी अमावस्या, वसन्तपञ्चमी,माघीपूर्णिमा च। एताः तिथयः एव प्रमुखाः सन्ति।महाभारते निगदितं यत् प्रयागः देवानां सुसंस्कृता यज्ञभूमिः तत्र अल्पमपि दानं श्रेयस्करं भवति।यथा-

**एका यजनभूमिर्ह देवानामिह संस्कृता।**
**तत्र दत्तं सूक्ष्ममपि महद् भवति भारत!**

अथ च पद्मपुराणे प्रयागशताध्यायी इति नाम्ना पृथगेव लघुप्रयागपुराणः लिखितः यस्मिन् तीर्थराजप्रयागस्य माहात्म्यं बहुविस्तृतं वर्णनं दृश्यते -

**यत्राप्लुतानां न यमो नियंता यत्रस्थितानां सुगतिप्रदाता।**
**यत्राश्रितानाममृतप्रदाता स तीर्थराजो जयति प्रयागः ।।**
**सितासिते यत्र तरंगचामरे नद्यौ विभाते मुनिभानुकन्यके।**
**नीलातपत्रं वट एव साक्षात् स तीर्थराजो जयति प्रयागः ।।**
**श्रुतिः प्रमाणं स्मृतयः प्रमाणं पुराणमप्यत्र परं प्रमाणम्।**
**यत्रास्ति गङ्गा यमुना प्रमाणं स तीर्थराजो जयति प्रयागः।।**
**न यत्र योगाचरणप्रतीक्षा न यत्र यज्ञेष्टि विशिष्ट दीक्षा ।**
**न तारकज्ञान गुरोरपेक्षा स तीर्थराजो जयति प्रयागः ।।**
**चिरं निवासं न समीक्षते यो ह्युदारचित्तः प्रददाति कामान्।**
**यः कल्पितार्थञ्च ददाति पुंसां स तीर्थराजो जयति प्रयागः।।**
**तीर्थावली यस्य तु कण्ठभागे दानावली वल्गति पादमूले ।**
**व्रतावली दक्षिण बाहुमूले स तीर्थराजो जयति प्रयागः।।**
**अज्ञाः सुविज्ञाः प्रभवोऽपि यज्ञाः सप्तत्वपिद्वाः सुकृतानभिज्ञः ।**
**विज्ञापयन्तः सततं हि काले स तीर्थराजो जयति प्रयागः।।**

एवञ्च तीर्थराजे भारद्वाजाश्रमस्य द्वादशमाधवस्य, वासुकितीर्थस्य, तक्षकेश्वरतीर्थस्य, वटवृक्षस्य,पातालपुर्याः सरस्वतीकूपस्य, समुद्रकूपस्य, हंसप्रपतनतीर्थस्य, वेणीमाधवस्य, सङ्ममतटे हनुमन्महाबाहोः ,सोमेश्वरमहादेवस्य, मनकामेश्वरस्य, दशाश्वमेधशिवालयस्य दर्शनं अतीव पुण्यदायकं फलप्रदं च मन्यते।

**त्रिवेणीं माधवं सोमं भारद्वाजं च वासुकिं ।**
**वन्दे अक्षयवटं शेषं प्रयागं तीर्थनायकम्।।**

विशेषरूपेण महाकुम्भोत्सवस्यावसरे तीर्थराजे साधुसन्तमठमहन्ताः पीठाधीश्वराः नागासन्ताः समागताः ते सर्वे आकर्षणप्रमुखाः सन्ति। कुम्भकाले स्मिन्विविधा : आकर्षकाः सुसज्जिताः दिव्यमण्डपाःदर्शनीयाः सन्ति।बहवः कल्पवासिनः कथावाचकाः कलाविदाः समागत्य प्रवासं कुर्वन्ति, उपदिशन्ति, मनोरञ्जयन्ति। आस्थावन्तः भक्ताः सुदूराद्देशाद्द्वैव समागत्य निवसन्ति, विचरन्ति, भ्रमन्ति च। चतुर्दिशि कीर्तनं भजनं भवति, यज्ञस्यानुष्ठानं भवति । देशविदेशस्य महान्तः विशिष्टाः पुरुषाः अत्रैवागत्य निवसन्ति, स्नानं दानं च कुर्वन्ति, कथां श्रृणवन्ति ,स्वकीयां श्रद्धां भक्तिं च प्रकटयन्ति आनन्दं च गृहणन्ति। तीर्थराजे प्रयागे महाकुम्भकालेस्मिन् रात्रौ अति रमणीयं दृश्यं दृश्यते। विद्युच्छटामवलोक्य मन्ये स्वर्गः स्वयमेव अत्रैवागत्य शोभां विकीरयति। सूर्य-शशी तारकमण्डलैः सह समागत्य तीर्थक्षेत्रस्य शोभां संवर्धयतः। देवाः स्वयमेव साधुसन्तस्वरूपमाधृत्य अत्रैव विराजन्ते। ऋषयः महर्षयः सर्वेऽपि अत्रैवागत्य तपश्चरन्ति, लोकान् सदुपदिशन्ति। गन्धर्वाः किन्नराः अत्रैव समागत्य लीलां प्रदर्शयन्ति।विस्तीर्णमण्डपेषु कथावाचकाः प्रवचनं कुर्वन्ति ,कलाकोविदाः स्वकीयां कलां प्रदर्शयन्ति। शासनप्रशासनद्वारा दिव्यभव्यडिजिटलमहाकुम्भस्य आयोजनं भवति।इदानीं प्रयागे महाकुम्भोत्सवः समस्त विश्वस्याकर्षण- केन्द्रं मन्यते।सर्वसिद्धिप्रदः कुम्भः समेषां लोकानां कृते सर्वप्रकारेण मंगलप्रदः स्यात् इति शुभकामनां सम्प्रेष्य प्रणमामि तीर्थराजं प्रयागम्।

---

दशमपुटस्य शेषभागः

## कुम्भोत्सवः विश्वकल्याणचिन्तनसम्मेलनम्....

रुद्रप्रयागः कर्णप्रयागः नन्दप्रयागः विष्णुप्रयागश्च अलकनंदया सह विविधनदीनां संगमः। प्रयागानां राजा प्रयागराज यतो हि तत्र तिसृणां नदीनां संगमो वर्तते। प्रयागराजे गंगायमुनासरस्वतीनां तिसृणां सरितां संगमः त्रिवेणीत्यभिहिता ख्रष्कारे त्रयो वर्णाः सन्ति अकारः उकारः मकारश्च ये खलु क्रमेण सरस्वतीयमुनागंगानां द्योतकाः सन्ति ।

**ओमित्येकाक्षरं ब्रह्म परब्रह्माभिधायकम् ।**
**तदेव वेणी विज्ञेया सर्वसौख्यप्रदायिनी।।**
**अकारः शारदा प्रोक्ता प्रद्युम्नस्तत्र जायते।**
**उकारो यमुना प्रोक्ताऽनिरुद्धस्तज्जलात्मकः।।**
**मकारो जाह्नवी गंगा तत्र संकर्षणो हरिः ।।**

**३. नासिके कुम्भपर्व**

सिंहस्थे बृहस्पतौ कर्कस्थे च सूर्ये गोदावरीतीरे नासिके कुम्भपर्व सम्पद्यते इति पौराणिकवचनमिदम् ।

**कर्कराशिं गते सूर्ये सिंहराशौ बृहस्पतौ**
**गोदावर्यां भवेत्कुम्भः भक्तिमुक्तिप्रदायकः ।।**

**४. उज्जयिन्यां कुम्भपर्व**

बृहस्पतौ सिंहस्थे मेषस्थे च सूर्ये शिप्रातटे उज्जयिन्यां कुम्भः समायोज्यते -

**सिंहराशिगते जीवे मेषस्थे च दिवाकरे ।**
**तुलाराशिगते चन्द्रे स्वातिनक्षत्रसंयुते ।।**

बृहस्पतिजीवनवर्धकः पिण्डो वर्तते यस्मात् जीवनवर्धिनी ऊर्जा पृथिव्यां समायाति अतः ज्योतिषशास्त्रे एष 'जीव' नाम्ना अपि अभिहितः। एष कुम्भोत्सवः सिंहस्थकुम्भः इत्यभिधीयते ।

नासिकोज्जयिन्योः कुम्भोत्सवयोर्मध्ये कालान्तरो द्वादशमासादपि किञ्चिन्न्यूनतरं भवति यतो हि द्वयोरायोजने बृहस्पतिः सिंहस्थो भवति तथा च नासिके सूर्यः कर्कस्थः उज्जयिन्यां मेषस्थः भवति। कुम्भोत्सवायोजनस्य चक्रीयः क्रमः प्रयागे नासिके उज्जयिन्यां हरिद्वारे इत्येवं वर्तते ।

**कुम्भराशिं गते जीवे तथा मेषे गते रवौ ।।**
**हरिद्वारे कृतं स्नानं पुनरावृत्तिवर्जनम् ।।**

इति पुनरावृत्तिवर्जनप्रदो मोक्षप्रदः कुम्भोत्सवोऽयं सांस्कृतिकं धार्मिकम् आध्यात्मिकं च सम्मेलनं कथयितुं शक्यते यत्र विविधशास्त्रपारावारपारीणानां तपोनिरतानां संन्यासिनां संगमो भवति सत्संगो भवति अतएव एतद्दृशा अपि आयोज्यमानमिदं पर्व विश्वकल्याणचिंतनार्थं समायोज्यते । कुम्भपर्व नाम मानवमात्रस्य आध्यात्मिकोन्नतिप्रदमायोजनं अस्ति यत्र आगत्य मायामयजगतः प्रपञ्चाद्विमुक्तः मानवः आत्मसाक्षात्कारं करोति यत्खलु जीवनस्य परमोद्देश्यो वर्तते इति शम् ।

# सकलसिद्धिप्रदःकुम्भः




-डा. अम्बरीशकुमारमिश्रः
(सहायकप्राचार्यः)
भरतमिश्रसंस्कृतमहाविद्यालयः छपरा, बिहार


**दिवाकरस्योत्तरनिर्गते भे, समस्तपापप्रशमाय भक्ताः।**
**समाव्रजन्तीह यदीयभूमौ, स तीर्थराजो जयति प्रयागः।।**

सकलपापसंतापजन्यजननमरणादिरूपमर्त्यलोकयात्रोत्तीर्णाय धर्मार्थकाममोक्षमानवमात्रसमादरणीयपुरुषार्थचतुष्टयाञ्जस्येन संप्राप्त्यर्थं विष्णवादिसंसेवितशम्भुजटावस्थिताया: विष्णुपदी-जह्नुतनया-सुरनिम्नगा-भागीरथी-जाह्नवीत्यादिपा रेसहस्राभिधानविभूषिताया: किल्बिषकलङ्कप्रक्षालनमोक्षप्रदगङ्गादेव्या: नटवरवपुर्भगवच्छ्रीकृष्णचरणारविन्दकृपासमलङ्कृताया: कालिन्दी-सूर्यतनया-शमनस्वसा- तपनतनूजा-श्यामेत्याद्यनेकसञ्ज्ञाख्यापिताया: कलकलध्वनिगुञ्जायमानक्षणदर्शन-दुरितघ्नश्रीयमुनादेव्या: निगूढधारारूपेणावस्थिताया: जन्मजन्मान्तरीयनिगूढकल्मषभञ्जनसामर्थ्यविभूषिताया: सरस्वतीदेव्या: स्वर्गापवर्गसमभारतधवलधरापावनपुलिनसमवस्थिते श्रुतिस्मृत्यादिख्या-पितसकलतीर्थाधिपतितीर्थराजप्रयागे तीर्थसेवनकलाकुशलतीर्थयात्रिण: समायान्ति मकरराशिभास्करविभूषितपुण्यतममाघमासे।

**सेवेत गङ्गायमुनात्रिवेणीं, जपेत्तथामाधवपूतनाम।**
**पिबेत्कथां श्रीब्रजनन्दनस्य, समागते कुम्भभुवि प्रयागे।।**

स्कन्दपुराणस्य समुद्रमन्थनप्रसङ्गेन तथैवान्यपौराणिकाख्याने समायाति यत् समुद्रमन्थनं समुद्रस्थबहुमूल्यरत्नानामाप्त्यर्थं मन्दराचलरूपमथा देवासुराश्चक्रु:। तत: समुद्रमन्थनाच्चतुर्दशरत्नानि उत्पेतु:। तत्र प्रथमं कालकूटविषरत्नं चरमरत्नञ्चामृतकलशरूपेण प्रादुर्बभूव। अमृतकलशं संगृह्य मूढासुरा: झटिति पलायिता:। तममृतकलशं असुरेभ्य: देवा: संप्राप्त्यर्थमसुराणां पृष्ठेऽनुजगाम। तयोर्मध्ये भीषणविवादो जात:। तस्मिन्नेव मिथ:कर्षणानुकर्षणविवादे यत्र यत्र आर्यावर्तभूमावमृतविन्दव: निपतितास्तत्र तत्र महातीर्थेषु महाकुम्भपर्व समायोज्यते। तथा हि -

**विवादे काश्यपेयानां यत्र यत्रावनिस्थले।**
**कलशोऽभ्यपतद्यत्र कुम्भपर्व तदुच्यते।।**

देवासुराणां पीयूषप्राप्त्यर्थं संजायमान उद्योगावसरे (विवादकाले) अस्यामार्यावर्तपूतभूम्याम् ग्रहाधिपतिभास्कर:, देवगुरुबृहस्पति:, कर्कराश्यधिपतिचन्द्रश्च यत्र यत्र राश्याम् समातिष्ठत्, तत्र तत्र राश्यामिदानीन्तनेऽपि समायाते कुम्भमहापर्वण: संयोगो भवति। अत्रोच्यते

**सूर्येन्दुगुरुसंयोग: तद्राशौ यत्र वत्सरे।**
**सुधाकुम्भप्लवे भूमौ कुम्भो भवति नान्यथा।।**

इदं कुम्भमहापर्व प्रत्येकं महातीर्थे द्वादशे द्वादशे संवत्सरे समायोज्यते। मनुष्याणां द्वादशसंवत्सरं देवानाम् एकं दिनं भवति। अत एव देवानामपि देवदिनमानेन प्रत्यकं द्वादशदिने द्वादशपर्वाणि समुपलभन्ते। अनेन प्रकारेण मनुष्याणां प्रत्येकं द्वादशसंवत्सवरे तथा च देवानां प्रत्येकं द्वादशदिने कुम्भमहापर्व भवति। द्वादशस्थानेषु कुम्भमहापर्व समायोजितो भवति। तत्र चत्वारि महातीर्थानि मर्त्यलोके सौभाग्यादार्यावर्तभारतभूम्यां प्रतिष्ठन्ते, शेषमहातीर्थानि चान्यत्रावतिष्ठन्ते। निगद्यते च-

**तत्र नृणां समुद्धारे चत्वारि भुवि भारते।**
**अष्टौ लोकान्तरे प्रोक्ता देवैर्गम्या न चेतरै:।।**

अस्यां पवित्रतमभारतभूमौ चत्वारि महातीर्थानि एतादृशानि सन्ति, यत्र च कुम्भमहापर्वण: प्रत्येकं द्वादशसंवत्सवरे समारोह: संजायते। एतानि च महातीर्थानि निम्नलिखितानि सन्ति-

**गङ्गाद्वारे प्रयागे च धारा गोदावरीतटे।**
**कुम्भाख्यो यस्तु योगोऽयं प्रोच्यते शङ्करादिभि:।।**

अयमाशय:- हरिद्वारतीर्थे, तीर्थाधिपतिप्रयागे, महाकालेश्वरनगर्य्यामुज्जैन्यां क्षिप्राटे, गोदावरीनद्या: पूततमतीरे नासिकमहातीर्थे कुम्भनामके योगे (सूर्येन्दुगुरूणां ग्रहकदम्बानां शास्त्रनिर्दिष्टे यथायथं राशिस्थानस्थिते) कुम्भमहापर्वण: समायोजनं शङ्करादिभिर्निगद्यते।

कदा कुत्र सूर्यचन्द्रबृहस्पतीनां केन विधिना संयोगो भवति चेदायोज्यते चौतन्महाकुम्भपर्व-

हरिद्वारतीर्थे कुम्भमहापर्व-

यदा ग्रहाधिपतिसूर्य: मेषराश्यां , बृहस्पति: कुम्भराशौ संतिष्ठते तदा हरिद्वारतीर्थे कुम्भमहापर्वण: समारोह: समायोज्यते। तथा हि-

**पद्मिनीनायके मेषे कुम्भराशिगते गुरौ।**
**गङ्गाद्वारे भवेद्योग: कुम्भनामा तदोत्तम:।।**

तीर्थराजप्रयागे कुम्भमहापर्व-

मकरराशिगतसूर्य:, वृषराश्याञ्च देवगुरुबृहस्पति: चान्द्रमासो माघ: स्याच्चेदायोज्यते तीर्थराजप्रयागे कुम्भमहापर्वण: समारोह:। यथा-

अस्मिन्नैव वर्षे इदं कुम्भमहापर्व समायोजितं भविष्यति। अत्र प्रोच्यते-

**मकरे च दिवानाथे वृषराशिस्थिते गुरो:।**
**प्रयागे कुम्भयोगोऽयं माघमासे विधूदये।।**

उज्जैननगर्य्यां कुम्भमहापर्व-

यदा ग्रहाधिपतिसूर्य:, देवगुरुबृहस्पति: कर्कराश्यधिपतिश्चन्द्र एतेषां त्रिग्रहाणां सिंहराशाववस्थिति: संजायते चेदुज्जैननगर्य्यां महाकालेश्वभगवत: सन्निधाने क्षिप्रान्द्या: पवित्रतमपुलिने कुम्भमहापर्वण संयोगो भवति। निगद्यते चात्र-

**सिंहे गुरौ तथा सूर्ये सिंहे चौव निशाकरे।**
**तदाऽमायाञ्च धारायां कुम्भो भवति मुक्तिद:।।**

नासिकमहातीर्थे कुम्भमहापर्व-

यदा च कर्कराशौ कर्कराश्यधिपतिचन्द्र:, ग्रहाधिपतिसूर्य:, देवगुरुबृहस्पतिश्च संभवन्ति। तदैव अमावस्यां शुभपर्वणि कुम्भमहापर्वण: समायोजनं भवतीत्युच्यते आप्तजनैशिष्टैश्च-

**कर्के गुरुस्तथा भानु: चन्द्रश्चन्द्रक्षयो यदा।**
**गोदावर्यां तदा कुम्भो जायतेऽवनिमण्डले।।**

प्रत्येकं द्वादशसंवत्सरे आयोजनमेतच्चरीकृत्यते। अत्र महाकुम्भे स्नानस्य फलमनन्तं वर्तते। महाकुम्भस्नानस्य फलं पौराणिकग्रन्थेषु बहुधा व्याख्यातं वर्तते। तथा हि-

**सहस्रे कार्तिके स्नानं माघे स्नानशतानि च।**
**वैशाखे नर्मदास्नानं कुम्भस्नानेन तत्फलम्।।**

पारेसहस्रं कार्तिकमासस्नानेन, पारेशतं माघमासस्नानेन, तथैव वैशाखमासे नर्मदास्नानेन यदनन्तफलं लभ्यते, ततोऽपि अतिशयफलं सकृत्कुम्भस्नानेन समुपलभ्यते।

अपरञ्च

**अश्वमेधसहस्रभ्यो वाजपेयशतादपि।**
**पृथिवीदानलक्षाच्च कुम्भयोगो विशिष्यते।।**

अशेषफलदातृसहस्राधिकाश्वमेधयज्ञाद्यत्फलं लभते, श्रेष्ठशताधिकवाजपेययज्ञाद्यत्फलं लभते, सर्वोत्तमलक्षाधिकपृथिवीदानाद्यदनन्तगुणितमशेषफलं लभते, ततोऽनन्तगुणितं श्रेष्ठफलमेकदैव कुम्भमहापर्वणि गङ्गास्नानाच्च लभते।

गङ्गास्नानस्य चतुर्दशनियमा: पौराणिकग्रन्थेषु निरूपिता: सन्ति। नियमेनानेन गङ्गास्नानस्य अशेषपुण्यफलानि लभन्ते। यदि चैते नियमा: नैव पाल्यन्ते चेत्पुण्यस्य स्नाने पापानि एव प्रवर्धन्ते सुकृतानि च घ्नन्ति। नियमाश्चैते-

**गङ्गापुण्यजलं प्राप्य चतुर्दशविवर्जयेत्।**
**शौचमाचमनं केशं निर्माल्यमघमर्षणम्।।**
**गात्रसंवाहनं क्रीडां प्रतिग्रहमथोरतिम्।**
**अन्यतीर्थरतिं चैव ह्यन्यतीर्थप्रशंसनम्।।**
**वस्त्रत्यागमथाघातं संतारं च विशेषत:।।** इति शम्।।




# कुम्भ -माहात्म्यम्




-डॉ विजय कुमार शर्मा
सहायकाचार्य:वेद-विभागे
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय:
वाराणसी।


भारतीयसंस्कृतौ नैके धर्मोत्सवा:आयोज्यन्ते तेषु कुम्भाख्यस्य धर्मोत्सवस्य महत्त्वं विशिष्टमिति। कुम्भस्य विषये वक्तुं शक्यते यत्-'कं=जलम् उम्भति पूरयति अवर्षणादिदुर्भिक्षेभ्य:दूरी करोति स:कुम्भ:'। अर्थात् यद् जलं पुण्यशाली -ऋषिमहर्षिभि:संसेवितं कालविशेषे दुर्भिक्षादिकं दूरीकरोति अपनयति वा स कालविशेष: कुम्भ:। सम्पूर्णेऽपि भारते स्थलचतुष्टये कुम्भोत्सवस्यायोजनं भवति। तानि स्थलानीमानि सन्ति-

**उज्जयिनी-हरिद्वार-प्रयाग-नासिक रूपेण।**

**उज्जैननगरे कुम्भोत्सव:**

**मेषराशिगते सूर्ये सिंहराशौ बृहस्पतौ।**
**उज्जिन्यां भवेत् कुम्भ: सदामुक्ति: प्रदायक:।।**

यदा सूर्य: मेषे, बृहस्पति: सिंहे च भवत: तदा उज्जयिन्यां कुम्भस्यायोजनं भवति। उज्जयिन्यां कुम्भ: पर्वस्यायोजन-कृते एकमेव स्थानस्य विशेष महत्वमस्ति।

नासिकनगरे कुम्भोत्सव:-

**मेषराशिगते सूर्ये सिंहराशौ बृहस्पतौ।**
**गोदावर्यां तदा कुम्भो जायेतवनीमण्डले।।**

अथवा-

**कर्कगुरुस्तथा भानुश्चन्द्रक्षगस्तथा।**
**गोदावर्यां तदा कुम्भो जायेतवनीमण्डले।।**

यदा सूर्य: मेषे भवति, बृहस्पति: सिंहे वा भवति तदा गोदावर्यां (नासिकनगरे) मुक्तिदायिनी कुम्भोत्सवस्य सम्भावना भवति। तत्रापि स्थानत्रय उत्तम्। परन्तु मुख्यं स्थानं भाद्रपदकृष्णपक्षस्य अमावस्यां भवति। हरिद्वारनगरे तथा प्रयागे पूर्णकुम्भ अर्धकुम्भ: च द्वौ प्रमुखौ उत्सवौ स्त:। परन्तु उज्जयिनी तथा नासिकनगरे पूर्णकुम्भमेव भवति। अनेन स्नानस्य फलम् अस्माकं धर्मग्रन्थेषु कथितम्। अस्मिन् विषये निम्नलिखितवचनं स्पष्टम् अस्ति-

**अश्वमेध सहस्राणि वाजपेय शतानि च।**
**लक्षं प्रदक्षिणा भूमे: कुम्भस्नानेन तत्फलम्।।**

एकबारम् अश्वमेधयज्ञं कृत्वा शतवारं वाजपेयीयज्ञं कृत्वा एक लक्षबारं पृथिव्या: प्रदक्षिणां कृत्वा यत् फलं प्राप्यते, तानि फलानि कुम्भपर्वणि स्नानमात्रेण प्राप्यन्ते।

हरिद्वारे कुम्भोत्सव:-

**पद्मिनी नायको मेषे कुम्भराशौ गते गुरौ।**
**गंगाद्वारे भवेद्योग: कुम्भनाम तदोत्तम:।।**

यदा सूर्य मेषे, बृहस्पति: कुम्भे च भवति तदा हरिद्वारस्य गंगाद्वारस्य ब्रह्मकुण्डे कुम्भपर्व: आचर्यते। हरिद्वारे कुम्भोत्सवस्य त्रीणि स्थानानि सन्ति- १. शिवरात्रि, २. चौत्र अमावस्या, ३. मुख्यस्नानं मेषसंक्रान्त्यां भवति।

प्रयागराजे कुम्भोत्सव:-

**मेषराशि गते जीवे मकरे चन्द्र-भास्करौ।**
**अमावस्या तदा योग: कुम्भख्यतीर्थ-नायके।।**

तस्मादपि-

मेषराशिगते सूर्ये सिंहराशौ बृहस्पतौ।

यस्मिन् काले बृहस्पति: मेषे स्थित: स्यात् तथा चन्द्रसूर्यौ मकरराशिस्थौ तदा तीर्थराजप्रयागे कुम्भोत्सवस्य आयोजनं भवति। प्रयागे कुम्भस्य त्रीणि स्थानानि सन्ति।

यथा- १. मकरसंक्रान्ति, २. मौनी अमावस्या, ३. बसन्तपंचमी इति

वर्षेऽस्मिन् तीर्थराजप्रयागे कुम्भोत्सवस्यायोजनं वर्तते। अत्र श्रद्धालूनां संख्याऽपि अधिका भविष्यति इति अनुमाय सर्वकारेण व्यवस्था कृता अस्ति। कुम्भभारतीयपरम्पराया:प्रतीक:इति।


## पाठकानां कृते सूचना

कृपया 'संस्कृत-संवाद:' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवन सदस्यताशुल्क:- रु. २५००/-, पञ्चवार्षिकशुल्क: रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्क: रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डर: , चैक:, ड्राफ्ट:, इत्यनेन 'संस्कृत-संवाद' इतिनाम्न: सम्पादकीयकार्यालये प्रेषयेयु:। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशि: प्रेषयितुं शक्यते।

वित्तकोषविवरणम्

**Sanskrit samvad,**

Current A/C No. 22490200000142,
Indian Overseas Bank, Yamuna Vihar,
Delhi-110053
IFC Code- IOBA0002249

# विशिष्टा भारतीया परम्परा महाकुम्भस्य



- डॉ. अनन्तमणि त्रिवेदी
मानव-भारती, देहरादूनम्, उत्तराखंड

अथ स्वागतमागच्छन्तु भारतवर्षस्याध्यात्मिकं जागरणं महाकुम्भे जायमानमस्ति। सर्वे जानन्ति यत् भारतीय- ज्ञानपरम्परायां सप्तसिन्धोः अस्तित्वं विद्यमानं विद्यते। यत्र प्रमुखतमः समुद्रक्षीरसागरः वर्तते। अस्य क्षीरसागरस्य रुचिकराः कथाः पुराणेषु विद्यन्ते। देवाः दैत्याश्च परस्परं मिलित्वा अमृतस्य अन्वेषणे अस्य रहस्यमयस्य क्षीरसागरस्य मन्थनं कृत्वा चतुर्दशरत्नैः सह अमृतकलशं प्राप्नुवन्। धर्मग्रन्थे विष्णुयागे 'कलशोत्पत्ति' कथायाः सम्पूर्णः अध्यायः वर्तते। अत्र सम्यक् समुद्रमंथनस्य गाथाः अमृतकलशस्य चर्चाश्च पाठकाः पठितुं शक्नुवन्ति। कुम्भपर्वणः इतिहासः प्रमुखतया स्कन्दपुराणे प्राप्यते। वैदिक- साहित्ये कुम्भशब्दस्य प्रयोगः कलशाय अभवत्। अथर्ववेदस्य कालसूक्ते पूर्ण कुम्भस्य समुलेखोऽस्ति। तत्र कथितं यदेषः कुम्भः अनेकप्रकारेण भवति। अयं कुम्भः कालरूपः। अन्यस्मिन् मन्त्रे उक्तं यदयं त्रिलोकपालनकर्ता विद्यते। अयमखिलं जगत् व्याप्नोति। नास्ति एतस्मादधिकं किञ्चित्तेजः। अनेन मंत्रेण ज्ञायते यत् संसारे व्याप्तं कालचक्रमेव पूर्णकुम्भोऽस्ति। अतएव पूर्णकुम्भस्य समयः द्वादशवर्षीयः निर्धार्यते। वस्तुतः इदं कालचक्रमेव संसारं पालयति। यथा अथर्ववेदे उक्तम् -

**पूर्णः कुम्भोऽधिकालः अहितस्त्वं वै पश्यामो बहुधानु सन्तः।**
**स इमा विश्वा भुवनानि प्रत्यङ्कालं तमाहुः परमे व्योमन् ॥**

एषः महाकुम्भः भारतीय- इतिहासस्य, ज्ञानपरम्परायाः, संस्कृतेः, आध्यात्मिकतायाः, सामाजिक- समरसतायाः,सांस्कृतिक- एकतायाः, विश्वबन्धुत्वस्य च संवाहकः विद्यते। महाकुम्भः सनातनधर्मस्य भारतीय-संस्कृतेः अत्यन्तं प्राचीना परम्परा वर्तते। महाकुम्भस्य पर्व ज्ञानस्य, वैराग्यस्य,भक्तेः, मोक्षकामनायाश्च महान् समारोहः विद्यते।अत्रआबालयुवावृद्धगृहस्थवैरागीसन्यासीतपस्वीज्ञानीयाज्ञकानां समुदायः समवेतरूपेण उपस्थितिं प्रदाय शोभां वर्धयति गौरवं च अनुभवति। अस्य समारोहस्य मूलं मन्त्रं - 'वसुधैव कुटुम्बकम्' 'सर्वजन हिताय सर्वजन सुखाय' 'यत्र विश्वं भवति एकनीडम्' 'सर्वे भवन्तु सुखिनः' अथच 'अतिथिदेवो भव' विद्यते।

सर्वे जानन्ति यत् भारतीय- परम्परायां कलशस्य सम्बन्धः अमृतकलशेन वर्तते। पुराणेषु सविस्तरं कथानकं कुम्भपर्वणः समुपलभ्यते। यदा सूर्यः वृषराशौ बृहस्पतिश्च मकरराशौ प्रविशति तदा प्रयागे गंगायमुनासरस्वतीसंगमे कुम्भपर्व भवति।

**गंङ्गाद्वारे प्रयागे च धारा - गोदावरीतटे ।**
**कलशाख्यो हि योगोऽयं प्रोच्यते शङ्करादिभिः ॥**
**मेषराशिगते जीवे मकरे चन्द्रभास्करौ ।**
**अमावस्यां तदा योगः कुम्भाख्यस्तीर्थ- नायके ॥**

कुम्भकलस्य सम्बन्धः अमृतकलशेन वर्तते। कुम्भशब्दस्य अर्थः भवति- 'कु कुत्सितम् उम्भयति दूरयति जगत् हितायेति वा कुम्भः' 'कुं पृथिवीं उम्भयति पूरयति मङ्गल- सम्मानादिभिरिति कुम्भः' कुं पृथिवीं भावयति दीपयति तेजोवर्धनेनेति वा कुम्भः'

कलाः कला हि देवानां, दानवानां कलाः कलाः।
संगृह्य निर्मितो यस्मात्, कलशस्तेन कथ्यते॥

कलशस्य विषये अस्माभिः बहुधा पूजा-पाठसमये आचार्याणां मुखात् श्रुतं यत्-

**कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।**
**मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥**
**कुक्षौ तु सागराः सर्वे, सप्तदीपा वसुन्धरा।**
**ऋग्वेदोऽथ यजुर्वेदो सामवेदो ह्यथर्वणः ॥**
**अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः ।**

कुम्भपर्वणः कथानकं सविस्तरं पुराणग्रनथेषु समुपलभ्यते। श्रीमद्भागवतपुराणानुसारं भगवतः विष्णोराज्ञया देवदानवयोर्मध्ये पारस्परिकसन्धेः पश्चात् समुद्रमन्थनं जातं तत्र मन्दराचलपर्वतः मन्थानरूपेणासीत् वासुकी सर्पश्च रज्जुरूपेण आसीत्। यथा प्रतिपादितम् श्रीनरसिंहपुराणे -

**गत्वा तत्र सुराः सर्वे, सन्धिः कुरुत दानवैः ।**
**मन्थानं मन्दरं कृत्वा, नेत्रं कृत्वा च वासुकिम् ॥**

अथ च श्रीमद्भागवतमहापुराणे -

**ततस्ते मन्दरगिरिमोज सोत्पाट्य दुर्मदाः ।**
**ननन्द उपधिं निन्युः शक्ताः परिघबाहवः ॥**

किंच श्रीमद्भागवतमहापुराणेऽव उक्तम् -

**ते नागराज मामन्त्र्य फलभागेन वासुकिम् ।**
**परिवीय गिरौ तस्मिन् नेत्रमब्धिं मुदान्विताः ॥**

शास्त्रानुसारं समुद्रमंथनेन चतुर्दश- रत्नानां प्राप्तिर्जाता। तानि रत्नानि देवदानवैः परस्परं विभक्तानि। यदा च धन्वन्तरिः अमृतकलशं स्वीकृत्य निरगच्छत् तदा देवदानवयोः युद्धस्थितिः समुत्पन्ना। भगवतः विष्णोः आज्ञया अमृतकलशस्य रक्षायाः दायित्वम् इन्द्रात्मजाय जयन्ताय प्रदत्तम्। जयन्तः अमृतकलशं स्वीकृत्य धावितवान्। धावनसमये अमृतस्य बिन्दवः पृथिव्यां हरिद्वारे , प्रयागे, नासिके, उज्जैनेत्यादिषु चतुर्षु स्थलेषु पतिताः। जयन्तः द्वादशदिवसेषु अमृतकलशं स्वर्गं प्रत्यानीतवान्। स्वर्गस्य एकदिनं पृथिव्याः एकवर्षतुल्यं भवति। द्वादशदिनानि च द्वादशवर्षतुल्यानि भवन्ति। तस्मादेव द्वादशवर्षेषु महाकुम्भस्य वैश्विकमायोजनं भवति। यद्यपि हरिद्वारे, प्रयागे, उज्जैन्यां, नासिके च यथासमयं कुम्भपर्वणः महान् सम्मर्दः,भक्तिभावः दृश्यते तथापि तीर्थराज- प्रयागस्य कुम्भपर्वणः महत्त्वं पृथक् श्रेष्ठं च तपस्विनः मन्यन्ते। यथा स्कन्दपुराणे उक्तम् -

**सहस्रं कार्तिके स्नानं माघे स्नान शतानि च।**
**वैशाखे नर्मदाकोटिः कुम्भस्नानेन तत्फलम् ॥**

विष्णुपुराणेऽपि कुम्भविषये प्रोक्तम् -

**अश्वमेधसहस्राणि वाजपेयशतानि च ।**
**लक्षं प्रदक्षिणा भूमेः कुम्भस्नानेन तत्फलम् ॥**

कुम्भपर्वणः सनातन- परम्परां ध्याने संस्थाप्य महाकवि कालिदासेन प्रयागे संगमे स्नानस्य महत्त्वं श्लोके प्रदर्शितम् -

**समुद्रपत्न्योर्जलसन्निपाते पूतात्मनामत्र किलाभिषेकात् ।**
**तत्त्ववावबोधेन विनापि भूयस्तनुत्यजां नास्ति शरीरबन्धः॥**

आचार्य- चाणक्यः स्वीये नीतिशास्त्रे लिखति-

**साधूनां दर्शनं पुण्यं, तीर्थभूता हि साधना।**
**तीर्थं फलति कालेन सद्यः साधुसमागमः ॥**

आगच्छन्तु सर्वे मिलन्तु पश्यन्तु अनुभवं च कुर्वन्तु दिव्यं भव्यं पौराणिकस्य महाकुम्भस्य आधुनिकिकरणं गङ्गायमुनासरस्वत्याः पवित्रे तटे तीर्थराजप्रयागे महाकुम्भे यत्र सौविध्येन भविष्यति साधूनां दर्शनं, संगमस्नानं, पुण्यफलप्राप्तिश्च। महाकुम्भस्य सुविशाले समारोहे लोकाः समस्ताः सुखिनो भवन्तु इति कामये।

# सर्वसिद्धिप्रदः कुम्भः



- निधिः तिवारी
वेदविभागीया शोधच्छात्रा
श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयः नवदेहली

भारतीयसंस्कृतौ ज्ञानशृङ्खलायां मोक्षस्य भावनायै सर्वे साधकाः सामान्यमनुष्याः च तत्पराः भवन्तीति यतो हि मोक्षः एव तादृशः भावः वर्तते यो हि समस्तपापेभ्यो अस्मान् विमुञ्चति। तावत् पुण्यानां प्राप्तये भारतीय शास्त्रेषु अनेके विधयः सन्ति उल्लिखिताः। एतस्मिन् क्रमे महाकुम्भस्य माहात्म्यं अपि दृश्यते इह जगति यत्र पुराणेषु उद्दिष्टं वर्तते यत् यः मनुष्यः महाकुम्भे स्नानं करोतीति ,सर्वेषां पापानां नाशः अथ च मोक्षप्राप्तिः मिलति। अधुना कुम्भस्य अर्थो विद्यते कलश। कलशस्य सनातनधर्मे विशिष्टं महत्वं वर्तते, अस्य मुखं भगवान् विष्णुः ग्रीवाभागं रुद्रः आधारभागं ब्रह्मा मध्यभागं सकलदेव्यः अन्तेः भरितजलं सम्पूर्णसागरस्य प्रतीकः आमानयति। पुराणेषु एका कथा निहितास्ति यत्र सागरमन्थनकाले अमृतकुम्भः समागतः तावत् असुरेभ्यः अमृतकुम्भस्य रक्षणार्थं देवेभ्यः दायित्वं समर्पितम्। देवैः कलशः चतुर्षु हरिद्वार-प्रयाग -उज्जैन -नासिक-स्थलेषु अन्तर्धत्ते। मान्यतेयमस्ति यत् एतेषु चतुर्षु स्थानेषु कुम्भमेलापकमायोज्यते। षण्णां वर्षाणां अनन्तरं अर्द्धकुम्भस्य तथा च द्वादशवर्षाणां अनन्तरं महाकुम्मस्य पवित्रं मेलकं सम्पाद्यते।

**तीर्थराजस्य महत्त्वम्** -अस्य वर्षस्य महाकुम्भस्य आयोजनं उत्तरप्रदेशे तीर्थराजे प्रयागराजे आविष्क्रियते यत्र पवित्र पावनी पुण्यसलिला गङ्गा यमुना सरस्वती पुण्यन।ः प्रवहन्ति विराजन्ते च। प्रयागराजाय तीर्थाय उक्तमस्ति-

**त्रिषु लोकषु विख्यातं तीर्थं त्रैलोक्यपावनम्।।।**
**सर्वतीर्थमयं दिव्यं प्रयागं तीर्थनायकम्।।१।।**
**गङ्गायमुनयोः संधौ यत् तीर्थं तीर्थनायकम्।**
**पुण्यं च पावनं चौव महापातकनाशनम्।।२।।**
**त्रिवेणिं माधवं सोमं भारद्वाजं च वासुकिम्।।**
**वन्देऽक्षयवतं शेषं प्रयागं तीर्थनायकम्।।३।।**

तीर्थराजः प्रयागराजः भारतवर्षस्य विशिष्टं धार्मिकं आध्यात्मिकं सांस्कृतिकं केन्द्रम् आचष्टे। सृष्टिकर्त्रा ब्रह्मणा सृष्टिकार्यस्य सम्पूर्तेरनन्तरं प्रथमः यज्ञः प्रकल्पितः , अस्य प्रथमस्य "प्र" एवञ्च याग अर्थात् यज्ञ इत्यनेन मिलित्वा अस्य अद्वितीयस्य अलौकिकस्य भूमेः नाम प्रयागः निष्पादितः। एकमात्रमेव स्थलं यत्र तिसृणां नदीनां सङ्गमत्वेन सङ्गमनगरी कथ्यते।

श्रीरामचरितमानसे पवित्रे ग्रन्थे गोस्वामिना तुलसीदासेन प्रयाग-राजस्य महिमा प्रतिपादिता-

**को कहि सकइ प्रयाग प्रभाऊ ।**
**कलुष पुञ्ज कुञ्जर मृगराऊ ॥**
**अस तीरथपति देखि सुहावा ।**
**सुख सागर रघुबर सुखु पावा॥**

**सर्वसिद्धिप्रदः कुम्भः**

ध्यातव्यमस्ति यत् भारतीयग्रन्थेषु मोक्षप्राप्तये परब्रह्मप्राप्तये नानाविधसाधनानि उल्लिखितानि। विविधेषु साधनेषु सिद्धिप्राप्तिः ज्ञानप्राप्तिः आमान्यते (सिद्धिर्ज्ञानप्राप्तिः )। दुःखानां निवारणमेव ज्ञानस्य मुख्योद्देश्यं निगद्यते अतः सिद्धेः प्राप्तिः दुःखनिवृत्तेः कारणम् ह्यध्येयं वर्तते यत् अस्य वर्षस्य महाकुम्भस्य ध्येयवाक्यं उत्तरप्रदेशप्रशासनेनसर्वसिद्धिप्रदःकुम्भः प्रकाशितः यो हि भारतीय शास्त्रेषु नानाविधफलानां प्राप्तेः साधनत्वेन गण्यते ह्य ग्रन्थेषु सिद्धयः अष्टौ गणिताः। कैवल्यपादस्य प्रथमसूत्रे महर्षिणा पतञ्जलिना नैकाः सिद्धयः वर्णिताः।

**"जन्मौषधिमन्त्रतपः समाधिजाः सिद्धयः"**

**जन्मनासिद्धिः** - या सिद्धिः जन्मना प्राप्ता ह्य बालानां कुशाग्रबुद्धिः स्मरणशक्तिः इत्यादयः जन्मनासिद्धौ निहिताः सन्तीति।

**औषधिजा सिद्धिः** - विशिष्टौषधिनां भक्षणेन शारीरिकस्वास्थ्यस्य परिरक्षणमिति।

**मन्त्रजा सिद्धिः** - वेदेषु निहिताः मन्त्राः वेदविद्वद्भिः मनुष्येभ्यः ज्ञान प्राप्तये परमात्मानः प्राप्तये च उपदिष्टाः निःश्वसिताः। मन्त्रान् पठित्वा सिद्धिं प्राप्तुं शक्यते।

**तपोजा सिद्धिः** - एतस्यां सिद्धौ शारीरिक-मानसिक -वाचिकस्तरे तपः आचर्यते। ब्रहम चर्या श्रमात् सन्यासाश्रमपर्यन्तं विहिततपेन जीवने सामञ्ज्यस्य आविर्भावः भवति खलु।

**समाधिजा सिद्धिः** - योग दर्शने विभूति पादे समाधिद्वारा प्राप्तानां अष्टसङ्ख्यकानां सिद्धीनां वर्णनं प्रदिपादितम्। यथा -

**अणिमा महिमा चैव लघिमा गरिमा तथा।**
**प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्ट सिद्धयः ॥**

**अणिमा** - अष्टसु सिद्धिषु प्रथमा सिद्धिः अणिमा ह्ययस्यार्थं स्वशरीरस्य अणुसमानं सूक्ष्मकरणमिति ,यथा श्रीरामभक्तेन भगवता हनुमता लङ्कायां प्रवेशार्थं कृतमासीत्।

**महिमा** - अणिमायाः विपरीता महिमासिद्धिः वर्तते। यस्यां शरीरः स्थूलतां प्राप्नोतीति।

**गरिमा** - अस्याः सिद्धेः प्राप्तेरनन्तरं साधकः स्व शरीरस्य भारः स्वमनसः अनुसारि वर्धितुम शक्नुवन्ति इति आकारः तु सीमितः परञ्च भारः अत्यधिकं वर्धमानो भवति।

**लघिमा** - अस्यां सिद्धौ साधकस्य शरीरः भाररहितो भवति यो हि वायुगतिनापि अत्यधिक-द्रुतगत्या उड्डयति।

**प्राप्तिः** - साधकः कयाचिदपि समस्यया विनैव कस्मिन्नपि स्थाने अदृश्यं भूत्वा तत्र गन्तुं शक्नोतीति।

**प्रकाम्यम्** - साधकः कस्यचिदपि मनुष्यस्य अन्तःस्थितवार्ताः सरलतया परोक्षतया चावगन्तुं शक्नोति।

**ईशत्वम्** - इयं भगवतः उपाधि स्वरूपा विद्यते। अस्याः सिद्धेः अवाप्तेः आनन्तर्यं साधकः ईश्वरस्वरूपो भवति ,सकलजगति आधिपत्यं स्थापितुं शक्नोति।

**वशित्वम्** - वशित्वप्राप्तेः पश्चात् साधकः किमपि मनुष्यं स्वदासत्वेन स्थापयति। वशस्य प्रभावः अस्यां सिद्धौ परिकल्पितः। कस्यापि जयस्य पराजस्य कारणमिति भवितुं शक्यते।

एवमेव प्रयागराजे प्रचल्यमाने महाकुम्भेऽपि अद्वितीयः संयोगः सङ्गमः च दरिदृश्यते। ऐषमो महाकुम्भः विश्वस्य बृहत्तमं आयोजनम् आविष्क्रियते यत्र देशविदेशेभ्यः आकृष्टाः जनाः भक्ताः श्रद्धालवः साधवः ज्ञानपिपासवः पुण्याय मोक्षाय च समायान्ति। तेभ्यः सिद्धिप्रदानाय चतुर्षु दिक्षु अद्भुतः संयोगः चतुस्चत्वारिंशदधिकैकशतवर्षेभ्यः समागतः। महाकुम्भस्य एतां भव्यतां विशालतां चान्वीक्ष्य युनेस्को इति संस्थया महाकुम्भः विश्वन्यासस्य मान्यता प्रदत्ता इयमस्ति अस्य महाकुभस्य महानता। इदं विश्वस्तरीयं महापर्व वैश्विकपटले धार्मिक-पौराणिक -ज्योतिष -आध्यात्मिकतत्वानाम् सांस्कृतिक-ऐक्यभावं प्रदर्शयतीति।

# पुराणेषु स्नानकथायाः विमर्शः



-डॉ. पङ्कज कुमार माहाना
अतिथि सहाचार्यः
स्नातकोत्तर संस्कृतविभागः
धरणीधरविश्वविद्यालयः,केन्दुझरः,ओडिशा

पुराणे स्नानम् हिन्दू -धर्मग्रंथेषु अत्यन्तं महत्त्वपूर्णं कार्यं प्रमाणितम् अस्ति। पुराणेषु स्नानं शारीरिकशुद्धेः अधिकम् आत्मिकशुद्धेः साधनं, पापक्षयस्य, पुण्यप्राप्तेः च उपायं मन्यते। स्नानं विभिन्नेषु पवित्रनदीषु, तीर्थस्थलेषु च कर्तव्यम्, यत्र भक्ताः आत्मशुद्धिं प्राप्तुम्, पापक्षयं च साधयन्ति।

*पुराणे स्नानस्य महत्त्वम् -

पुराणेषु स्नानं पापक्षयस्य, पुण्यप्राप्तेः च मुख्यं साधनं इति व्यक्तम् अस्ति। विशेषेण गङ्गायाः, यमुनायाः, गोदावर्याः नर्मदायाः च नदीनां स्नानम् अत्यन्तं पुण्यदायकं मन्यते। यत्र स्नानं कृत्वा सर्वे पापाः नष्टाः, पुण्यं च लभते। यथा-

अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥
गङ्गेच यमुनेचैव गोदावरी सरस्वती।
नर्मदे सिंधु कावेरी जलेऽस्मिन्सन्निधिं कुरु॥

आध्यात्मिक -उन्नतिः -

स्नानं केवलं शारीरिकस्वच्छतायाः कार्यं न, अपितु आध्यात्मिक उन्नतेः साधनं इति पुराणेषु व्याख्यातं अस्ति। स्नानेन भक्ताः मानसिकशान्तिं प्राप्तुम् आत्मशुद्धिं च साधयन्ति।

स्नानस्य प्रकाराः

पुराणेषु विभिन्नस्नानप्रकाराः उल्लिखिताः सन्ति, यथा-

१.पवित्रनदीस्नानम्ः गङ्गायमुनागोदावरीनर्मदा-नदीषु स्नानं विशेषतया पुण्यदायकम् अस्ति।

२. कुंभस्नानम् कुंभमेलायाः अवसर- विशेषेण महत्त्वपूर्णं स्नानं इति पुराणेषु प्रतिपादितम् अस्ति।

३. सप्तपुरीस्नानम्ः सप्तपुरीं नाम्नां तीर्थस्थलनां स्नानं पुण्यदायकं कृतमूल्यते।

४.नक्षत्रस्नानम्ः विशेषेण नक्षत्रसम्पर्के स्नानं पुण्यप्राप्तिकरं मन्यते।

विशेषकाले स्नानम्ः

गरूडपुराणे स्नानम् विशेषतया हिन्दू धर्मग्रन्थे गरूडपुराणे उल्लिखितं अस्ति। एषा पुराणं मुख्यतया धार्मिक, आध्यात्मिक शुद्धेः, पुण्यलाभे च समर्पितं अस्ति, यत्र स्नानं पापक्षय, आत्मशुद्धि, मोक्षप्राप्तेः च एकं महत्त्वपूर्णं उपायं अस्ति। गरूडपुराणे स्नानस्य विभिन्नं प्रकारं तिथयः च उल्लिखितानि अस्ति, यः सर्वे पापक्षयं साधयन्ति तथा पुण्यं, शान्ति च प्रदानं कुर्वन्ति।

पुराणेषु विशेषकालेषु स्नानं महत्त्वपूर्णं मन्यते। उदाहरणार्थः

* माघमासे स्नानम्ः माघमासे गङ्गायां स्नानं विशेषेण पुण्यदायकं मन्यते।

* कुंभस्नानम्ः कुंभमेलायां स्नानं मोक्षप्राप्त्यै, पापक्षयाय च विशिष्टं मान्यते।

पुराणे स्नानव्यवस्था एकं महत्त्वपूर्णं धार्मिक कृत्यं अस्ति, यत्र शारीरिकशुद्धिकायाः अधिकं आध्यात्मिक शुद्धतायाः च ध्यानं कृतम्। पुराणेषु स्नानं केवलं शारीरिकस्वच्छता का साधनं न, अपि तु आत्मिक उन्नति, पुण्यलाभं, तथा मोक्षप्राप्त्यै एकं महत्त्वपूर्ण उपायं मनीतं अस्ति। पवित्रनदीषु, तीर्थस्थलेषु, तथा विशेषतिथिषु स्नानं कर्तव्यं इति पुराणे उल्लेखितं अस्ति।

यथा- गरुडपुराणे वर्णितम् -

सर्वत्र सुलभा गङ्गा त्रिषु स्थानेषु दुर्लभा ।
गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे ॥ ८१/१-२

पुराणे स्नान -व्यवस्था-

१.पापक्षयः

पुराणेषु स्नानं पापक्षयं साधनं इति व्यक्तं अस्ति। यत्र गङ्गायां, यमुनायां, गोदावर्यां, नर्मदायां च स्नानं कृत्वा सर्वेषां पापानां विनष्टः सन् पुण्यप्राप्तिर्भवति। विशेषतया तीर्थस्थलेषु स्नानं कर्तव्यम्, यत्र पुण्यलाभः साध्यते।

२. पुण्यलाभः

स्नानं पुण्यलाभं साधनं मन्यते। यः व्यक्ति तीर्थस्थलेषु या पवित्रनदीषु स्नानं करोति, सः पापक्षयं, पुण्यप्राप्तिं च प्राप्तवान् भवति। विशेषेण कुंभस्नानं तथा माघस्नानं अत्यधिकं पुण्यदायकं मानीतं अस्ति।

३. शारीरिकशुद्धिः

स्नानं शारीरिकस्वच्छतायाः कर्तव्यं, यः शरीरस्य व्याधिः दूरयति तथा आरोग्यं साधयति। शारीरिकशुद्धये स्नानं कृतं पापक्षयेन सह आत्मशुद्धेः कारणं अपि अस्ति।

४.विशेषकालीनं स्नानम्

१.माघमासे स्नानम् :- माघमासे विशेषतया गङ्गायां स्नानं महत्त्वपूर्णं मान्यते।

२.कुंभस्नानम्- कुंभमेलायां स्नानं पापक्षयस्य, पुण्यप्राप्तेः च एकं महत्त्वपूर्णं साधनं इति पुराणे प्रतिपादितं अस्ति।

३.अमावस्या व एकादशी स्नानम् - अमावस्या एवं एकादशी तिथौ स्नानं पुण्यप्राप्ति हेतु विशेषतया महत्त्वपूर्णं मान्यते।

५.स्नानकृत्येः

स्नानं कर्तुं पूर्वं तथा पश्चात् विशेष कृत्ये कर्तव्ये। स्नानपूर्वं शुद्धिव्रतं कर्तव्यं, स्नानकाले दानं, ध्यानं मन्त्रजपं च कर्तव्यम्, एते सर्वे पुण्यलाभं प्रदानं कुर्वन्ति।

६.स्नानस्य काले ध्यानं

स्नानकाले ध्यानं व मंत्रजपं कर्तव्यम् इति पुराणेषु प्रतिपादितं अस्ति। यः व्यक्ति ध्यानपूर्वक स्नानं कृत्वा देवतायाः ध्यानं वा प्रार्थना करोति, सः पुण्यं अधिकं प्राप्तवान् भवति।

पुराणेषु स्नानसम्बन्धी कथा -

१.गङ्गास्नानस्य महत्त्वम्

पुराणेषु गङ्गास्नानं अत्यधिकं पुण्यकारी मन्यते। यत्र गङ्गायां स्नानं कृत्वा पापमुक्तः सन् मोक्षप्राप्तिरिति विश्वासः अस्ति।

२.नर्मदास्नानम्

नर्मदानदी पुराणेषु पवित्रं, पुण्यदायिकानदीति प्रमाणितं अस्ति। यत्र स्नानं कृत्वा भक्ताः आत्मशुद्धिं प्राप्ति च साधयन्ति।

३.कुंभस्नानम्

पुराणेषु कुंभस्नानं अत्यन्तं महत्त्वपूर्णं रूपेण वर्णितं अस्ति। कुंभस्नानेन जनाः सर्वपापक्षयं, पुण्यप्राप्तिं च लभन्ते।

कुम्भमेला एकं अत्यन्तं प्रसिद्धं धार्मिकं पर्व अस्ति, यः हिन्दू धर्मे प्रतिवर्षे द्वादशवर्षे च आयोज्यते। एषा मेला भारतस्य प्रमुखेषु तीर्थस्थलेषुप्रयागराज (इलाहाबाद), हरिद्वार, उज्जैन तथा नासिकप्र आयोज्यते। अस्याः मेलायाः प्रमुखं उद्देश्यं त्रिषु पवित्रनदीषु स्नानं कृत्वा पुण्यलाभं प्राप्तुं यतते, एतेन स्नानेन पापक्षयमपि भवति। गरुडपुराणे वर्णितम् यत्-

इदं तीर्थमिदं नेति ये नरा भेददर्शिनः।
तेषां विधियते तीर्थगमननं तत्फलं च यत् ॥
सर्वं ब्रह्मेति यो वेत्ति नातीर्थं तस्य किञ्चन ।
एतेषु स्नानदानानि श्राद्धं पिण्डमथाक्षयम् ॥
सर्वा नद्यः सर्वशैलाः तिर्थं देवादिसेवितम् ॥ ८१/२५-२७

कुम्भमेलनस्य इतिहासः

कुम्भमेला पुराणेषु उल्लेखितं अस्ति। अमृतमंथनकथायाः अनुसारं, देवाः च राक्षसाः अमृतं प्राप्त्वा तेभ्यः चत्वारि स्थानानि प्राप्तानि, यत्र अमृतं अपतत्। एतानि स्थानानि प्रयागः, हरिद्वारम्, उज्जैनम्, नासिक इत्यत्र कुंभमेला आयोज्यते।

कुम्भमेलनस्य स्थानानि -

प्रयागराजः

गङ्गायमुनासंयोगे स्थितं संगमस्थानं अत्यन्तं पुण्यदायकं मन्यते। यत्र कुंभमेला आयोज्यते, यत् स्थानं पापक्षयस्य तथा पुण्यप्राप्तेः कारणं अस्ति।

हरिद्वारः

गङ्गायाः तटे हरिद्वारे कुंभमेला आयोज्यते। अत्र स्नानं पुण्यप्राप्तिं साधयति।

उज्जैनम्-

महाकालेश्वरस्य स्थानम् उज्जैनं प्रसिद्धं तीर्थस्थानं अस्ति। यत्र सिंहस्थकुंभमेला आयोज्यते, यत्र स्नानम्आध्यात्मिक उन्नतिप्रदायकं मन्यते।

नासिकः-

गोदावरीनदी कोणे नासिके कुंभमेला आयोज्यते। एतद् स्थानं अपि पवित्रं तथा पुण्यदायकं अस्ति।

कुम्भमेलनस्य विशेषता

पवित्रस्नानम्

कुम्भमेलनस्य मुख्यकार्यं पवित्रनदीषु स्नानम् अस्ति, यत्र श्रद्धालुजनाः पापनाशं तथा पुण्यप्राप्तिं साधयन्ति।

साधुसंप्रदायः

कुम्भमेला साधुसंप्रदायस्य समागमस्थलम् अपि अस्ति। विभिन्ना- अखाड़ात् साधुजनाः यत्र ध्यानं, साधना, च प्रवचनं कुर्वन्ति।

धार्मिक -अनुष्ठानानि-

कुंभमेला अनेकानि धार्मिक कृत्याणि, हवनं, पूजनं, कीर्तनं च आयोज्यते। सर्वे भक्ताः एकत्र आवर्जयन्ति।

वैश्विक- धार्मिक -एकता च -

कुम्भमेलायां अस्माकं देशस्य विभिन्नेषु स्थानेषु देशान्तरेषु च कोटिशः जनसमूहं एकत्री करोति। यत्र विभिन्ना धर्माः संस्कृतयः च एकत्र सन्निवेशिताः भवन्ति।

कुम्भमेलनस्य महत्त्वम्

पापक्षयम्

कुम्भमेलनस्य स्नाने पापक्षयम्, पुण्यलाभः च लभ्यते। माघमासे कुम्भस्नानं विशेषतया पुण्यदायकं मान्यते।

आध्यात्मिका-उन्नतिः

कुम्भमेला आत्मिक उन्नतिं साधनायाः अवसरं दत्ते। ध्यानयोगेन आत्मसाक्षात्कारः प्राप्तुं यः पुण्यदायिनं अवसरं अस्ति। कुंभमेला सम्पूर्णं भारतं तथा विदेशागतभक्तैः परिपूर्णं जायते। यत्र जनसमूहः धर्मेण जागरूकं कृत्वा आध्यात्मिकं उन्नतिं साधयन्ति।

निष्कर्षः पुराणेषु स्नानं केवलं शारीरिकस्वच्छता या स्वास्थ्यलाभस्य उपायं न, अपितु आत्मशुद्धि- पापक्षय- पुण्यप्राप्तिसाधनम् अस्ति। विशेषतया पवित्रनदीषु स्नानं, कुंभमेलायां स्नानं, माघमासे स्नानं च अत्यधिकं महत्त्वपूर्णं पुण्यदायकं च रूपेण मन्यते।

पुनःउच्यते-

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग्भवेत्।

सहायकग्रन्थाः-

१. गरुडपुराणम्- गीताप्रेस,गोरखपुरम् -२७३००५

२.संस्कृत साहित्यस्य इतिहासः -वाचस्पति गैरोला,चौखम्वा विद्याभवन वाराणासी-१

३. धर्मशास्त्रस्येतिहासः- डा. जयकृष्णमिश्रः, चौखम्बा संस्कृत सिरीज आफिस,वाराणसी,२०१०

## महाकुम्भभूमिर्विभातीश्वरस्य



-ईशान तिवारी
व्याकरण विभाग
काशी हिन्दू विश्वविद्यालय

महासाधवो यत्र देवस्वरूपाः
महाज्ञानवन्तः सदाज्ञानशून्याः ।
सदाकर्तुमेव स्वकर्म भ्रमन्ति
महाकुम्भभूमिर्विभातीश्वरस्य ॥१॥
सदोत्थाय नित्यं व्रजन्ति प्रभाते
महासंगमे स्नातुमेव त्रिवेण्याः ।
प्रयागेश्वरीणां नदीनां प्रसादात्
स्वपापालये धर्मलेपाय सन्तः ॥२॥
यथा मन्दिरे सच्चिदानन्दवासः
विधीशस्य वासो विमुक्तिप्रदोऽस्ति
तथा कुम्भभूमौ प्रवासः स्वसाधोः
भवत्यानुरूपः प्रियः पापनाशः ॥३॥
अहो कुम्भदेशे विदेशाज्जनास्ते
समागत्य धर्मोपदेशं पठन्ति ।
समं साधुना रामरामेति भक्त्या
परित्यज्य चिन्तां सभावं रटन्ति ॥४॥
प्रभूमेशनाम्ना सुगीतं सुगीतं
कवीन्द्रैर्मुनिन्द्रैर्महेन्द्रैर्मनेन्द्रैः ।
धरेन्द्रैः स्वधर्माज्जितार्थस्य शक्त्या
करोतीशभक्तस्य सेवां स्वभक्त्या ॥५॥
विना लाभलोभं सुभोगं स्वमोहं
जनः स्वार्थसिद्धिं प्रसिद्धं स्ववृद्धिं ।
स्वशक्त्या स्वभक्त्या स्वगत्या स्वमत्या
स्वराष्ट्रे विकासाय यज्ञं विधत्ते ॥६॥
सुरक्षा स्वरक्षा विवक्षास्ति यस्याः
कृते वर्तते कोऽपि भिन्नो न तस्याः ।
प्रसिद्धप्रयागे स्वशस्त्रैः स्वसेना
सदा भारतं रक्षतीयं विशिष्टा॥७॥
नगेन्द्रेन्द्रभक्ताः समस्ताः प्रसिद्धाः
न नागेन्द्रभिन्नाः न खिन्नाः विभिन्नाः ।
तपस्याबलेनात्मतापस्य नाशं
प्रयागप्रदेशे पवित्रे करोति ॥८॥
परं पुण्यदेशस्य पुण्यात्मसिद्धाः
महान्तो महन्तो मनोज्ञाः प्रशान्ताः।
विराजन्त एतैः स्वदेशस्य शोभा
सदा वर्धिता वर्धमाना सदैव ॥९॥
कविर्नौति भक्त्या प्रयागप्रदेशं
परं पुण्यदं पापनाशं विशेषम् ।
अशेषार्थसिद्धिर्भवेज्जन्मनीश!
मुदेशानबालो भणत्येव देव! ॥१०॥

# कुम्भ गायत्री



-प्रो० राम विनय सिंहः,
सारस्वतम्, ३, मन्दाकिनी विहारः,
ब्लाक-ए, सहस्रधारा रोड, देहरादूनम्, उत्तराखण्डम्

कुम्भस्तु पुण्यकैर्नित्यं सञ्जीवनकुमुम्भति।
लोककुम्भः प्रतीतिकः।।१।।
विष्णुपादस्थिता गङ्गा वृद्धब्रह्मकरङ्गता।
कुम्भविपरिणामाद्धि।।२।।
हित्वा स्वर्णदी जाता दिव्यसिद्धकमण्डलुम्।
प्रतिकुम्भं नवं रूपम्।।३।।
जटाजूटेऽन्विषन्तीह किञ्चिदभिनवञ्जगत्।
मुक्तये धृतबन्धना:।।४।।
शैलाच्छीलमपाकृत्य संवृत्यच्छान्दसीं गतिम्।
याति स्वच्छन्दा नदी।।५।।
तपस्स्वेदातुरा मोहादागन्तुमवनीतलम्।
सत्वरा भावनानदी।।६।।
आत्मोपसर्जनी वृत्तिरुपकाराय कल्पते।
यदा तदा भवेत्कुम्भ:।।७।।
वारिणा सिञ्च्यते भूमिर्मनो ज्ञानाग्निना तथा।
भावाभिसेचनं महत्।।८।।
सुधाबिन्दुनिपाताद्धि कुम्भयोगो विनिश्चितम्।
निपातोऽप्युर्ध्वगः क्वचित्।।९।।
निर्मथ्याम्बुनिधिं क्षारं देवैश्च दानवैस्समम्।
सुधाऽवापि समत्वेन।।१०।।
सर्परज्जुसमाबद्धे सुमेरौ जायन्ते नवाः।
देवदानवसामर्थ्यात्।।११।।
कृते कर्मणि समाने फलं स्याद्विषमं यदि।
युद्धबीजं तदोप्यते।।१२।।
निष्कामफलावाप्तिस्तु वर्तते बौद्धिकी गतिः।
लोकेऽगम्यैव लोक्यते।।१३।।
श्रृणुतात्तात्कालिकञ्च शब्दं मौनसमुद्गतम्।
नित्यान्नित्यमवेद्यते।।१४।।
गुणानुरूपोपलब्धिर्लोकेऽपीह सभाज्यते।
दुराकाङ्क्षैव दुःखदा।।१५।।
पुष्टयेऽखिलखलेभ्य उत वा दुष्टतुष्टये।
कार्यं नो कुरुते प्रधीः।।१६।।
देवैर्विविधैः रूपैश्शिक्षिताः मानुषीप्रजाः
विधेयं वावधेयं किम् !!१७!!
कुम्भस्त्वमृतत्वायैव भवति लोके तत्कथम्।
कुम्भान्मृत्युप्रथा सृता।।१८।।
ऋषीणां च तपस्तापात्पापोऽभवद्बली भुवि।
केयमभिनवा सिद्धिः।।१९।।
यस्य स्मरणमात्रेण निर्गुणस्सगुणायते।
सः पुनः निर्गुणः कथम्?२०।।
प्राकाशिकं स्वरूपं यो धृत्वा लोकं विलोकते।
क्वास्ति सोऽपि तत्त्वदर्शी!२१।।
कुम्भामृतं निपीयाहो प्रसुप्ते स्वर्गवासिनि।
जागृताः जगवैरिणः।।२२।।
जितेन्द्रियो भवेदिन्द्रो लोकसंयमहेतवे।
आचरणाद्धि प्रचारणम्।।२३।।
संस्कृते भारते देशे स्थापनार्थं समा गतिः।
भूतले शाङ्करः कुम्भः ।।२४।।
यदा देवानुगा भक्तिरविभक्तेव भासते।
नासिके ध्यानकुम्भोऽसौ।।२५।।
भूमौ च दक्षिणे देशे पावने गौतमीतटे।
ब्रह्मकुम्भोत्सवो भव्यः।।२६।।
पुंसाञ्च मानसी भूमिरौदार्यमहिता यदा।
तदा गोदावरीस्नानम्।।२७।।
ब्रह्माद्रेर्निस्सृता नित्या पुण्यतोयस्विनी प्रिया।
नृलोके शङ्करी सदा।।२८।।
यथोदीच्यामियङ्गङ्गा तथावाच्यां हि गौतमी।
द्वयोः फलमनुत्तमम्।।२९।।
उज्जयिनी यदा वृत्तिर्महाकालानुशासिता।
भवेत्सचेतनः कुम्भः।।३०।।
पृथिव्याः नाभिभूतेयं विशालावन्तिकापुरी।
शिवलोकप्रतीतिदा।।३१।।
विविधैर्नामभिः ख्याता महाकालकलान्विता।
सेयं कनकशृङ्गेव।।३२।।
शिप्रया क्षिप्रया पापोऽपाक्रियते त्वहर्निशम्।
मधौ जीर्णदलानीव।।३३।।
इतोऽमङ्गलक्षतये निःसृतो मङ्गलग्रहः।
शिव एव शिवायात्र।।३४।।
लोककाण्र्यमपाकर्तुमत्र कृष्णोऽपि शिक्ष्यते।
सैवैषोलौकिकी भूमिः।।३५।।
कालिदासादिरत्नानां विक्रमार्जितसत्फलैः।
सिद्धिदात्री हरसिद्धिः।।३६।।
कलावपि कलां धत्ते देवोऽसौ कालभैरवः।
महाकालकृपावशात्।।३७।।
प्रलये लीनतामेति नृलोकोऽयमम्भोनिधौ।
एकोऽक्षयवटश्शेषः।।३८।।
गङ्गायमुनयोर्मध्येन्तःसलिला सरस्वती
इडापिङ्गलासुषुम्नेव।।३९।।
वसुधा सुधापाताद्धि तीर्थीभूतेव काशते।
प्रयागः कुम्भयागोऽस्ति।।४०।।
समे पीयूषस्नानाय देवाश्च ऋषयो नराः।
प्रायागीया इवाभान्ति।।४१।।
महिमा तीर्थराजस्य विख्यातास्ति महीतले।
कुम्भस्नानस्य वैशिष्ट्यात्।।४२।।
ब्रह्मणा प्रथमं यज्ञं कृतमत्रैव विश्रुतम्।
मनश्शान्तिप्रदायित्वात्।।४३।।
सरित् त्रयी वहत्येषा तथैवात्र यथाऽनिशम्।
कूटस्था नाडिकात्रयी।।४४।।
वायुर्वागर्थरक्षार्थं जीवनायावनौ जलम्।
कुम्भो मोदं तथावति ।।४५।।
सप्तपूर्षु समाख्याता मायापुरीति मोक्षदा।।
लोकेऽलोकदर्शिनीव।।४६।।
यथोर्ध्वगामिनां लोकेऽधोगामिनामपि तथा।
मुक्तिसोपानकल्पेयम्।।४७।।
प्रोद्गतेर्दुर्गतेर्मध्ये सद्गतिः कीदृशी नृणाम्।
कुम्भो बोधयते सदा।।४८।।
ऋषयस्सत्त्वसम्भारा अवतीर्य महीतलम्।
कुर्वते लोकरक्षणम्।।४९।।
लोकस्यारोहिणी वृत्तिर्दैवी चाऽऽह्लादिनीगतिः।
हरिद्वारे कुम्भाख्ये स्तः।।५०।।
सृष्टेः क्ष्वेडमपाकर्तुं समुत्पादि देवैस्सुधा।
कुम्भैर्लोके वितीर्यते।।५१।।

# पुनरेकदा त्रिवेणीतीरे



डॉ. नवलता
लखनऊ

पुनरेकदा त्रिवेणीतीरे।
गङ्गायमुनासरस्वतीनाम-
मृतनिभे शुचिपावननीरे।।
महाकुम्भपर्वणः प्रसङ्गे।
क्रोडे तव हे मातर्गङ्गे।
रवितनयायास्तरलतरङ्गे।
सरस्वतीसलिले गम्भीरे।।१।।

सूर्यशशीगुरुशनिसङ्घाते।
कुम्भे बृहस्पतौ सम्पाते।
मकरराशिगतरवेर्निपाते।
शीतसमीरकम्पवानीरे।।२।।

नानानग्नभिक्षुसमवायः।
विविधोऽप्यक्षवाटसमुदायः।
एकसनातनधर्मरक्षणे
निहितः शमो यस्य करवीरे।।३।।

कोटिकोटिजनसिन्धुरपारः।
यस्य न कश्चित्पारावारः।
मूर्तिमती श्रद्धावगाहते
पावनसङ्गमजले गभीरे।।४।।

कल्पवासनिष्ठास्तपस्विनः।
शमप्रधाना अथ मनस्विनः।
तपोजन्यतेजांसि दधानाः।
अग्निस्तिष्ठति यथा शमीरे।।५।।

भरद्वाजगुरुकुलपरिणाहे।
कलकलछलछलसरित्प्रवाहे।
देवासुरसङ्ग्रामकथा सा
उट्टङ्किता बृहत्प्राचीरे।।६।।

धृत्वा दिगम्बरं परिधानम्।
त्यक्त्वा देहजनितमभिमानम्।
उन्मण्डित इव जनसम्बाधो
निष्ठा यस्य नित्यशरीरे।।७।।

क्वचिद्भागवतकथापुराणी।
क्वचित्सिद्धसङ्घानां वाणी।
संश्रूयते विश्वकल्याणी।
पदे पदे शुचिसिद्धकुटीरे।।८।।

हरहरहरहरमहानिनादः।
जडचेतने सत्त्वसंवादः।
कणे-कणे चेतनाप्रसादः।
आत्मैकत्वं विश्वशरीरे।।९।।

श्रद्धापुलकितमनोविरागः।
भौतिकसर्वसुखानां त्यागः।
तीर्थतमः खल्वसौ प्रयागः।
तत्र पाञ्चभौतिके शरीरे।।१०।।

# महाकुम्भो विजयताम्!



-डॉ. अरविन्दकुमारतिवारी

(1)

विशालभारतस्य तीर्थराजसंगमस्थले
महोत्सवो विलोक्यते जनौघयोजितो नवः।
अनेकलक्षसंख्यका जना गृहाद् विनिर्गता
समेत्य पूर्णकुम्भपर्वणि प्रसन्नमानसाः।।१

पुरातनीयमद्भुतास्ति संस्कृतिः सनातनी
समुद्र- मन्थनोद्भवा कथा सुधाप्रदायिनी।
सुधाप्तये सुरासुरा विमोहिता वियद्गताः
सुधाप्रपूर्णकुम्भकर्षणातुरा विलोकिताः।। २

समुच्छलद्विशालदिव्यकुम्भतोऽपतन्द्रुतं
प्रयागराजसंगमेऽमृतस्य बिन्दवो ध्रुवम्।
त एव कुम्भपर्वणि प्रदीप्तशक्तयः स्वतः
प्रपावयन्ति मानवानखण्डभारते ततः।। ३

अहो नु माघपूर्णिमादिने कुजे तु कोटिशः
स्वपापतापनाशनाय मुक्तये च सर्वशः।
जलाभिषेकतुष्टचेतसो गृणन्ति गौरवं
महर्षिसिद्धनागशाहिदर्शनोत्सुका वयम्।। ४

विनापि भेदभावनां समेत्य पूर्णकुम्भके
भवन्त इष्टदेवताः स्तुवन्तु भव्यसंगमे।
प्रकल्पवासलाभकांक्षया प्रयान्तु बन्धवः!
प्रयागकुम्भपर्वदर्शनाय शुद्धबुद्धयः! ५

(2)

गङ्गासूर्यसुतामहोर्मिरचिते श्रीसङ्गमेऽलौकिको
नेत्रानन्दमहोत्सवोऽयमतुलो दिव्यो विशालोऽद्भुतः।
देवादेवमनुष्यकिन्नरमनः कर्षन् बलाद् दूरतश्
चाह्वानं कुरुते न कस्य सुमहाकुम्भः प्रयागान्मुहुः।।१

दृश्यं हिन्दुसमाजसंस्कृतिकलाश्रद्धास्पदं भाग्यतो
जीवो जन्मनि पश्यतीव समये पुण्यप्रभाभावितः।
छेत्तुं कल्मषकोषबन्धनमये संसारसारार्णवं
लब्धुं मोक्षमवेहि मित्र! सुमहाकुम्भामृतं सत्वरम्।। २

नायं साधुसमागमो भुवि महान् मान्यो जनौघस्त्वया
सामान्यो जनमोहनाय रचितः पौराणिको मोक्षदः।
एतस्मिन् विचरन्ति कल्पकलिकाकान्तारदेवादयो
धृत्वा रूपमये जनस्य बहवो कुम्भाभिषेकाकुलाः।। ३

मायाब्रह्मविधीन्द्रशम्भुदिविषल्लोकाः प्रयागं श्रिता
वेदान् शास्त्रवचः पुराणसुकथाः श्रोतुं समुत्कण्ठिताः।
राजते ससुखं मुनीन्द्रशिविरे ग्राम्या इवानन्दिताः
विद्याभास्करसिद्धसद्गुरुमुखं सम्प्रेक्षमाणा न किम्? ४

सङ्ख्या योगिमनस्विनां क्वचिदये द्रष्टुं न या शक्यते
सैषा राजति भारतस्य महिते तीर्थे प्रयागे ध्रुवम्।
एह्येवं कुरु पुण्यलाभमचिरं हित्वा समस्तं भ्रमं
कुम्भाच्छ्रेष्ठतरो न कोऽपि सरलो मार्गोऽस्ति मुक्त्यै सखे! ५

# कुम्भप्रणतिमात्रेण पीयूषवर्षणं ध्रुवम्



प्रो. बनमाली बिश्वालः

कुम्भं सर्वविधं नौमि पूर्णमर्धञ्च सर्वगम्।
नौमि भव्यञ्च दिव्यञ्च कुम्भश्रेष्ठं प्रयागकम्।६।
वन्दनं तीर्थराजस्य पुण्यप्रदं विभाव्यते।
कुम्भप्रणतिमात्रेण पीयूषवर्षणं ध्रुवम्।७।

**कुम्भगाथा**

गङ्घा-यमुनयोस्तीरेप्रयागेपावने शुभे।
कुम्भश्चाध्यात्मिकोमहान् मासंयावत्प्रवर्तते।७१।
अतोत्र प्रस्तुते काव्ये कुम्भो वर्णनीयः शुभः।
कुम्भगाथां विना मन्ये प्रयागोर्धो विवेचितः।७२।

**कुम्भ-पृष्ठभूमिः**

तत्र किं कारणं वा स्यात् पृष्ठभूमिश्च कीदृशी।
ऐतिह्यं ज्ञातुमेतस्य जिज्ञासा स्यात् स्वाभाविकी।७३।
समुद्रमन्थनात्प्राप्तःसुधापूर्णो घटो महान्।
तच्च प्राप्तुं विवादेषु संलग्नाः देव-दानवाः।७४।
विष्णुस्तु मोहिनीभूय जग्राह तं सुधाघटम्।
अमृतबिन्दवः केचित् स्यन्दीभूताः स्थले स्थले।७५।
यत्र यत्रसुधाबिन्दुः पपात भारतावनौ।
विश्वे कुम्भस्थलत्वेन तत्तत्स्थानंप्रसिद्ध्यति।७६।

**कुम्भतीर्थानि**

मध्येदेशे क्वचित् कुम्भोजायते मोक्षदश्शुभः।
उज्जयिन्यां महाकाल-नगर्यां वै विशेषतः।७७।
नासिकेपुण्यभूमौ च गोदावर्यास्तटे क्वचित्।
जायतेकुम्भयोगोऽपिहरिद्वारेयथाक्रमम्।७८।
तीर्थराज-प्रयागस्य कुम्भो लोके प्रसिद्ध्यति।
देवा लालायिता यत्रस्नानमाचरितुं महत्।७९।
गङ्गाया यमुनायाश्च सरस्वत्याश्च सङ्गमः।
नदीनां सङ्गमे क्षेत्रे कुम्भः प्रायो ह्यनुष्ठितः।८०।

**भव्यकुम्भम्**

तीर्थोत्तमे प्रयागेऽत्र तीर्थराजेति संज्ञिते।।
प्रयागराज-क्षेत्रे तद् भव्यकुम्भं सुसम्पन्नम्।८१।
सर्वार्थामृतसिद्ध्याख्यः योगः कश्चिद्विशिष्यते।
दशकानन्तरं योगस्तादृशोऽत्र विलक्षितः।८२।
प्रधानमन्त्रिणाऽभीष्टो भव्यकुम्भो महान् मतः।
प्राप प्रथमवारन्तु ह्यन्ताराष्ट्रियमान्यताम्।८३।
किन्नराणामस्मिन् कुम्भे शोभायात्रा-समावेशः।
वैशिष्ट्यमस्य कुम्भस्य द्विगुणं येन वर्धितम्।८४।
विख्यातो दिव्यकुम्भोऽयं स्वच्छकुम्भोऽप्ययम्मतः।
संज्ञाभ्यां स्वच्छ-दिव्याभ्यां कुम्भो भव्यायते क्वचित्।८५।
पञ्चकोटिजनैः स्नानं कृतं मुख्यतिथौ क्वचित्।
कोट्यधिकैः जनैश्चात्र स्नातं स्नानान्तरेषु वै।८६।
जनसंख्यादृशा विश्वे प्रथमं नगरं स्मृतम्।
सर्वाधिकजनैर्युक्तः प्रयागः सम्प्रकीर्तितः।८७।

**कुम्भ-पर्यटनम्**

अस्थायिमण्डपान्यत्र निर्मितानि च लक्षशः।
मन्दिराणि क्वचित्तानि कलाकेन्द्राणि च क्वचित्।८८।
दिवाभ्रान्तिं जनयन्ति रात्रौ दीपाः सुसज्जिताः।
सायङ्कालो गुञ्जितोऽस्ति मन्त्रध्वनिविमोहितः।८९।
मर्त्ये समवतीर्णोऽस्ति स्वर्गः कश्चिन्मनोरमः।
विद्युद्दीपे चमत्कृते को दिवसो निशा च का।९०।
कुम्भगाथा ह्यनन्ताऽस्ति ज्ञातुं न सुकरा तथा।
स्थाने स्थाने महत्त्वं तद् गद्यते दूरदर्शनैः।९१।
संमर्दकारणाद्येषां वियोगो ज्ञातिभ्योऽभवत्।
भ्रमविस्मृतकेन्द्रेषु तन्नामोद्घोषणं पुनः।९२।
प्रसादनाय बालानां मनसां साधनानि वै।
क्वचिन्मृतकूपास्त्वत्र क्वचिद्दोला विभिन्नकाः।९३।
क्वचिन्नमामि गङ्गेऽपि प्रदर्श्यात् प्रदर्शनीम्।
गङ्गां प्रदूषणात् त्रातुं निर्माति योजनाश्च काः।९४।

**कुम्भपर्वाणि**

माघेमाघेभवेन्मेलाशुभदासङ्गमेपुनः।
षड्वर्षेष्वर्धकुम्भश्च पूर्णो द्वादशके मतः।९५।
स्नानपर्वसु सर्वेषुजलेऽमृतं वसेद् ध्रुवम्।
अतः स्नानार्थिभिर्भक्तैरमृतं प्राप्यते स्वतः।९६।
पुण्यं कुम्भे प्रयागे यत् तथा कुम्भान्तरेषु न।
एवं कुम्भः प्रयागस्थस्सर्वकुम्भेषु मोक्षदः।९७।

**कल्पवासः**

भक्तैः माघे शुभे मासे कल्पवासो विधीयते।
पूर्णिमातः समारभ्य पूर्णिमान्तं प्रवर्तते।९८।
कल्पवासे सतां सङ्गः दर्शनं महतां पुनः।
देवानां दुर्लभो योगः सुलभो मनुजस्य वै।९९।
स्नानार्थीनां महामेलाप्रातःकालात्प्रवर्तते।
प्रसादसेवनं प्रायो मध्याह्नेत्वाश्रमेषु वै।१००।
कृत्वा प्रवचनं सायं कथावाचनतत्पराः।
महतो विषयानुक्त्वादर्शकान् मोहयन्ति वै।१०१।
सङ्गमेमाघमासे च कल्पवासंप्रकुर्वतः।
दृष्ट्वाऽत्र चकिता देवाःवाञ्छन्ति जननं भुवि।१०२।

**शाहीस्नानानि**

स्नानं हि पुण्यदं माघेकुम्भे तुमोक्षदं स्मृतम्।
शाहीस्नाने कृते चात्र पुनर्जन्म न विद्यते।१०३।

**मकरस्नानम्**

सङ्क्रान्तौ मकरस्नानं माघमासे तदा भवेत्।
पौषान्ते मकरे राशौ सूर्यः सङ्क्रमते यदा।१०४।
स्नानं मकरकेमासिसङ्क्रान्तौसङ्गमेशुभम्।
शाहीस्नानेषु चौतद्धि प्रथमं स्नानमुच्यते।१०५।

**मौनी-अमावस्या-स्नानम्**

पक्षादूर्ध्वं ततः प्रायः शाहीस्नानं द्वितीयकम्।
अमावस्यातिथौ तत्तु निश्चितं माघमध्यगे।१०६।
शाहीस्नानं कृतं येन मौन्याख्येपावने दिने।
तच्च स्नानं त्रिवेण्याञ्चेत् परमं मोक्षदं मतम्।१०७।
त्रिवेण्याख्या प्रसिद्धा सा मौनीसंज्ञाऽभिधायिनी।
सोमवासरसम्बद्धा सोमवतीति संज्ञिता।१०८।

**वसन्तपञ्चमी-स्नानम्**

शाहीस्नानं तृतीयञ्च श्रीपञ्चम्यांप्रसिद्ध्यति।
शीतस्य न्यूनता यत्र स्नानं सुखप्रदं मतम्।१०९।
स्नानेष्वेतत् स्नानत्रयं पुण्यदृष्ट्या प्रसिद्ध्यति।
शाहीस्नानं प्रयागस्थं हरति दुरितं परम्।११०।

**शाहीस्नानक्रमः**

विहरन्ति जनन्यङ्केबाला इवात्र साधवः।
कारंकारंविभिन्नाश्चबाललीला विनूतनाः।१११।
महोल्लासयुता चात्र स्नानयात्राप्रवर्तते।
आखडानां क्रमशोऽत्र शोभायात्रा महीयते।११२।
विविधानामाखाडानां श्रीमहामण्डलेश्वराः।
प्रमुखतां भजन्त्यत्र धर्मकार्यप्रसङ्गतः।११३।
महापर्वसमारम्भे त्वाखाडाश्च यथाक्रमम्।
शोभायात्रां विधायात्र स्नानं विदधति क्रमात्।११४।
महानिर्वाणः सर्वादौ अटलाखडया सह।
ततो निरञ्जनी गच्छेत् आनन्दश्च ततः परम्।११५।
नागासंन्यासिभिर्महामण्डलेश्वरसङ्गमः।
ततो जूना ततश्चाग्निः सन्यासिन्यस्ततः परम्।११६।
स्नानानन्तरमेतेषां किन्नराणां क्रमस्ततः।
मुख्याऽत्र महिलारूपे पुमानेव प्रसिद्ध्यति।११७।
आकृष्टाः भव्यकुम्भेन समागताः विदेशिनः।
'गठरी:' शिरसि नीत्वा महान्तो ग्रामवासिनः।११८।
जूनाखडागताः काश्चित् संन्यासिन्यो विदेशतः।
नागासंन्यासिभिः नागा-संन्यासिन्यश्च सन्ति काः।११९।
तिस्रो भवन्ति तत्रैताश्चाखडाश्चानिसंज्ञिताः।
निर्मोही प्रथमा ज्ञाता निर्वाणी च दिगम्बराः।१२०।
भव्ये कुम्भे तथा दिव्ये सुमुहूर्ते शुभे दिने।
नवीनाश्चाभवन्नागाः सन्न्यासिनः सहस्रशः।१२१।

**नागा-शोभायात्रा**

नागासन्तोविशिष्यात्र सङ्गमश्रीप्रवर्धकाः।
अन्येभ्यो साधुसन्तेभ्यस्तेषां तपः सुतीक्ष्णकम्।१२२।
नागादर्शनमत्रास्ति परमं पुण्यवर्धकम्।
असकृद्दर्शनं तेषांपुण्यवताञ्च दुष्करम्।१२३।
केचिद्गाञ्जांपिबन्तोऽत्रदर्शयित्वा कलाः नवाः।
शिवासक्तिं सूचयन्तः शिवभक्तौ रताः पुनः।१२४।
कश्चिल्लिङ्गेदृढेदण्डं स्थापयित्वेहतापसः।
स्थातुं नागान्तरंतत्र यच्छत्यवसरं मुहुः।१२५।
कार-यानं समाकर्ष्टुं लिङ्गेन यतते च कः।
एवंगङ्गातटे काचित्शाहियात्रा महीयते।१२६।
शस्त्रास्त्र-कौशलं तेषु गौरवाय प्रकल्प्यते।
दण्डादण्डी क्वचित् खेलः खड्गाखड्गी गदागदी।१२७।
घण्टां बद्ध्वाऽपरो लिङ्गे भारयुक्ताञ्च दीर्घिकाम्।
मार्गे दण्डायमानोऽस्ति भक्तेभ्यो दक्षिणाऽऽप्यते।१२८।
नागाश्चित्तं समाकृष्य हुङ्कारैश्च न केवलम्।
योगस्य साधनाभ्यासैः भक्त-मनांसि चाहरन्।१२९।

**वैरागि-शोभायात्रा**

अस्त्र-शस्त्राणि सञ्चाल्य शक्तिं प्रादर्शयन्नागाः।
एवं वैरागिणश्चक्रुः नागासन्न्यासिभिः समम्।१३०।

**खालसाधारि-शोभायात्रा**

खालसाधारिणः सन्तः प्रदर्श्यात्र स्वकौशलम्।
चक्राणि चालयामासुश्चेन्द्रधनुर्निभाणि वै।१३१।

**सन्यासिनी-शोभायात्रा**

माईवाडोखडाभ्यस्ताः सन्यासिन्यः सहस्रशः।
सञ्जाताः ब्रह्मचारिण्यो ह्यलङ्कारान् विहाय ताः।१३२।

**किन्नर-शोभायात्रा**

किन्नराणां प्रवेशोऽपि शाहीस्नाने समादृतः।
तासां तेषां समुत्साहो दर्शनीयः पदे पदे।१३३।
किन्नराचार्यवर्यस्य शृङ्गारः स्त्रीजनोचितः।
शोभते महिलावेशे तन्महामण्डलेश्वरः।१३४।

**आधुनिकबाबा-समागमः**

महान्तः स्वामिनः सन्तः बाबा-संज्ञा-विभूषिताः।
नैके चाधुनिका बाबा भव्यकुम्भे समादृताः।१३५।
बाबानां बहुरूपत्वं कुम्भपर्वण्यदृश्यत।
क्वचिद् बन्दुकबाबाऽत्र राधेबाबा क्वचित् पुनः।१३६।
पाइलटाख्यबाबाऽन्यः गोल्डेन्बाबा क्वचित्पुनः।
कश्चिद्रुद्राक्षबाबाऽत्र पोस्ट-बाबाऽपरो मतः।१३७।
कंप्यूटराख्यबाबाऽन्यो पेट्रोल-बाबा तथाऽपरः।
जटाधारी भवेत् कश्चिज्जटा भूमितलं स्पृशेत्।१३८।
नाम्नाऽन्यो हाइटेक-बाबा टोपीबाबाऽपरः स्मृतः।
एवमाधुनिका बाबा विचरन्त्यपरे पुनः।१३९।
दृष्टः परम्पराभिश्च वैभवो देवदुर्लभः।
स्वर्णरत्नैः समं सन्तः रुद्राक्षैः समलङ्कृताः।१४०।

**विदेशि-सन्त-समागमः**

केचिदामेरिकातोऽत्र केचिद्व्रेल्जियमात्पुनः।
इस्राइल-जपानयोः फ्रान्स-कैनडयोरपि।१४१।
आइर्लाण्डादि-देशेभ्यः समागताः विदेशिनः।
तेऽपि सर्वे समाकृष्टाः धर्मे सनातनं प्रति।१४२।
सप्तसमुद्रपारात्ते कुम्भभूमावुपस्थिताः।
स्नान-ध्यानतत्परं येऽत्र भजने कीर्तने रताः।१४३।

**कुम्भपरिदृश्यम्**

नानाविधविपण्यान्तुवस्तुजातंप्रसारितम्।
क्रेतुं विश्यां प्रवृत्ताश्च भक्ताः सन्यासिनस्तथा।१४४।
शिवभक्तैःसमाश्वस्ताः मार्गेचवृषभाः क्वचित्।
क्वचिच्चित्रक्रोडकाःरम्याः सेवन्ते चातपं नवम्।१४५।
विस्तीर्णे सङ्गमे क्षेत्रे डयन्ते विहगाश्च के।
विदेशादागतास्साइबेरियातः विशेषतः।१४६।
सांस्कृतिक-प्रदर्शनैः संस्कृतिः परिदर्शिता।
क्वचिद्गीतैः क्वचिन्नाट्यैः दर्शिता लोकसंस्कृतिः।१४७।
हर हर महादेव विहगानां मुखेष्वपि।
हरे राम हरे कृष्ण-सङ्कीर्तनं सुगुञ्जितम्।१४८।

**सर्वधर्मसमन्वयः**

विष्णुभक्ताःशिवे रक्ताः विष्णौ शैवास्तथैव च।
धर्माणां मिश्रणञ्चात्र सर्वधर्मसमन्वयः।१४९।
महामृत्युञ्जयैर्मन्त्रैः गायत्री गुञ्जति क्वचित्।
शिवताण्डवस्तोत्रञ्च परितो ध्वनितं महत्।१५०।
विष्णोः सहस्रनामानि चोद्घोष्यन्ते प्रातः क्वचित्।
देवी-क्षमापनं स्तोत्रं सायङ्काले प्रगीयते।१५१।
मन्त्रैः स्तोत्रैः समैः सर्वमपवित्रं पवित्रितम्।
कुम्भे च सङ्गमक्षेत्रे पुण्यं मङ्गलदं शुभम्।१५२।
भक्तासक्तविरक्तानां समेषाञ्च समा गतिः।
सर्वेऽप्याध्यात्मिकास्त्वत्र सर्वे च शान्तिकामिनः।१५३।

**चतुर्वर्गफलप्राप्तिः**

सुधाकुम्भे यथाऽमृतं तथा कुम्भेऽमृतं भुवि।
अमृतस्य फलं यद्यत् तत् कुम्भे लभ्यतेऽखिलम्।१५४।
चतुर्वर्गफलप्राप्तिः कुम्भेनापि सुसिद्ध्यति।
धर्मार्थकाममोक्षाश्च स्वतः कुम्भे प्रतिष्ठिताः।१५५।
धर्मं वाञ्छन्ति ते भक्ताः वणिजश्चार्थकामिनः।
विरला मोक्षमिच्छन्ति ह्यपरे कामकामिनः।१५६।
पर्यटकाः भ्रमन्त्येवं चतुर्वर्गफलाशया।
केचन सफलास्तत्र बहवस्सन्ति निष्फलाः।१५७।
कुम्भस्य महिमा चात्र देवैर्वक्तुं न शक्यते।

## प्रयागराजः



-प्रो. रहस बिहारी द्विवेदी
-17/615 ग्रीनसिटी,
माढ़ीताल जबलपुरम्

प्रकृष्टयागैः प्रथितः प्रयागः त्रिवेणिका यत्र सदाप्तनीरा।
भागीरथीसूर्यसुताङ्गसङ्गा सान्तः प्रवाहा च सरस्वतीह ।।1।।
प्रोक्तं महाभारत आदिभागे सोमस्य धातुर्वरुणस्य चात्र।
जनिस्थलं वारिधिमन्थनोत्थः सुधाघटादत्र पपात बिन्दुः।।2।।
कुम्भस्य चान्यं कलशाभिधानं कात्स्र्न्यसृष्टिकर्त्ता विहितो विधाता ।
लाल्लालने विष्णुरिति प्रसिद्धः शाच्छङ्करः, संहरणेऽत्रबोध्यः।।3।।
तीर्थानिदेवाः सकलाश्च जीवाः कुम्भे वसन्तीति हि मन्यमानैः ।
कुम्भार्चनं यत् क्रियतेऽत्रहेतुः कुम्भस्तु परमेश्वररूप एव ।।4।।
शिवालया माधवनामशंम्भोस्त्रिवेणिकायाञ्च चतुर्षुदिक्षु।
भक्ताः समायान्ति शिवार्चनार्थं नाम्ना प्रयागोऽन्विततीर्थराजः।।5।।
वनप्रयाणावसरे ससीतः सलक्ष्मणो राम इहागतोऽभूत् ।
मुनिं भरद्वाजममुष्यतीर्थमृषिञ्च वाल्मीकिमथो ववन्दे ।।6।।
तत्त्वावबोधेन विना न मुक्तिः किन्तु प्रयागे सवने नियुक्तिः।
सर्वेक्षयान्ता निचया जगत्यां वटोऽक्षयो नैव विनश्यतेऽत्र।।7।।
आदित्यमासा ननु राशयश्च ते द्वादशाङ्का समएव कुम्भे ।
यान् धारयन् पोषयति प्रकामं विष्णुर्हि भगवान् सर्वात्मभूतः ।।8।।
स्कान्दे चमात्स्ये किलकीर्तिरस्य संवर्णिता येन हि तीर्थराजः।
शोकाच्च रोगाच्च भयाद्विमुक्तिस्तीर्थेऽत्र नित्यं सुलभा विभाति ।।9।।
गङ्गातरङ्गैरभिमिश्रिताश्रिताऽपि विलोक्यते सूर्यसुता विभिन्ना।
न केवलं लभ्यत आत्मशुद्धिर्नेत्रस्य निर्वाणफलं सुलभ्यम् ।।10।।
पुरा प्रतिष्ठानपुरे पुरस्तान्नता समस्ता नृपराजिरासीत् ।
नृपः पुरुर्वा नहुषो ययातिर्दुष्यन्त आर्योभरतश्च यत्र ।।11।।
वार्यध्वना प्राक् सुलभाऽत्र यात्रा माघे महत्कूलमपीह लभ्यम्।
येनास्ति सम्मेलनयागयोग्यं तेन प्रयागोऽन्विततीर्थराजः ।।12।।
अशोकहर्षौ नृपचन्द्रगुप्त आगत्य दानं ददतिस्म माघे।
हर्षस्तु कुम्भेऽत्र धनं समग्रं ददत्स आसीद् यशसा प्रसिद्धः ।।13।।
अनेकराज्ञामिह राजधानी पुराऽभत् सम्प्रति भातिदुर्गः।
अकब्बरस्याऽस्तितटे विशाले यस्मिन् वंटश्चाक्षय एव भाति।।14।।
दुर्गे कुलस्तम्भशिलाभिलेखो राज्ञोह्यशोकस्य परः प्रसिद्धः।
बन्धादधो मारुतिनन्दस्य मूर्तिःशयाना भुवि राजमाना ।।15।।

## कुम्भपर्व पावनम्



-डा. संजयकुमारचौबे (सहायकाचार्यः)
स्नातकोत्तरसंस्कृतविभागः हरप्रसाददासजैनमहाविद्यालयः
आरा, बिहार।

तीर्थं नाम हि पावनं भवरुजो दिव्यं महद् भेषजं
पापानां च विनाशकं सुखकरं शान्तिप्रदं पुण्यदम्।
उत्साहस्य विवर्धकं प्रतिपदं सद्भावसम्पोषकं
चेतोनिर्मलकारकं सुबलदं मुक्तेः परं साधनम्।।१।।
कुम्भाख्यं च पवित्रपर्व भुवने ख्यातं महत् पुण्यदं
यत्रागत्य सुधान्धसोऽपि मुदिता भूयो रमन्तेऽखिलाः।
दृष्ट्वा विस्मयकारिणीं च सुषमां दृश्यं महत् सौख्यदं
तस्मिन् मज्जितमानसास्तु नियतं नेच्छन्ति गन्तुं दिवम्।।२।।
ग्रामीणास्त्वथ नागरा यतिजनाः सिद्धाः समे साधवः
शैले घोरतपस्सु जातु निरताः धर्माधिकारे रताः।
शैवाः शाक्तजना इमे हरिपरा नानापथप्रेमिणः
कुम्भे पर्वणि मोदभावभरिता आयान्ति सिन्धोस्तटम्।।३।।
अस्मद्धर्मसनातनोऽत्र विपुलः साक्षाद् भवन् मूर्तिमान्
लोकानां नयनं सदा सुखयति प्राप्तः सतां सङ्गमम्।
दिव्या भारतसंस्कृतिः सुविदिता वाभाति सर्वैर्गुणैः
पूता भव्यपरम्परा ऋषिजनैः सम्पोषिता वर्धते।।४।।
वर्णानां च विलुप्यतेऽत्र नितरां भेदो महान् सर्वतः
शैथिल्यं भजते हि जातिजनितं क्लेशावहं बन्धनम्।
साधूनां शुचिसङ्गमेन सततं भक्तिर्दृढा वर्धते
सद्भावो हृदि जायतेऽतिसुखदः कुम्भे महापर्वणि।।५।।
यज्ञेभ्योऽपि महत् फलं च लभते कुम्भाख्ययोगे नृणां
श्रद्धाभावयुता यतोहि मनुजाः गच्छन्ति तीर्थं प्रति।
अत्रत्यं पवितं सुधामयजलं सर्वं मलं दाहयत्
स्नातानां हृदयं पुनाति सततं शान्तिं सुखं यच्छति।।६।।
स्नात्वा प्राणिगणो मुदाभिलषते तीर्थे विमुक्तिं ध्रुवं
दत्वा दानमहो ह्यदात्र सुफलं प्राप्नोति लोके भृशम्।
कृत्वा देवगुणानुवादमनिशं स्वान्तःसुखं वाञ्छति
दीने सर्वजने क्वचित् करुणया नारायणं पश्यति।।७।।

## प्रयागस्थो महाकुम्भः



-मिश्रोऽभिराजराजेन्द्रः
पद्मश्री

सकलविश्वं समाकर्षति प्रयागस्थोमहाकुम्भः।
न कस्मै वितरति प्रीत्या विमक्तिं भो महाकुम्भः।।
सनातनधर्मगतमातन्वती भागीरथी यत्र।
तदीये पूत तटयुगले किरति कीर्तिं महाकुम्भः।।
चरणप्रक्षालनैर्यज्जलं संकलितं पुरा विधिना।
अहो तस्यैव गंगारूपतां कथयति महाकुम्भः।।
विमुक्तिदमकरसंक्रान्तौ त्रिवेणी संगमे पूते।
समायात्येव भोः प्रतिवत्सरं रम्यो महाकुम्भः।।
समस्तं भूतलं पश्यतु किमास्ते हिन्दु धर्मोऽयम्।
सनातनधर्मकीर्तिध्वजसदृक्षोयं महाकुम्भः।।
सकृत् स्नानेन गंगाया अहो मोक्षः कराग्रे ते।
कथं नासौ प्रगृह्-येत प्रयच्छति तं महाकुम्भः।।

## प्रयागस्तीर्थराजः



-महाचार्य्यःमनतोषःभट्टाचार्यः

क्षीराब्धिन्ते ममन्थुर्दितिसुतविबुधाश्चामृतं याचमाना'-
शैलेन्द्रम्मन्थदण्ड जलनिधिमथने चक्रिरे मन्दरन्ते।
दध्रे पृष्ठे मुरारिस्तमथ गिरिवरं वासुकिर्मन्थरज्जु'-
चाभूद्वर्षाणि यावज्जलनिधिमथनाल्लेभिरेऽथामृतन्ते।।१।।
देवान् दैत्या विजित्य ह्यमृतघटममी दैत्यलोकं प्रजग्मुर्
देवास्ते सस्मरुस्तं मुररिपुममलं हा समुद्धर्तुकामाः।
कुम्भं तञ्चामृतस्य त्रिभुवननृपतिश्श्रीपती रूपमाशु
मोहिन्याश्चाथ धृत्वा दितिसुतभवनाच्चासुरान्मोहयंस्तान्।।२।।
कुम्भन्तञ्चामृतस्य त्रिदशगणहितायोद्धारासुरास्ते
प्राप्तुं कुम्भं पुनर्वै सपदि मुररिपुं चेदधावन्त विष्णुः।
जिष्णोः पुत्राय तस्मै पुनरमृतघटं तं ददौ रक्षणाय
धृत्वासौ काकरूपं तमथ च कलसं व्योममार्गे जगाम।।३।।
दैत्यास्ते तं जयन्तं सुरपतितनयं काकरूपं ग्रहीतुं
शीघ्रं सर्वे दधावुर्द्धिक इह सभयो डीयते स्म द्रुतं हा।
क्लान्तो विश्रामहेतोरुपविशति ततस्सेन्द्रपुत्रो ररक्ष
कुम्भं तं यत्र यत्रामृतमथ पतितञ्चोच्छलत् कुम्भमध्यात्।।४।।
तत्र स्थानं पवित्रं भवति च सुतरां श्राद्धदानावगाहे
गोदावर्याश्च तीरे सुरपतितनयश्चोज्जयिन्यां प्रयागे।
दैत्यैस्तैस्ताडितस्स ह्युपविशति सुखं श्रीहरिद्वारतीर्थे
श्रेष्ठश्चौषां प्रयागश्चिरमथ मिलिताश्चात्र नद्यस्तु तिस्रः।।५।।
नद्यः पूताश्च गङ्गादिनकरतनयाश्रीसरस्वत्य एतास्-
तीर्थे पुण्ये प्रयागेऽदितिसुतसकलैश्चात्र राजन्ति नित्यम्।
ये मर्त्यास्स्नान्ति शुद्धास्सकृदथ तिसृणां सङ्गमे वै नदीनां
पापान्मुक्ताः प्रयान्ति त्रिदशगणभवनं नैव चायान्ति पश्चात्।।६।।
राजन्ते वै ग्रहास्ते रविरथ मकरे शक्रमन्त्री वृषे च
शुक्रस्सौरिश्च कुम्भे विधुरपि मिथुने कर्कटे भूमिपुत्रः।
राहुर्मीने पुनश्च ज्ञ इह च मकरे केतवः कन्यकायां
योगे चौवं प्रयागे ननु भवति महानैषमे कुम्भयोगः।।७।।
आविश्वञ्चौकनीडं ह्यवितथमिह वै तीर्थराजे प्रयागे
पञ्चाशत् कोटिरत्राद्विजपतितनरास्तत्र चाबालवृद्धाः।
विद्वांसो गण्डमूर्खा गृहिमुनियतयो वित्तहीना धनाढ्याः
के नो यान्ति प्रयागे विविधमतियुतास्सङ्गमे सन्ति बद्धाः।।८।।
बाङ्गाः पञ्जावपुत्रा द्रविडसुतगणा गुज्जरा मारहट्टा
नागाश्चान्ध्रास्तिलङ्गास्त्रिपुरसिकिमजाश्चोत्कलाश्चासमीयाः।
अन्ये प्रादेशिकास्ते किमिह किमिह नो काङ्क्षिणः काङ्क्षिणो वा
तीर्थे पुण्ये प्रयागे हरिहरसहिते चाप्तकामा रमन्ते।।९।।
किं त्यक्तुं किञ्च लब्धुं सरलमतियुता भक्तिमन्तो ह्यभक्ता
गङ्गाया देवनद्या दिनकरदुहितुस्सङ्गमेऽस्मिन् प्रयागे।
नो जाने केन कस्मै कथमपि च कुतः कस्य कस्माच्च कस्मिन्
को वा मां याचतेऽहं किमपि विलिखन् देववाण्या प्रतीक्षे।।१०।।

## कुम्भपर्वत्रयोदशी



-प्रो. सदाशिव कुमार द्विवेदी
सीनियर प्रोफेसर (आचार्यः) संस्कृतविभागः, कलासंकायः
काशीहिन्दूविश्वविद्यालयः, वाराणसी-२२१००५

कुम्भवत् सारतामेतु लोकः प्रापंचिको भुवि
आत्मतत्त्वप्रकाशाय जगदानन्ददायकः ।।१।।
महाकुम्भे जनाः सर्वे स्नानदानपरात्मकाः।
पुण्यार्जनधिया सत्यं संक्रामन्तु परस्परम् ।।२।।
हृदि श्रद्धाविभूतिर्नः विश्वभावात्मतां व्रजेत्।
अमृतं हृदि सत्वस्थं शासनाय भवेद् भुवि।।३।।
दिवाकरस्य संक्रान्तिः कुम्भपर्वविभूषिता।
सनातनविभूतेर्वै सर्वसिद्धिप्रकाशिका।। ४।।
महात्मनां महासंघः प्रपत्या प्रापितात्मनाम् ।
तीर्थे प्रयागराजेऽस्मिन् लोकशुद्धिपरं भवेत्।। ५।।
जनानां महती श्रद्धा कुम्भपर्वणि द्योतिता।
लोककल्याणसिद्ध्यर्थं प्रतिष्ठां प्राप्नुयात् सदा।। ६।।
सक्रान्तिः कुम्भपर्वेऽस्मिन् सर्वतापविनाशिका।
दिवसेश्वरस्य लोकाय भवेन्नित्यं सुखप्रदा ।। ७।।
सनातनेन सिद्धिदं प्रकाशितं सदैव नः
समस्तलोकसाधकं समस्तकीर्तिकारकम्।
महात्मनां समृद्धिसिद्धिभूतिभावपूरितं
दिवाकरप्रकाशपर्व कुम्भभावभूषितम् ।।८।।
सदैव भारतं भुवः प्रकाशपूरतात्मतां
नयेत्स्वरीतिवृत्तिसिद्धिश्रद्धयासमन्वितम् ।
तदर्थभावितं जगद् भवेद्धि भव्यभूतिमत्
स्वचेतसः विरोधभावनाशने हि तत्परम्।।९।।
विभातु प्राणदस्तु चित्ररश्मिदीप्तिभूषितः
दिवाकरः सदैव विष्णुभावभावभावितः ।
भवेद्धि तस्य दीधितिः समस्ततापनाशिका
विरोधितां विनाशने मनुष्यभावसाधिका।।१०।।
त्रिपुण्ड्भावितस्तनुर्विभूतिभूतिभावितस्
त्रितापतापनाशकः शिवः सदाशिवः शिवः।
समस्तलोकसिद्धिदः समस्तभावभूषितः
स्वयंप्रभाप्रभासितः सदा शिवं तनोतु नः ।।११।।
महात्मनां हि कुम्भपर्वपूरिता विभूतयः
प्रकाशतां व्रजन्तु सर्वसिद्धिभावभूषिताः।
तितिक्षया विरोधितां विलुप्ततां व्रजेद् भुवि
प्रकर्षतां लभेद्धि शान्तिसत्यताप्रकाशने।।१२।।
समुत्सवो दिवाकरस्य क्रान्तिभावसाधकः
स्वपुण्यपापकल्पनात्मसिद्धिभावदायकः।
स्वयंविभूतिकारकः भवेत्प्रपत्तिसाधकः
सदैव भारतस्य विश्वज्ञानसिद्धिकारकः।।१३।।

## तत्र कुम्भोऽस्ति भो!



-रामसेवक मिश्रः,
हजारीबाग

यत्र भागीरथीयमुनयोः संगमः
यत्र लीनासरस्वती च न दृश्यते
यत्र तीर्थेस्तिवासो सुरानां सदा
तत्र कुम्भोस्ति भो!
तत्र कुम्भोस्ति भो ! (१)
यत्र पापाऽरिष्टाश्च प्रक्षालिताः
यत्र ज्ञानेन मुक्तेः संकल्पना।
यत्र आस्थावतां संगमः दृश्यते
तत्र कुम्भोस्ति भो
तत्र कुम्भोस्ति भो । ! (२)
वैष्णवाश्शैवशाक्ताश्च ये साधवः
भिन्नपन्थामतानांचावलम्बिषु ।
यत्र विद्वेषभावश्च नो दृश्यते
तत्र कुम्भोस्ति भो!
तत्र कुम्भोस्ति भो ! (३)
अमृतस्नानकर्तुं वयमागताः
जीवनं धन्यकर्तुं वयमागताः
आशीषः कामये सेवकोऽयं सदा
तत्र कुम्भोस्ति भो!
तत्र कुम्भोऽस्ति भो। (४)

## महाकुम्भपर्वणो वाचोपबृंहणम्



-डा.लक्ष्मीनारायणपाण्डेयः
भोपालम्- मध्यप्रदेशः

अनादिकालादिह मर्त्यलोके
विभाति भाभूषिततीर्तकल्पं
समस्तभूमण्डलमण्डलीकं
पुराणप्रोक्तं भुवि भारतं मे।।१।।
वसुन्धरायामिह पुण्यभूमौ
प्रवर्तते धर्मपरायणानाम् ।
महोत्सवानामथ पर्वणाञ्च
परम्परा पुण्यपरा युगेभ्यः।।२।।
प्रियाःसमस्ता भुवि भारतीयाः
चिरादहो चोत्सवधर्मिणश्च ।
प्रदीपनाय ननु सत्त्वदीप्तिं
ऋषिप्रणीतौभिनवःप्रकल्पः।।३।।
अनादिकालादिह लोकवेद्यः
अपूर्वताभावितपर्वराजः ।
समादृतौध्यात्मविभूतिभूतः
अयं महाकुम्भ इहेति सत्यम्।।४।।
समुद्रमथनस्य फलप्रसूताः
धरागता यैमृतबिन्दवस्ते ।
महोत्सवस्यास्य निमित्तभूताः
अमर्त्यमद्यापि ततो हि मर्त्यो।।५।।
खगोलशास्त्रीयविधेःप्रसङ्गे
सुयोगयोगे नियतैन्तराले ।
क्रमात्प्रयागादिषु कुम्भपर्व
पुनाति लोकं सकलं चतुर्धा।।६।।
तपोधना वा च यशोधना वा
मुमुक्षवो वा च कृतार्थिनो वा।
गृहस्थशीला अथवा विरक्ताः
समेत्य कुम्भे मुदिता भवन्ति।।७।।
अपूर्वरम्यं भवतीह दृश्यं
पदे पदे यत्र विचित्रता स्यात्।
समागतं यद्भुवनं समस्तं
विभाति चौवं महनीयकुम्भे।।८।।
क्वचित्पुराणान्तकथाकलापाः
क्वचिद्विधानैरिह यज्ञपूर्तिः।
क्वचित्समष्टेरनुसन्धनानि
क्वचित्सतामाश्रयणे प्रसङ्गाः।।९।।
क्वचित्पुरःसस्वरवेदपाठः
क्वचिद्बुधानामिह शास्त्रचर्चा।
क्वचित्तु हव्यं हरिकीर्त्तनं वा
अशेषमानन्दमयं समन्तात्।।१०।।
अखण्डसाम्राज्यमहो दिगन्तं
पवित्रताया भुवि दिव्यतायाः।
न जातिवर्गादिविभेदभावाः
समैपि लोका व्रतिनःकृतार्थाः।।११।।
समग्रदेशादिह धर्मिणस्ते
विना निमन्त्रेण च मोदमग्नाः।
न लक्षशःकोटिमिताः सुदूरात्
प्रचोदिताःस्वात्मधिया प्रयान्ति।।१२।।
पवित्रगाङ्गैरिह सिञ्चिता ये
त्रवेणिधाराङ्गतदेहभाजः।
भवन्ति पूताःसुजनाःसमस्ताः
तथेदमस्ति क्रतुकुम्भपर्व।।१३।।
विराडियं संस्कृतिचेतनायाः
सुपद्धतिर्धर्मसनातनस्य ।
यथैक्यभावैमृतपर्वणीह
करोति मग्नान् भुवनं प्रयागे।।१४।।
चितिप्रकृष्टा खलु भारतीया
दधाति रूपं श्रुतिसम्मतं यत् ।
वृणोति देवत्वमसारसारे
अपारपारे प्रियतीर्थराजे।।१५।।
कदा हरिद्वारपथप्रयाणं
कदा मुदैवोज्जयिनीं गतेपि।
कदापि तन्नासिकधर्मपूते
मनो मदीयं नु भवेत्कृतार्थम्।।१६।।
तरङ्भङ्गस्फुरितप्रवाताः
यदत्र महतां महतां प्रवासाः।
परत्र धर्मद्युतिदीप्तलोकः
तथान्यतःसंसृतितत्त्वबोधः।।१७।।
महानयं सत्त्वविधानमूलः
महोत्सवश्च महतां सताञ्च।
महत्प्रपञ्चे महनीयतायै
महाजनैस्तन्मधुमत्करोति।।१८।।
अनामनामा भुवने निकामाः
स्त्रियश्च पुरुषाःसधवाःसकामाः ।
अनन्तसत्ताश्रयणोत्सुका ये
महोत्सवेस्मिन् मिलिता भवन्ति ।।१९।।
शृणु प्रयाग ! स्मृततीर्थराज !
समागता यैमृतकाङ्क्षिणस्तान् ।
विधेहि कारुण्यमशेषमेवं
ऋतेन सिक्ताःसकला भवन्तु ।।२०।।
अरे कराले कलिकालघोरे
मनो मदीयं चल त्वं प्रयागम् ।
ततश्च लब्ध्वा प्रतिपत्तिभूतिं
अमर्त्यमाद्यं च लभस्व मर्त्ये ।।२१।।

## प्रयागकुम्भदर्शनम्



डॉ० निरञ्जन मिश्रः

अखण्डपुण्यसंचयं सुधाच्छविन्दुपानकं
समस्तसिद्धसाधुपादपंकजप्रमार्जनम्।
सुरेन्द्रलोकवैभवस्य भूतले निदर्शनं
समीप्सितं हि चेत्कुरु प्रयागकुम्भदर्शनम्।।१
समस्तविश्वनेत्रतापहारिचित्रदर्शनं
विशालसैकतस्थले नवीननाककल्पनम्।
शरीरधारिभिः प्रचण्डशैत्यपादबाधनं
समीप्सितं हि चेत्कुरु प्रयागकुम्भदर्शनम्।।२
जटाधरा दिगम्बरा श्मशानभस्मभूषिता
धरातलैकशायिनश्च कण्टकासनास्तथा।
धनेश्वरा नटेश्वरा बुभुक्षिताश्च तुन्दिला
नटन्ति यत्र तत्प्रयागकुम्भकल्पितांगनम्।।३
नवीननिर्मितांगने पुरातनप्रभोत्सवं
पदे पदेऽध्वरोत्थधूमसंचयस्य नर्तनम्।
श्रुतिस्वरप्रगुञ्जितं समस्तदिग्दिगन्तरं
समीप्सितं हि चेत्कुरु प्रयागकुम्भदर्शनम्।।४
समस्तवर्णरञ्जितं विचित्रचित्रचित्रणं
मनुष्यजीवनैकलक्ष्यसाधनं निरापदम्।
समस्तभावनाप्रवाहसंगमस्य दर्शनं
समीप्सितं हि चेत्कुरु प्रयागकुम्भदर्शनम्।।५
विशिष्टनीतिसाधनं नवीननीतियोजनं
सनातनध्वजांकितं समस्तवारिदांगनम्।
सुरेशधामसेवनं सुरारिसंघभेदनं
समीप्सितं हि चेत्कुरु प्रयागकुम्भदर्शनम्।।६
सुरापगाच्छधारया कलिन्दजाच्छमेलनं
सुधाच्छपंकजश्रिया विनीलपद्मगुम्फनम्।
धरामरांगणप्रभासप्रदीप्तमञ्चदर्शनं
समीप्सितं हि चेत्कुरु प्रयागकुम्भदर्शनम्।।७

## महाकुम्भोत्सवः



-प्रो.राजेन्द्र त्रिपाठी 'रसराज'
अध्यक्षः, संस्कृत-विभाग
इलाहाबाद-डिग्री-कॉलेज

महाकुम्भोत्सवः पुण्ये प्रयागे पावयति लोकम्।
समायातुं प्रयागे दर्शनार्थं सूचयति विश्वम्।१
प्रसारो दृश्यते लोके प्रबन्धो भाति रमणीयः।
समस्ते भारते विश्वे प्रचारः प्रेरयति सर्वम्। २
प्रयागे द्वादशे वर्षे समायातोऽस्ति शुभकुम्भः।
अखण्डं भारतं संयुज्य ऐक्यं दर्शयति नित्यम्।३
महन्तः साधवो नैके मठाश्चागत्य शोभन्ते।
त्रिवेण्यां साधुभि : रचितः प्रवासः कारयति पुण्यम्।४
विचित्रं विद्युतं दृष्ट्वा मनो मे चिन्तयति तीर्थे।
नभश्चागत्य माघे शुभ्रकीर्त्या द्योतयति रात्रिम्।५
यथा सूर्यः शशिः ताराश्च शोभन्ते नभसि भाभिः।
स्वयं स्वर्गः तथैवागत्य तीर्थे सारयति कीर्तिम्।६
क्वचिद्गीतं क्वचिद्वाद्यं वितनुते सौख्यदां लीलाम्।
प्रयागे माघपर्यन्तं भवानी वादयति वीणाम्।७
प्रभाते सङ्गमे स्नात्वा हनुमद्दर्शनं कृत्वा।
वटद्रोर्दर्शनं लब्ध्वा स्वकीयं तारयति पूर्वम्।८

## त्रिवेणीकुम्भसाम्राज्यम्



-अभिनवदण्डी
दण्डपाणिराचार्यः

इयं गङ्गा शम्भोश्शिरसि रसिका शासयतु न
इयं कृष्णा कृष्णाह्वयनयमुना मानयतु नः।
सरस्वत्या देव्या विमलसलिलं लालयतु नः
त्रिवेण्याः साम्राज्यं जगति गतिना पावयतु नः।
त्रिवेण्याः पुण्यायाः कलिकलुषनिःशोषविमले
सलीलं लीलायाः सलिलकुलकल्लोलविमले।
शुभं स्नान्तः सन्तो नियमितमतिः कान्तमनसो
महाकुम्भे साम्भःस्नपनरमणं पावयतु नः।।2
तरङ्गैरुत्तुङ्गैर्गुणगणितरङ्गैर्बहुविधैः
लसन्नृत्यद्भङ्गैर्मनुजकुलसङ्गैः प्रथयति।
इयं यात्रा धात्रा त्रसनशमनाऽशासि सुफला
महाकुम्भे साम्भःस्नपनरमणं पावयतु नः।।3
युवानो वा वृद्धाः शिशुजनकुलं तत्र बहुलं
जनानां सम्मर्दः प्रथयतितरां तत्र प्रथिमाम्।
त्रिवेणी सद्वेणी प्रणयति नवां मुक्तिसरणीम्
महाकुम्भे साम्भःस्नपनरमणं पावयतु नः।।4
पुरा दैत्यादित्याः कलहभरपीयूषरसने
तदाऽकस्मात् तस्मादमृतगतलेशो भुवमगात्।
पतन् माहात्म्यं स प्रकटयति तत्स्नानविषये
महाकुम्भे साम्भःस्नपनरमणं पावयतु नः।।5
क्वचिद् वेदाघोषः क्वचन जनसंगीतरचना
क्वचित्तन्त्रैर्यन्त्रैः क्वचिदपि च देवार्चनविधिः।
क्वचिद् भक्त्यालापः क्वचिदपि कथास्वादरमणम्
महाकुम्भे साम्भःस्नपनरमणं पावयतु नः।।6
पुरस्ताद्धस्ताग्रे विवधरचनान् पुष्पनिचयान्
दधाना धन्यास्ते नियमधृतिचेतश्शुभधियः।
श्रयन्तः श्रीनाथं कलिहरविधौ पूजननिधौ
महाकुम्भे साम्भःस्नपनरमणं पावयतु नः।।7

## तीर्थयात्रा महाकुम्भमेला शुभा



-अनामिकासिंहः

गंगा विशुद्धा यमुना शुभा दिव्या सरस्वती।
एतत्त्रयनिपूतेयं त्रिवेणीसंगमं नुमः।।1
यत्र भक्ताः समे सर्वमांगल्यदाम्
मुक्तिमादातुकामाः व्रजन्ति स्वयम्।
तत्र भूयः पुनः मंगलाशासनम्
तीर्थयात्रा महाकुम्भमेला शुभा।।2
यत्र देवाः समायान्ति पूजाविधौ
मर्त्यलोके मनुष्येण रूपेण ते।
घाटमार्गाः समे पुण्यदा मोक्षदा
तीर्थयात्रा महाकुम्भमेला शुभा।।3
यच्च पुण्यं पुराणे शुभे शाश्वते
कीर्तितं वर्णितं साधुभिः पूर्णतः।
तच्च पुण्यं महाकुम्भमेलासमम्
तीर्थयात्रा महाकुम्भमेला शुभा।।4
साधुसंगाः समस्तास्तदानीं गताः
भक्तिपूजाविधिं कुर्वते भूयशः।
स्नानमत्रास्ति दिव्यं महापुण्यदम्
तीर्थयात्रा महाकुम्भमेला शुभा।।5

## महाकुम्भारम्भः



-डा.प्रियव्रतमिश्रः
सहाचार्यो व्याकरणविभागः
संस्कृतविद्याधर्मविज्ञानसङ्कायः
काशीहिन्दूविश्वविद्यालयः,
वाराणसी

निनादोऽभ्रे शुभ्रे निखिलभुवने तारकगणे धरा सेयं नित्यं विलसति च बाभ्राष्टि सततम् ।
दिगन्ते सौगन्धः प्रवहति च पुष्पं विकसति महाकुम्भारम्भो जगति च जरीजृम्भ्यत इह ।।१।।

सुधाकुम्भस्सोऽयं खलु दिविषदां योऽप्यभिहितो मिथः सङ्घर्षेणापतति भुवने पूतसरिति ।
ततो मर्त्ये लोके भवति निखिले सङ्गतिरहो ! महाकुम्भारम्भो जगति च जरीजृम्भ्यत इह ।।२।।

प्रयागे सङ्गत्यां ननु हरिगृहे पुण्यसलिले किमुज्जैने शिप्रासरिति सुतरां पुण्यदरवः ।
पुनर्गोदावर्यां नवशिखसमाख्ये च नगरे महाकुम्भारम्भो जगति च जरीजृम्भ्यत इह ।।३।।

स नागानां सङ्घः किमुत महतां सङ्गतिरहो ! मुनीनां साधूनां निरतिशयसान्निध्यमतुलम् ।
लभन्ते लोकास्तेऽपरजननपुण्योदयबलान्महाकुम्भारम्भो जगति च जरीजृम्भ्यत इह ।।४।।

सदा धर्मे लग्नाः प्रभुचरणसेवाप्रशमिता निमज्जन्त्यात्मानं विमलजलनिष्णातकरणाः ।
विलीयन्ते नद्यां ननु सुकृतकामाश्च मनुजा महाकुम्भारम्भो जगति च जरीजृम्भ्यत इह ।।५।।

प्रतीच्या प्राच्या वोत्तरजनपदीयाश्च सततं सदा दाक्षिण्यास्ते ननु सहचरा यान्ति समये ।
अभिन्नाः सर्वेऽमी मिलितहृदयाः स्नान्ति मुदिता महाकुम्भारम्भो जगति च जरीजृम्भ्यत इह ।।६।।

नदीनां साङ्गत्यं किमिह ननु पावित्र्यमखिलं तनोत्येवं चित्ते विरलपरलोकस्य सुकृतिम् ।
प्रयान्ति स्वर्गं ते सकलभवबन्धोज्झितजना महाकुम्भारम्भो जगति च जरीजृम्भ्यत इह ।।७।।

जनानां बाहुल्यं क्वचिदपि च नैतादृशमहो! परीपाटी सैषा न खलु भुवने दृश्यत इह ।
सदा जीयाल्लोके भरतधरणीसंस्कृतिरहो! महाकुम्भो भूमौ सकलजनवाञ्छा विजयते ।।८।।



श्रीपुष्करसिंहः धामी
मा० मुख्यमंत्री / अध्यक्षः
उत्तराखण्डसर्वकारः

# उत्तराखण्ड-संस्कृत-अकादमी
## ( उत्तराखण्डसर्वकारः )



डॉ० धनसिंहः रावतः
मा० संस्कृतशिक्षामंत्री /
उपाध्यक्षः
उत्तराखण्डसर्वकारः



श्री दीपककुमारः
सचिवः, संस्कृतशिक्षा,
उत्तराखण्डशासनम्



डॉ० वाजश्रवा आर्यः
सचिवः,
उत्तराखण्ड-संस्कृत-अकादमी



श्रीसत्येन्द्रप्रसादः डबरालः
वित्त-अधिकारी
उत्तराखण्ड-संस्कृत-अकादमी

## संस्कृतभाषायाः संरक्षणार्थं क्रियामाणाः कार्यक्रमाः

१. संस्कृतच्छात्रप्रतियोगिताः ( खण्ड-जनपद-राज्यस्तरेषु )
२. विविधप्रकाशनम् - आन्वीक्षिकीशोधपत्रिका, दैनन्दिनी, संस्कृत-कलैण्डर, वार्षिकी।
३. अखिलभारतीयं संस्कृतशोधसम्मेलनम् ।
४. अखिलभारतीय संस्कृतकविसम्मेलनम् ।
५. अखिलभारतीयं वेदसम्मेलनम्।
६. अखिलभारतीयं ज्योतिषसम्मेलनम् ।
७. संस्कृतच्छात्रप्रतिभासम्मानम् ।
८. डॉ० भीमराव-अम्बेडकर अनुसूचितजाति / अनु. जनजातिसंस्कृतच्छात्रवृत्तियोजना।
९. गार्गीसंस्कृतबालिकासंस्कृतच्छात्रवृत्तियोजना।
१०. शिक्षक-सहायता-अनुदानम्।
११. प्रतियोगीस्वाध्यायकेन्द्रयोजना।
१२. अल्पसंख्यकसंस्थानसमन्वययोजना ।
१३. संस्कृतशिक्षक कौशलविकासकार्यशाला।
१४. आदर्शसंस्कृतग्राम-विस्तारपरियोजना।
१५. उत्तराखण्डराज्यविज्ञान-प्रौद्योगिकीपरिषद् (UCOST) उत्तराखण्डविज्ञानशिक्षा अनुसंधानकेन्द्रम् ( USERK ) इत्यनयोः सहयोगेन विविधकार्यक्रमाणामायोजनम्

# उत्तराखण्ड-संस्कृत-अकादमी

संस्कृतभवनम्, राष्ट्रियराजमार्गः, रानीपुरझालं, ज्वालापुरं, हरिद्वारम्-२४९४०७

अस्माकं प्रेरणास्रोतः- स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः-डॉ.बलदेवानन्दसागरः, प्रो. वाचस्पति मिश्रः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी,
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
Owner. Printer, Publisher and Editor MANJU SHARMA, Printed by Lakshy Printers, 521/8B, Ground Floor, Gali No. 14, Adharsh, Mohalla, Maujpur, Delhi-110053
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2024-26 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।